SRI

BRUHAT-STOTRA RATNAKARA

VOL 1.

FIRST PART

(Ganapati, Subramanya & Siva Stotras)

SRI RAMA RAMI

V. RAMASWAMY SASTRULU & SONS
292, SUBHASH CHANDRA BOSE
ROAD, MADRAS. 1.
1953.

All Rights Reserved.] [*Prise Rs. 10-0 0*

PRINTED BY
V. VENKATESWARA SASTRULU
AT THE V. RAMASWAMY SASTRULU & SONS
AT THE 'VAVILLA' PRESS
Madras—1953.

॥ श्रीः ॥



॥ बृहत्स्तोत्ररत्नाकरः ॥

गणपति - सुब्रह्मण्यस्तोत्रात्मकः

॥ प्रथमभागः ॥



चेन्नपुर्यां

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्

इत्येतैः प्रकटितः

1952.

चेन्नपुर्याम्
वाविल्ल मुद्रणालये
मुद्रितः

॥ श्रीः ॥

॥ स्तोत्राणामकाराद्यनुक्रमणिका ॥

स्तोत्राणि.	पृष्ठसंख्या.
अ	
अद्वैतलक्षणम्	५११
अर्धनारीश्वरस्तोत्रम्	३२१
अर्धनारीश्वराष्टोत्तरशत-नामस्तोत्रम्	४०४
अष्टमूर्त्यष्टकम्	३९८
आ	
आदित्यहृदयम्	३८३
आम्नायस्तोत्रम्	४८६
ए	
एकदन्तस्तोत्रम्	७९
एकश्लोकी	५१७
क	
कालभैरवाष्टकम्	२५७
काश्यष्टकम्	४१०
ग	
गङ्गाधरस्तोत्रम्	४२६
गणनायकाष्टकम्	७७
गणपतिसहस्रनामस्तोत्रम्	६
गणेशकवचम्	२८
गणेशमानसपूजा	३२
गणेशबाह्यपूजा	५४
गणेशमहिमस्तोत्रम्	३४
गणेशपञ्चरत्नम्	९०
गणेशभुजङ्गम्	९२
गणेशाष्टकम्	७४
च	
चन्द्रमौलीश्वर भुजङ्ग-स्तोत्रम्	४२३
चन्द्रशेखराष्टकम्	२१५

ख्या.
४१५
२१८
२०५
१५८
१७
३३
३७
७२
७४
७
५
२

स्तोत्राणि.	पुटसंख्या.
द	
दक्षिणामूर्त्यष्टकम्	३३१
दक्षिणामूर्तिचतुर्विंशति-वर्णमालास्तोत्रम्	३३६
दक्षिणामूर्तिमानसिक-पूजास्तोत्रम्	४५५
दक्षिणमूर्तिस्तोत्रम्	४६१
दक्षिणामूर्तिनवरत्नमाला-स्तोत्रम्	४४६
दक्षिणामूर्तिस्तोत्रम्	४४८
दशश्लोकीस्तुतिः	३२८
दशश्लोकी	३२५
दारिद्र्यदहनशिवस्तोत्रम्	३५१
द्वादशज्योतिर्लिङ्गस्तोत्रम्	२४६
न	
नटेशपञ्चरत्नम्	५४६
नटेशसहस्रनामस्तोत्रम्	५२५
निर्वाणदशकम्	२५१
निर्वाणषट्कम्	२५६
नीलकण्ठनमश्शिवायाष्ट-कम्	४६५

स्तोत्राणि.	पुटसंख्या.
प	
परमाद्वैतम्	५६२
परमेश्वरस्तुतिः	३९२
पादुकाष्टकम्	५२२
पार्वतीशकरावलम्बस्तोत्रम्	४२८
प्रातस्स्मरणत्रयम्	५१८
ब	
बिल्वाष्टकम्	४३८
म	
मङ्गलश्लोकाः	१
मनीषापञ्चकम्	५२०
महागणपतिस्तोत्रम्	८५
महानन्दीश्वरभुजङ्गस्तोत्रम्	४२२
मार्कण्डेयशिवाष्टकम्	४२०
मुरुकाष्टकम्	५४८
मृत्युञ्जयमानसिकपूजा-स्तोत्रम्	३४१
मेधादक्षिणामूर्तिमन्त्र-वर्णपदस्तुतिः	४४०
य	
यतिपञ्चकम्	५१९

स्तोत्राणि	पृष्ठसंख्या.
व	
वटुकभैरवसहस्रनाम-स्तोत्रम्	३६४
वाक्यवृत्तिः	५६३
विज्ञाननौकाष्टकम्	५०९
विश्वेश्वराष्टकम्	३६२
वेदपादस्तवः	१८२
वेदसारशिवस्तवः	२५०
वेदान्तडिण्डिमः	५५०
श	
शङ्कराष्टकम्	३५३
शिवकेशादिपादान्त-वर्णनस्तोत्रम्	२८०
शिवताण्डवस्तोत्रम् (रावणकृतम्)	२४२
शिवपञ्चाक्षरस्तोत्रम्	२३४
शिवनामावल्यष्टकम्	३२३
शिवपादादिकेशान्तस्तुतिः	२६०
शिवभुजङ्गम्	२२३
शिवस्तुतिः	३९५
शिवस्तुतिः	४१२
शिवमातृकावर्णमाला-स्तोत्रम्	४५२
शिवरक्षास्तोत्रम्	४१५
शिवस्तोत्रम् (उपमन्युकृतम्)	२१८
शिवमहिम्नःस्तोत्रम्	२०५
शिवसहस्रनामस्तोत्रम्	१५८
शिवशङ्कराष्टकम्	४१७
शिवमानसिकपूजास्तोत्रम्	४३३
शिवपञ्चाक्षरीस्तोत्रम्	४३७
शिवमङ्गलाष्टकम्	४७२
शिवनक्षत्रमालिकास्तोत्रम्	४७४
शिवापदानदण्डकस्तोत्रम्	४६७
शिवापराधक्षमापण-स्तोत्रम्	२३६
शिवानन्दलहरी	२९५
शिवाष्टोत्तरशतनाम-स्तोत्रम्	१५५
श्रीविश्वेश्वरषोडशनाम स्तोत्रम्	२
श्रीविश्वेश्वराष्टोत्तरशत-नामस्तोत्रम्	३
श्रीशङ्कराचार्याष्टोत्तरशत-नामस्तोत्रम्	४७८

स्तोत्राणामकाद्यनुक्रमणिका

स्तोत्राणि.	पृष्ठसंख्या.
श्रीविद्यारण्य्येश्वरशत-नामस्तोत्रम्	४८२
श्रीमच्छङ्करभगवच्चरण-स्तुत्यष्टकम्	४८९
श्रीशिवनवरत्नस्तवः	५०१
श्रीशिवप्रतिपादनस्तोत्रम्	५०३
श्रीशयद्दुस्तुतिजगद्गुरु-वृत्ताष्टकम्	५०६
सुकाष्टकम्	५१४
स	
सङ्कटनाशनगणेशस्तोत्रम्	७२
साधनपञ्चकम्	५१२
सुब्रह्मण्याष्टोत्तरशतनाम-स्तोत्रम्	९५
सुब्रह्मण्यसहस्रनामस्तोत्रम्	९८
सुब्रह्मण्याष्टकम्	१२०
सुब्रह्मण्यभुजङ्गप्रयातम्	१२३
सुब्रह्मण्यस्तोत्रम्	१२९
सुब्रह्मण्यषोडशनाम-स्तोत्रम्	१३६
सुवर्णमालास्तुतिः	३५५
सूर्याष्टकम्	३८८
सूर्यार्यास्तोत्रम्	३९०
स्कन्दलहरी	१३१
स्कन्दवेदपादस्तवः	१३८

(समुदितस्तोत्राणि-१०४)



॥ बृहत्स्तोत्ररत्नाकरः ॥

[प्रथमभागः]

॥ मङ्गळश्लोकाः ॥

स जयति सिन्धुरवदनो देवो यत्पादपङ्कजस्मरणम् ।
वासरमणिरिव तमसां राशीन्नाशयति विघ्नानाम् ॥ १
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ २
व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥ ३
व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ ४
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अफाललोचनः शम्भुः भगवान्बादरायणः ॥ ५

॥ श्रीविघ्नेश्वरषोडशनामस्तोत्रम् ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ॥ १
धूम्रकेतुर्गणाध्यक्षः फालचन्द्रो गजाननः ।
वक्रतुण्डश्शूर्पकर्णो हेरम्बस्स्कन्दपूर्वजः ॥ २
षोडशैतानि नामानि यः पठेच्छृणुयादपि ।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ॥ ३

॥ श्रीविघ्नेश्वरषोडशनामस्तोत्रं समाप्तम् ॥

॥ श्रीविघ्नेश्वराष्टोत्तरशतनामस्तोत्रम् ॥

विनायको विघ्नराजो गौरीपुत्रो गणेश्वरः ।
स्कन्दाग्रजोऽव्ययः पूतो दक्षोऽध्यक्षो द्विजप्रियः ॥
अग्निगर्भच्छिदिन्द्रश्रीप्रदो वाणीप्रदोऽव्ययः ।
सर्वसिद्धिप्रदश्शर्वतनयश्शर्वरीप्रियः ॥ २
सर्वात्मकस्सृष्टिकर्ता देवोऽनेकार्चितश्शिवः ।
शुद्धो बुद्धिप्रियश्शान्तो ब्रह्मचारी गजाननः ॥ ३
द्वैमातेयो मुनिस्तुत्यो भक्तविघ्नविनाशनः ।
एकदन्तश्चतुर्बाहुश्चतुरश्शक्तिसंयुतः ॥ ४
लम्बोदरश्शूर्पकर्णो हरिर्ब्रह्मविदुत्तमः ।
कालो ग्रहपतिः कामी सोमसूर्याग्निलोचनः ॥ ५
पाशाङ्कुशधरश्चण्डो गुणातीतो निरञ्जनः ।
अकल्मषस्स्वयंसिद्धस्सिद्धार्चितपदाम्बुजः ॥ ६
बीजपूरफलासक्तो वरदश्शाश्वतः कृती ।

द्विजप्रियो वीतभयो गदी चक्रीक्षुचापधृत् ॥ ७
श्रीदोऽज उत्पलकरश्रीपतिः स्तुतिहर्षितः ।
कुलाद्रिभेत्ता जटिलः कलिकल्मषनाशनः ॥ ८
चन्द्रचूडामणिः कान्तः पापहारी समाहितः ।
आश्रितश्रीकरस्सौम्यो भक्तवाञ्छितदायकः ॥ ९
शान्तः कैवल्यसुखदस्सच्चिदानन्दविग्रहः ।
ज्ञानी दयायुतो दान्तो ब्रह्मद्वेषविवर्जितः ॥ १०
[illegible]
रमार्चितो विधिर्नागराजयज्ञोपवीतवान् ॥ ११
स्थूलकण्ठः स्वयं कर्ता सामघोषप्रियः परः ।
स्थूलतुण्डोऽग्रणीर्धीरो वागीशस्सिद्धिदायकः ॥ १२
दूर्वाबिल्वप्रियोऽव्यक्तमूर्तिरद्भुतमूर्तिमान् ।
शैलेन्द्रतनुजोत्सङ्गखेलनोत्सुकमानसः ॥ १३
स्वलावण्यसुधासारजितमन्मथविग्रहः ।
समस्तजगदाधारो मायी मूषकवाहनः ॥ १४

हृष्टस्तुष्टः प्रसन्नात्मा सर्वसिद्धिप्रदायकः ।
अष्टोत्तरशतेनैवं नाम्नां विघ्नेश्वरं विभुम् ॥ १५
तुष्टाव शङ्करः पुत्रं त्रिपुरं हन्तुमुद्यतः ।
यः पूजयेदनेनैव भक्त्या सिद्धिविनायकम् ॥ १६
दूर्वादलैर्बिल्वपत्रैः पुष्पैर्वा चन्दनाक्षतैः ।
सर्वान्कामानवाप्नोति सर्वविघ्नैः प्रमुच्यते ॥ १७

इति श्रीभविष्योत्तरपुराणे
॥ विघ्नेश्वराष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ गणपतिसहस्रनामस्तोत्रम् ॥

गणेश्वरो गणक्रीडो गणनाथो गणाधिपः ।
एकदंष्ट्रो वक्रतुण्डो गजवक्त्रो महोदरः ॥ १
लम्बोदरो धूम्रवर्णो विकटो विघ्ननायकः ।
सुमुखो दुर्मुखो बुद्धो विघ्नराजो गजाननः ॥ २
भीमः प्रमोद आनन्दो सुरानन्दो मदोत्कटः ।
हेरम्बश्शम्बरश्शम्भुर्लम्बकर्णो महाबलः ॥ ३
नन्दनोऽलम्पटो भीमो मेघनादो गणञ्जयः ।
विनायको विरूपाक्षो धीरश्शूरो वरप्रदः ॥ ४
महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः ।
रुद्रप्रियो गणाध्यक्षो उमापुत्रोऽघनाशनः ॥ ५
कुमारगुरुरीशानपुत्रो मूषकवाहनः ।
सिद्धिप्रदः सिद्धिपतिस्सिद्धिसिद्धिविनायकः ॥ ६
विघ्नस्तुन्नमुजस्सिद्धवाहनो मोहिनीप्रियः ।

कटिङ्कटो राजपुत्रश्शकलस्सम्मितोऽमितः ॥ ७
कूष्माण्डगणसम्भूतो दुर्जयो धूर्जयोऽजयः ।
भूपतिर्भुवनेशश्च भूतानां पतिरव्ययः ॥ ८
विश्वकर्ता विश्वमुखो विश्वरूपो निधिर्घृणिः ।
कविः कवीनामृषभो ब्रह्मण्यो ब्रह्मणस्पतिः ॥ ९
ज्येष्ठराजो निधिपतिः निधिप्रियपतिप्रियः ।
हिरण्मयपुरान्तस्थः सूर्यमण्डलमध्यगः ॥ १०
कराहतिध्वस्तसिन्धुसलिलः पूषदन्तभृत् ।
उमाङ्ककेलिकुतुकी मुक्तिदः कुलपालकः ॥ ११
किरीटी कुण्डली हारी वनमाली मनोमयः ।
वैमुख्यहृतदृश्यश्रीः पादाहत्याजितक्षितिः ॥ १२
सद्यो जातः स्वर्णभुजः मेखली दुर्निमित्तहृत् ।
दुस्स्वप्नहृत्प्रहसनो गुणी नादप्रतिष्ठितः ॥ १३
सुरूपस्सर्वनेत्राधिवासो वीरासनाश्रयः ।
पीताम्बरः खड्गधरो खण्डेन्दुकृतशेखरः ॥ १४

चित्राङ्गश्यामदशनो फालचन्द्रश्चतुर्भुजः ।
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः ॥ १५
गणाधिराजो विजयस्थिरो गणपतिर्ध्वजी ।
देवदेवः स्मरप्राणदीपको वायुकीलकः ॥ १६
विपश्चिद्वरदो नादो नादभिन्नबलाहकः ।
वराहवदनो मृत्युञ्जयो व्याघ्राजिनांबरः ॥ १७
इच्छाशक्तिधरो देवत्राता दैत्यविमर्दनः ।
शम्भुवक्त्रोद्भवश्शम्भुकोपहा शम्भुहास्यभूः ॥ १८
शम्भुतेजादिसुखाशोकहारी गौरीसुखावहः ।
उमाङ्गमलजो गौरीतेजोभूस्वर्धुनीभवः ॥ १९
यज्ञकायो महानादो गिरिवर्षं शुभाननः ।
सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्छ्रुतिः ॥ २०
ब्रह्माण्डकुम्भश्चिद्व्योमफालस्स्त्यशिरोरुहः ।
जगज्जन्मलयोन्मेषनिमेषोऽमर्पकसोमहृक् ॥ २१
गिरीन्द्रैकरदो धर्मो धर्मिष्ठः सामबृंहितः ।

प्रहर्षदशनो वाणीजिह्वो वासवनासिकः ॥ २२
कुलाचलांसस्सोमार्कघण्टो रुद्रशिरोधरः ।
नदीनदभुजस्सर्पाङ्गुलिकस्तारकानखः ॥ २३
भ्रूमध्यसंस्थितकरो ब्रह्मविद्यामदोत्कटः ।
व्योमनाभः श्रीहृदयो मेरुपृष्ठोऽर्णवोदरः ॥ २४
कुक्षिस्थयक्षगन्धर्वरक्षः किन्नरमानुषः ।
पृथ्वीकटिस्सृष्टिलिङ्गः शैलोरुदस्रजानुकः ॥ २५
पातालजङ्घो मुनिपत्कालाङ्घ्रिस्त्रयीतनुः ।
ज्योतिर्मण्डललाङ्गूलो हृदयालाननिश्चलः ॥ २६
हृत्पद्मकर्णिकाशायी वियत्केलिसरोरुहः ।
सद्भक्तध्याननिगळो पूजावारिनिवारितः ॥ २७
प्रतापी काश्यपसुतः गणपो विटपी बली ।
यशस्वी धार्मिकस्त्वोजाः प्रमथः प्रमथेश्वरः ॥ २८
चिन्तामणिद्वीपपतिः कल्पद्रुमवनालयः ।
रत्नमण्डपमध्यस्थो रत्नसिंहासनाश्रयः ॥ २९

वीताशिरोधृतपदो ज्वालिनीमौलिलालितः ।
चन्द्रानन्दितपीठश्रीः भोगदाभूषितासनः ॥ ३०
सकामदायिनीपीठः क्षुरदुग्रासनाश्रयः ।
वेजोवतीशिरोरत्नसत्यानित्यवतंसितः ॥ ३१
सविघ्ननाशिनीपीठस्सर्वशक्त्यम्बुजालयः ।
लिपिपद्मासनाधारो वह्निषामत्रयालयः ॥ ३२
उन्नतप्रपदो गूढगुल्फसंवृतपार्ष्णिकः ।
पीनजङ्घोश्लिष्टजानुः स्थूलरूपो नमत्कटिः ॥ ३३
विग्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः ।
पीनस्कन्धो कम्बुकण्ठो लम्बोष्ठो लम्बनासिकः ॥
मग्नवामरदस्तुङ्गदक्षदंतो महाहनुः ।
ह्रस्वनेत्रत्रयश्शूर्पकर्णो निबिडमस्तकः ॥ ३५
ह्रस्वकाकारकुम्भाग्रो रत्नमौलिर्निरङ्कुशः ।
सर्पहारकटीसूत्रस्सर्पयज्ञोपवीतवान् ॥ ३६
सर्पकोटीरकटकः सर्पप्रैवेयकाङ्गदः ।

सर्पकक्षोदरावन्धः सर्पराजोत्तरीयकः ॥ ३७
रक्तरक्तांबरधरो रक्तमाल्यविभूषणः ।
रक्तेक्षणो रक्तकरो रक्तताल्वोष्ठपल्लवः ॥ ३८
श्वेतश्वेताम्बरधरः श्वेतमाल्यविभूषणः ।
श्वेतातपत्ररुचिरश्श्वेतचामरवीजितः ॥ ३९
सर्वावयवसंपूर्णस्सर्वलक्षणलक्षितः ।
सर्वाभरणभूषाढ्यस्सर्वशोभासमन्वितः ॥ ४०
सर्वमङ्गळमाङ्गळ्यस्सर्वकारणकारणः ।
सर्वदैककरश्शार्ङ्गीबीजपूरगदाधरः ॥ ४१
इक्षुचापधरश्शूली चक्रपाणिस्सरोजभृत् ।
पाशी धृतोत्पलश्शालीमञ्जरीभृत्स्वदन्तभृत् ॥ ४२
कल्पवल्लीधरो विश्वाभयदैककरो वशी ।
अक्षमालाधरो ज्ञानमुद्रावान्मुद्गरायुधः ॥ ४३
पूर्णपात्री कम्बुधरो विधूतारिसमूहकः ।
मातुलुङ्गधरश्चूतकलिकाभृत्कुठारवान् ॥ ४४
पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः ।

भारतीसुन्दरीनाथो विनायकरतिप्रियः ॥ ४५
महालक्ष्मीप्रियतमः सिद्धलक्ष्मीमनोहरः ।
रमारमेशपूर्वाङ्गो दक्षिणोमामहेश्वरः ॥ ४६
महीवराहवामाङ्गो रतिकन्दर्पपश्चिमः ।
आमोद मोदजननस्सप्रमोदप्रमोदनः ॥ ४७
समेधितसमृद्धश्रीः बुद्धिसिद्धिप्रवर्तकः ।
दत्तसौमुख्यसुमुखः कान्तिकन्दलिताश्रयः ॥ ४८
मदनावत्याश्रिताङ्घ्रिः कृतवैमुख्यदुर्मुखः ।
विघ्नसम्पल्लवोपघ्नः सदोन्निद्रमदद्रवः ॥ ४९
विघ्नकृन्निघ्नचरणो द्राविणीशक्तिसत्कृतः ।
सीत्काप्रसन्ननयनो ज्वालिनीपालनैकदृक् ॥ ५०
मोहिनीमोहनो भोगदायिनीकान्तिमण्डितः ।
कामिनीकान्तवक्त्रश्रीरधिष्ठितवसुन्धरः ॥ ५१
वसुधारा मनोमोद महाशङ्खनिधिप्रभुः ।
नमद्वसुमतीमौलिमहापद्मनिधिप्रभुः ॥ ५२

सर्वैरुद्दुरुसंसेव्यश्शोचिष्केशहृदाश्रयः ।
ईशानमूर्धा देवेन्द्रशिखः पवननन्दनः ॥ ५३
उग्रः प्रत्यग्रनयनो दिव्यास्त्राणां प्रयोगवान् ।
ऐरावतादिसर्वाशावारणावरणप्रियः ॥ ५४
वज्राद्यस्त्रपरीवारो गणचण्डसमाश्रयः ।
जयो जयपरीवारो विजयो विजयावहः ॥ ५५
अजितार्चितपादाब्जः नित्यानित्यवर्तसितः ।
विलासिनीकृतोल्लासश्शौण्डी सौन्दर्यमण्डितः ॥ ५६
अनन्तानन्तसुखदस्सुमङ्गळसुमङ्गळः ।
इच्छाशक्तिर्ज्ञानशक्तिक्रियाशक्तिनिषेवितः ॥ ५७
सुभगासंश्रितपदः ललितालालिताश्रयः ।
कामिनीकामनः कामः मानिनीकेळिलालितः ॥ ५८
सरस्वत्याश्रयो गौरीनन्दनः श्रीनिकेतनः ।
गुरुगुप्तपदो वाचा सिद्धो वागीश्वरेश्वरः ॥ ५९
नळिनीकामुको वामारामाज्येष्ठामनोरमः ।

रौद्रीमुद्रितपादाब्जःहुम्बीजस्तुङ्गशक्तितः ॥ ६०
विश्वादिजननत्राणः स्वाहाशक्तिस्सकीलकः ।
अमृताब्धिकृतावासः मदघूर्णितलोचनः ॥ ६१
उच्छिष्टगण उच्छिष्टगणेशो गणनायकः ।
सार्वकालिकसंसिद्धिः नित्यशैवदिगम्बरः ॥ ६२
अनपायोऽनन्तदृष्टिरप्रमेयोऽजरामरः ।
अनाविलोऽप्रतिरथो अच्युतोऽमृताक्षरः ॥ ६३
अप्रतर्क्योऽक्षयोऽजय्यो अनाथश्च अनामयः ।
अमोघसिद्धिरद्वैतो अघोरोऽप्रतिमाननः ॥ ६४
अनाकारोऽभिमून्यग्निबलहा व्यक्तलक्षणः ।
आधारपीठ आधार आधाराधेयवर्जितः ॥ ६५
आखुवाहन केत्वाशापूरकाखुमहारणः ।
इक्षुसागरमध्यस्थः इक्षुभक्षणलालसः ॥ ६६
इक्षुचापातिरेकश्रीः इक्षुचापनिषेवितः ।
इन्द्रगोपसमानश्रीः इन्द्रनीलसमद्युतिः ॥ ६७

इन्दीवरदलश्यामः इन्दुमण्डलनिर्मलः ।
इन्द्रप्रिय इडाभाग इडाधामेन्दिराप्रियः ॥ ६८
इक्ष्वाकुविघ्नविध्वंसी इति कर्तव्यतेप्सितः ।
ईशानमौलिरीशान ईशानसुत ईशधः ॥ ६९
ईषणात्रयकल्पान्तः ईहामात्रविवर्जितः ।
उपेन्द्र उडुभृन्मौलि रुडेरकबलिप्रियः ॥ ७०
उन्नतानन उत्तुङ्ग उदारस्त्रिदशाग्रणीः ।
ऊर्जस्वानुज्ज्वलतनुः ऊहापोहदुरासदः ॥ ७१
ऋग्यजुस्सामसम्भूतिऋद्धिसिद्धिप्रवर्तकः ।
ऋजुचित्तैकसुलभः ऋणत्रयविमोचनः ॥ ७२
स्वभक्तविघ्ननाशश्च सुरद्विट्छक्तिलोपकृत् ।
विमुखार्चानाविलुप्तश्रीं लृतावित्स्फोटनाशनः ॥ ७३
एकारपीठमध्यस्थ एकपादकृतासनः ।
एजिताखिलदैत्यश्रीः एजिताखिलसंश्रयः ॥ ७४
ऐश्वर्यनिधिरैश्वर्यऐहिकामुष्मिकप्रदः ।
ऐरंमदसमोन्मेष ऐरावतनिभाननः ॥ ७५

ओङ्कारवाच्य ओङ्कार ओजस्वानोषधीपतिः ।
औदार्यनिधिरौद्धत्यधुर्य औन्नत्यविग्रहः ॥ ७६
सुरनागानामङ्कुशश्च सुरविद्विषामङ्कुशः ।
असमसविसर्गांतपादेषु परिकीर्तितः ॥ ७७
कपर्दकुधरः कल्पः कपर्दी कलभाननः ।
कर्मसाक्षी कर्मकर्ता कर्माकर्मफलप्रदः ॥ ७८
कदम्बकोरकाकारः कूटमाण्डगणनायकः ।
काकुण्य देहकपिलः कथकः कटिसूत्रभृत् ॥ ७९
खर्वः खड्गप्रियः खड्गी खातान्तस्थः खनिर्मलः ।
खर्वोटश्चक्रनिलयः खट्वाङ्गी खदुरासदः ॥ ८०
गणाढ्यो गह्नो गम्यो गद्यपद्यसुधार्णवः ।
गद्यगानप्रियो गर्जः गीर्वाणार्णपूर्वजः ॥ ८१
गुणाधारस्तो गुप्तः गुणागमनिरूपितः ।
गुह्याशयो गुहाविष्टो गुरुगम्यो गुरोर्गुरुः ॥ ८२
घण्टाघर्घरिकामाली घण्टकुम्भो घटोदरः ।
चण्डश्चण्डीश्वरश्चण्डी चण्डेशश्चण्डविक्रमः ॥ ८३

चराचरपिता चिन्तामणिचर्वणलालसः ।
छन्दश्छन्दोवपुश्छन्दो दुर्लक्ष्यश्छन्दविग्रहः ॥ ८४
जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः ।
जपो जपपरो जप्यो जिह्वासिंहासनप्रभुः ॥ ८५
झलज्झलोलसद्दानझङ्कारिभ्रमराकुलः ।
टङ्कारस्फारसंरावानुकारिमणिनूपुरः ॥ ८६
तापत्रयनिवारी च सर्वमन्त्रैकसिद्धिदः ।
डिण्डिमुण्डो डाकिनीशो डामरो डिण्डिमप्रियः ॥
ढक्कानिनादमुदितो ढौको ढुण्ढिविनायकः ।
तत्त्वानां परमस्तत्त्वज्ञेयस्तत्त्वनिरूपितः ॥ ८८
तारकान्तरसंस्थानस्तारकस्तारकान्तकः ।
स्थाणुः स्थाणुप्रियः स्थाता स्थावरो जङ्गमो जगत् ॥
दक्षयज्ञप्रमथनो दाता दानवमोहनः ।
दयावान्दिव्यविभवो दण्डहृद्दण्डनायकः ॥ ९०
दन्तप्रभिन्नाभ्रमलो दैत्यवारणदारणः ।
धृष्टाट्टालप्रद्विपघटो देवार्थं नृगजाकृतिः ॥ ९१

धनधान्यपतिर्धन्यो धनदो धरणीधरः ।
ध्यानैकप्रकटो ध्येयः ध्यानो ध्यानपरायणः ॥ ९३
नन्दो नन्दिप्रियो नादो नदमध्यप्रतिष्ठितः ।
निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः ॥
परंज्योमा परन्धामा परमात्मा परम्पदः ।
परात्परः पशुपतिः पूर्णमोदकसारवान् ॥ ९४
पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः ।
पद्मप्रसन्ननयनः प्रणताज्ञानमोचनः ॥ ९५
प्रमाणप्रत्ययातीतः प्रणतार्तिनिवारणः ।
फलहस्तः फणिपतिः फेत्कारफणितप्रियः ॥ ९६
बाणार्चिताङ्घ्रियुगलो बाणकेलिकुतूहली ।
ब्रह्मा ब्रह्मार्चितपरो ब्रह्मचारी बृहस्पतिः ॥ ९७
बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः ।
बृंहणादिप्रभचीत्कारो ब्रह्माण्डावलिमेखलः ॥ ९८
भूतेशभक्तसुलभो भर्गो भद्रो भयापहः ।
भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः ॥ ९९

भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः ।
मन्त्रो मन्त्रपतिर्मन्त्री मदमत्तमनोरमः ॥ १००
मेखलावान्मन्दगतिः मतिमत्कमलेक्षणः ।
महाबलो महावीरो महाप्राणमहामनाः ॥ १०१
यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः ।
यशस्करो योगगम्यो याज्ञिको याजकप्रियः ॥१०२
रसो रसप्रियो रस्यो रञ्जको रावणार्चितः ।
रक्षोरक्षाकरो रत्नगर्भो राज्यसुखप्रदः ॥ १०३
लक्षो लक्षप्रदो लक्ष्यो लयस्थो लड्डुकप्रियः ।
लास्यप्रियो लास्यपदो लाभकृल्लोकविश्रुतः ॥ १०४
वरेण्यो वह्निवदनो वन्द्यो वेदान्तगोचरः ।
विकर्ता विश्वतश्चक्षुः विधाता विश्वतोमुखः ॥१०५
वामदेवो विश्वनेता वज्री वज्रनिवारणः ।
विश्वबन्धन विष्कम्भधारो विश्वामरप्रभुः ॥ १०६
शब्दब्रह्म शमप्राप्यो शम्भुशक्ति गणेश्वरः ।
शास्ताशिखाग्रनिलयो शरण्यः शिखरीश्वरः ॥ १०७

षड्ऋतुकुसुमस्रग्वी षडाधारः षडक्षरः ।
संसारवैद्यस्सर्वज्ञः सर्वभेषजभेषजः ॥ १०८
सृष्टिस्थितिलयक्रीडस्मरकुञ्जरभेदनः ।
सिन्दूरितमहाकुम्भस्सदसद्वशक्तिदायकः ॥ १०९
साक्षी समुद्रमथनः स्वसंवेद्यः स्वदक्षिणः ।
स्वतन्त्रस्सत्यसङ्कल्पस्सामगानरतस्सुखी ॥ ११०
हंसो हस्तिपिशाचीशो हवनो हव्यकव्यभुक् ।
हव्यो हूतप्रियो हर्षो हृल्लेखामन्त्रमध्यगः ॥ १११
क्षेत्राधिपः क्षमाभर्ता क्षमापरपरायणः ।
क्षिप्रक्षेमकरः क्षेमानन्दः क्षोणीसुरद्रुमः ॥ ११२
धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्धनः ।
विद्याप्रदो विभवदो भुक्तिमुक्तिफलप्रदः ॥ ११३
आभिरूप्यकरो वीरश्रीप्रदो विजयप्रदः ।
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ॥ ११४
मेधादः कीर्तिदश्शोकहारी दौर्भाग्यनाशनः ।
प्रतिवादिमुखस्तम्भो दुष्टचित्तप्रसादनः ॥ ११५

पराभिचारशमनो दुःखभञ्जनकारकः ।
लवस्त्रुटिः कला काष्ठा निमेषो घटिमुहूर्तकः ॥ ११६
प्रहरश्च दिवा नक्तः अहोरात्र अहर्निशम् ।
पक्षो मासायनो वर्षः युगः कल्पो महालयः ॥
राशिस्तारातिथिर्योगः वारः करण अंशकः ।
लग्नो होरा कालचक्रो मेरुस्सप्तर्षयो ध्रुवः ॥ ११८
राहुर्मन्दः कविर्जीवः बुधो भौमश्शशी रविः ।
कालः सृष्टिस्थितिर्विश्वः स्थावरो जङ्गमो जगत् ॥
भूरापोग्निर्मरुद्व्योमा अहंकृत्प्रकृतिः पुमान् ।
ब्रह्मा विष्णुरिशवो रुद्रईशशक्तिस्सदाशिवः ॥ १२०
त्रिदशाः पितरस्सिद्धा यक्षा रक्षाश्च किन्नराः ।
साध्या विद्याधरा भूताः मनुष्याः पशवः खगाः ॥
समुद्रास्सरितश्शैलाः भूतो भव्यो भवोद्भवः ।
साङ्ख्यः पातञ्जलो योगः पुराणश्च श्रुतिः स्मृतिः ॥
वेदाङ्गाश्च सदाचारः मीमांसा न्यायविस्तरः ।
आयुर्वेदो धनुर्वेदो गान्धर्वः काव्यनाटकः ॥ १२३

वैखानसो भागवतो मानुषः पाञ्चरात्रकः ।
शैवः पाशुपतः कालमुखो भैरवशासनः ॥ १२५
शाक्तो वैनायकस्सौरो जैनघूर्हतसंहितः ।
सदसद्व्यक्त अव्यक्तस्सचेतन अचेतनः ॥ १२६
बन्धो मोक्षस्सुखो भोगो योगस्सत्य अणुर्महत् ।
स्वस्ति हुंरूपषड्रूपखड्गभूश्च स्वधामयः ॥ १२६
स्वाहारूपः षौषट्रूपो वौषड्रूपो वषण्मयः ।
ज्ञानविज्ञान आनन्दो बोधस्संविच्छमो यमः ॥
एको एकाक्षरो एक एकाक्षरपरायणः ।
एकाग्रधीरेकवीरो एकानेकस्वरूपधृत् ॥ १२८
द्विरूपो द्विभुजो व्यक्षो द्विरदो द्विपरक्षकः ।
द्वैमातुरद्विपदनो द्वन्द्वातीतो द्वयातिगः ॥ १२९
त्रिधामा त्रीकरस्त्रेता त्रिवर्गफलदायकः ।
त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः ॥१३०
चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्मुखः ।
चतुर्विधोपायकरश्चतुर्विधफलप्रदः ॥ १३१

चतुराननसम्प्रीतः चतुर्वर्णाश्रमाश्रयः ।
चतुर्विधवचोवृत्ति परिवृत्तिप्रवर्तकः ॥ १३२
चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसम्भवः ।
पञ्चाक्षरात्मा पञ्चात्मा पञ्चास्यः पञ्चकृत्यकृत् ॥
पञ्चाधारः पञ्चवर्णः पञ्चाक्षरपरायणः ।
पञ्चताळः पञ्चकरः पञ्चप्रणवभाविकः ॥ १३४
पञ्चब्रह्ममयस्फूर्तिः पञ्चावरणवारितः ।
पञ्चभक्ष्यप्रियः पञ्चबाणः पञ्चशिवात्मकः ॥ १३५
षट्कोणपीठषट्चक्रधामा षड्ग्रन्थिभेदकः ।
षडध्वध्वान्तविध्वंसी षडङ्गुलमहाह्रदः ॥ १३६
षण्मुखः षण्मुखभ्राता षट्शक्तिपरिवारितः ।
षड्वैरिवर्गविध्वंसी षड्ऊर्मिभयभञ्जनः ॥ १३७
षट्तर्कदूरषट्कर्मनिरतः षड्रसाश्रयः ।
सप्तपातालचरणः सप्तद्वीपोरुमण्डितः ॥ १३८
सप्तस्वर्लोकमकुटस्सप्तसप्तिवरप्रदः ।

सप्ताङ्गराज्यसुखदस्सप्तर्षिगणमण्डितः ॥ १३९
सप्तछन्दोनिधिस्सप्तहोता सप्तस्वराश्रयः ।
सप्ताब्धिकेळिकासारस्सप्तमातृनिषेवितः ॥ १४०
सप्तच्छदामोदमदस्सप्तच्छन्दोमुखप्रियः ।
अष्टमूर्तिर्ध्येयमूर्तिरष्टप्रकृतिकारणः ॥ १४१
अष्टाङ्गयोगफलभुगष्टपत्राम्बुजाननः ।
अष्टशक्तिसमृद्धश्रीरष्टैश्वर्यप्रदायकः ॥ १४२
अष्टपीठोपपीठश्रीरष्टमातृसमावृतः ।
अष्टभैरवसेव्योऽष्टवसुवन्द्योऽष्टमूर्तिभृत् ॥ १४३
अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रियः ।
नवनागासनाध्यासी नवनिध्यनुशासिता ॥ १४४
नवद्वारपुराधारो नवधारनिकेतनः ।
नरनारायणस्तुत्यो नवदुर्गानिषेवितः ॥ १४५
नवनाथमहानाथो नवनागविभूषणः ।
नवरत्नविचित्राङ्गो नवशक्तिशिरोधृतः ॥ १४६
दशात्मको दशभुजो दशदिक्पतिवन्दितः ।

दशाध्यायो दशप्राणो दशेन्द्रियनियामकः ॥ १४७
दशाक्षरमहामन्त्रो दशाशाव्यापिविग्रहः ।
एकादशादिरुद्रैस्संस्तुत एकादशाक्षरः ॥ १४८
द्वादशोद्दण्डदोर्दण्डो द्वादशाङ्गनिकेतनः ।
त्रयोदशभिधाभिन्नविश्वेदेवाधिदैवतः ॥ १४९
चतुर्दशेन्द्रप्रभवश्चतुर्दशमनुप्रभुः ।
चतुर्दशादिविद्याढ्यश्चतुर्दशजगत्प्रभुः ॥ १५०
सामपञ्चदशः पञ्चदशीशीतांशुनिर्मलः ।
षोडशाधारनिलयः षोडशस्वरमातृकः ॥ १५१
षोडशान्तपदावासः षोडशेन्दुकळात्मकः ।
सप्तसप्तदशी सप्तदशस्सप्तदशाक्षरः ॥ १५२
अष्टादशद्वीपपतिरष्टादशपुराणकृत् ।
अष्टादशौषधिस्रष्टा अष्टादशमुनिस्मृतः ॥ १५३
अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः ।
एकविंशः पुमानेकविंशत्यङ्गुलिपल्लवः ॥ १५४
चतुर्विंशतितत्त्वात्मा पञ्चविंशाख्यपूरुषः ।

सप्तविंशतिवारेशस्सप्तविंशतियोगकृत् ॥ १५५
त्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः ।
षट्त्रिंशत्तत्त्वसम्मूर्तिरष्टत्रिंशत्कळातनुः ॥ १५६
नवैकोनपञ्चाशन्मरुद्वर्गनिरर्गळः ।
पञ्चाशदक्षरश्रेणिः पञ्चाशद्रुद्रविग्रहः ॥ १५७
पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृकालयः ।
त्रिपञ्चाशद्वपुश्श्रेणिस्त्रिषष्टयक्षरसंश्रयः ॥ १५८
चतुष्षष्टयर्णनिर्णेता चतुष्षष्टिकळानिधिः ।
चतुष्षष्टिमहासिद्धयोगिनीवृन्दवन्दितः ॥ १५९
अष्टषष्टिमहातीर्थक्षेत्रभैरवभावनः ।
चतुर्नवतिमन्त्रात्मा षण्णवत्यधिकप्रभुः ॥ १६०
शतानन्दश्शतमखश्शतपत्रायतेक्षणः ।
शतानीकश्शतधृतश्शतधारवरायुधः ॥ १६१
सहस्रपत्रनिलयस्सहस्रफणिभूषणः ।
सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् ॥ १६२
सहस्रनामसंस्तुत्यस्सहस्राक्षबलापहः ।

फणामण्डलसाहस्रफणिराजकृतासनः ॥ १६३
दशसाहस्रफणभृत्फणिराजकृतासनः ।
अष्टाशीतिसहस्रौघमहर्षिस्तोत्रयन्त्रितः ॥ १६४
महाकायो महात्मापि चण्डिलश्रेष्ठदो रसः ।
आधारोऽसौ वेदमयो हेरम्बस्स्कन्दपूर्वजः ॥ १६५
लक्षाधीशप्रियाधारो लक्षाधारमनोमयः ।
चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः ॥ १६६
चतुराशीतिलक्षाणां जीवानां देहसंस्थितः ।
कोटिसूर्यप्रतीकाशः कोटिचन्द्रांशुनिर्मलः ॥ १६७
कोटियज्ञप्रमथनः कोटियज्ञफलप्रदः ।
शिवाभवाद्यष्टकोटिविनायकधुरन्धरः ॥ १६८
सप्तकोटिमहामन्त्रमन्त्रितावयवद्युतिः ।
त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ॥ १६९
अनन्तदेवतासेव्यः अनन्तश्रुभदायकः ।
अनन्तनामानन्तश्रीरनन्तानन्तसौख्यदः ॥ १७०

॥ इति श्रीमहागणपतिसहस्रनामस्तोत्रं समाप्तम् ॥

॥ गणेशकवचम् ।

गौर्युवाच—

एषोऽतिचपलो दैत्यान्बाल्येऽपि नाशयत्यहो ।
अग्रे किं कर्म कर्तेति न जाने मुनिसत्तम ॥ १

दैत्या नानाविधा दुष्टाः साधुदेवद्रुहः खलाः ।
अतोऽस्य कंठे किंचित्त्वं रक्षार्थं बद्धुमर्हसि ॥ २

मुनिरुवाच—

ध्यायेत्सिंहगतं विनायकममुं दिग्बाहुमाद्ये युगे
त्रेतायां तु मयूरवाहनममुं षड्बाहुकं सिद्धिदम् ।
द्वापरे तु गजाननं युगभुजं रक्ताङ्गरागं विभुं
तुर्ये तु द्विभुजं सिताङ्गरुचिरं सर्वार्थदं सर्वदा ॥ ३

विनायकः शिखां पातु परमात्मा परात्परः ।
अतिसुन्दरकायस्तु मस्तकं सुमहोत्कटः ॥ ४

ललाटं कश्यपः पातु भ्रूयुगं तु महोदरः ।
नयने कमलचन्द्रस्तु गजास्यस्त्वोष्ठपल्लवौ ॥ ५

जिह्वां पातु गणक्रीडश्चिबुकं गिरिजासुतः ।
वाचं विनायकः पातु दन्तान्रक्षतु दुर्मुखः ॥ ६
श्रवणौ पाशपाणिस्तु नासिकां चिन्तितार्थदः ।
गणेशस्तु मुखं कण्ठं पातु देवो गणञ्जयः ॥ ७
स्कन्धौ पातु गजस्कन्धः स्तनौ विघ्नविनाशनः ।
हृदयं गणनाथस्तु हेरम्बो जठरं महान् ॥ ८
धराधरः पातु पार्श्वौ पृष्ठं विघ्नहरः शुभः ।
लिङ्गं गुह्यं सदा पातु वक्रतुण्डो महाबलः ॥ ९
गणक्रीडो जानुजङ्घे ऊरू मङ्गलमूर्तिमान् ।
एकदन्तो महाबुद्धिः पादौ गुल्फौ सदाऽवतु ॥ १०
क्षिप्रप्रसादनो बाहू पाणी आशाप्रपूरकः ।
अङ्गुलीश्च नखान्पातु पद्महस्तोऽरिनाशनः ॥ ११
सर्वाङ्गानि मयूरेशो विश्वव्यापी सदाऽवतु ।
अनुक्तमपि यत्स्थानं धूम्रकेतुः सदाऽवतु ॥ १२
आमोदस्त्वग्रतः पातु प्रमोदः पृष्ठतोऽवतु ।

प्राच्यां रक्षतु बुद्धीश आग्नेय्यां सिद्धिदायकः ॥
दक्षिणस्यामुमापुत्रो नैर्ऋत्यां तु गणेश्वरः ।
प्रतीच्यां विघ्नहर्ताव्याद्वायव्यां गजकर्णकः ॥ १४
कौबेर्यां निधिपः पायादीशान्यामीशनन्दनः ।
दिवाऽव्यादेकदन्तस्तु रात्रौ सन्ध्यासु विघ्नहृत् ॥
राक्षसासुरवेतालग्रहभूतपिशाचतः ।
पाशाङ्कुशधरः पातु रजःसत्त्वतमःस्मृतीः ॥ १६
ज्ञानं धर्मं च लक्ष्मीं च लज्जां कीर्तिं तथा कुलम् ।
वपुर्धनं च धान्यं च गृहदारान्सुतान्सखीन् ॥ १७
सर्वायुधधरः पौत्रान् मयूरेशोऽवतात्सदा ।
कपिलोऽजाविकं पातु गजाश्वान्विकटोऽवतु ॥ १८
भूर्जपत्रे लिखित्वेदं यः कण्ठे धारयेत्सुधीः ।
न भयं जायते तस्य यक्षरक्षःपिशाचतः ॥ १९
त्रिसन्ध्यं जपते यस्तु वज्रसारतनुर्भवेत् ।
यात्राकाले पठेद्यस्तु निर्विघ्नेन फलं लभेत् ॥ २०

युद्धकाले पठेद्यस्तु विजयं चाप्नुयाद्ध्रुवम् ।
मारणोच्चाटनाकर्षस्तम्भमोहनकर्मणि ॥ २१
सप्तवारं जपेदेतद्दिनानामेकविंशतिम् ।
तत्तत्फलमवाप्नोति साधको नात्र संशयः ॥ २२
एकविंशतिवारं च पठेत्तावद्दिनानि यः ।
कारागृहगतं सद्यो राज्ञा वध्यं च मोचयेत् ॥ २३
राजदर्शनवेलायां पठेदेतत्त्रिवारतः ।
स राजानं वशं नीत्वा प्रकृतीश्च सभां जयेत् ॥२४
इदं गणेशकवचं कश्यपेन समीरितम् ।
मुद्गलाय च तेनाथ माण्डव्याय महर्षये ॥ २५
मह्यं स प्राह कृपया कवचं सर्वसिद्धिदम् ।
न देयं भक्तिहीनाय देयं श्रद्धावते शुभम् ॥ २६
अनेनास्य कृता रक्षा न बाधाऽस्य भवेत्क्वचित् ।
राक्षसासुरवेतालदैत्यदानवसम्भवा ॥ २७
॥ इति श्रीगणेशपुराणे गणेशकवचं समाप्तम् ॥

॥ गणेशमानसपूजा ॥

गृत्समद उवाच—

विघ्नेश वीर्याणि विचित्रकाणि
बन्दीजनैर्मागधकैः स्मृतानि ।
श्रुत्वा समुत्तिष्ठ गजानन त्वं
प्राह्ने जगन्मङ्गलकं कुरुष्व ॥ १

एवं मया प्रार्थितविघ्नराज-
श्चित्तेन चोत्थाय बहिर्गणेशः ।
तं निर्गतं वीक्ष्य नमन्ति देवाः
शम्भ्वादयो योगिमुखास्तथाहम् ॥ २

शौचादिकं ते परिकल्पयामि
हेरम्ब वै दन्तविशुद्धिमेवम् ।
वक्त्रेण सम्प्रोक्ष्य मुखारविन्दं
देवं सभायां विनिवेशयामि ॥ ३

द्विजादिसर्वैरभिवन्दितं च
शुकादिभिर्मोदसुमोदकाद्यैः।।
सम्भाष्य चालोक्य समुत्थितं तं
सुमण्डपं कल्प्य निवेशयामि ॥ ४
रत्नैः सुदीप्तैः प्रतिबिम्बितं तं
पश्यामि चित्तेन विनायकं च।
तत्रासनं रत्नसुवर्णयुक्तं
सङ्कल्प्य देवं विनिवेशयामि ॥ ५
सिद्ध्या च बुद्ध्या सह विघ्नराज
पाद्यं कुरु प्रेमभरेण सर्वैः।
सुवासितं नीरमथो गृहाण
चित्तेन दत्तं च सुखोष्णभावम् ॥ ६
ततः सुवस्त्रेण गणेशमादौ
सम्प्रोक्ष्य दूर्वादिभिरर्चयामि।
चित्तेन भावप्रिय दीनबन्धो
मनोविलीनं कुरु ते पदाब्जे ॥ ७

कर्पूरतैलादिसुवासितं तु
सुकल्पितं तोयमथो गृहाण ।
आचम्य तेनैव गजानन त्वं
कृपाकटाक्षेण विलोकयाशु ॥ ८

प्रवालमुक्ताफलहाटकाद्यैः
सुसंस्कृतं चान्तरभावकेन ।
अनर्घ्यमर्घ्यं सफलं कुरुष्व
मया प्रदत्तं गणराज तुण्डे ॥ ९

सौगन्ध्ययुक्तं मधुपर्कमार्घं
सकल्पितं भावयुतं गृहाण ।
पुनस्तथाचम्य विनायकं त्वं
भक्तांश्च भक्तेश सुरक्षयाशु ॥ १०

सुवासितं चम्पकजातिकाद्यै-
स्तैलं मया कल्पितमेव तुण्डे ।
गृहाण तेन प्रविमर्दयामि
सर्वाङ्गमेवं तव सेवनाय ॥ ११

ततः सुखोष्णेन जलेन चाह-
मनेकतीर्थाहृतकेन दुण्ढिम् ।
चित्तेन शुद्धेन च स्नापयामि
स्नानं मया दत्तमथो गृहाण ॥ १२

ततः पयःस्नानमचिन्त्यभाव
गृहाण तोयस्य तथा गणेश ।
पुनर्दधिस्नानमनामयं त्वं
चित्तेन दत्तं च जलस्य चैव ॥ १३

ततो घृतस्नानमपारवन्द्य
सुतीर्थजं विघ्नहर प्रसीद ।
गृहाण चित्तेन सुकल्पितं तु
ततो मधुस्नानमथो जलस्य ॥ १४

सुशर्करायुक्तमथो गृहाण
स्नानं मया कल्पितमेव दुण्ढे ।
ततो जलस्नानमघापहन्तृ
विघ्नेश मायां मम वारयाशु ॥ १५

सुवस्त्रपट्टस्थमथो गृहाण
स्नानं परेशाधिपते ततश्च ।
कौमण्डलीसम्भवजं कुरुष्व
विशुद्धमेवं परिकल्पितं तु ॥ १६

ततस्तु सूक्तैर्मनसा गणेशं
सम्पूज्यदूर्वादिभिरल्पभावैः ।
अपारकैर्मण्डलभूतब्रह्म-
णस्पत्यकैस्तं अभिषेचयामि ॥ १७

ततः सुवस्त्रेण तु प्रोञ्छनं वै
गृहाण चित्तेन मया सुकल्पितम् ।
ततो विशुद्धेन जलेन तुण्डे
आचान्तमेवं कुरु विघ्नराज ॥ १८

अथो विशुद्धे तु गृहाण वस्त्रे
अनर्घ मौल्ये मनसा मया ते ।
दत्ते परिच्छाद्य निजात्मदेहं
ताभ्यां मयूरेश जनांश्च पालय ॥ १९

आचम्य विघ्नेश पुनस्तथैव
चित्तेन दत्तं मुखमुत्तरीयम् ।
गृहाण भक्तप्रतिपालक त्वं
नमो यथा नारक संयुतं तु ॥ २०

यज्ञोपवीतं त्रिगुणस्वरूपं
सौवर्णमेवं ह्यहिनाथभूतम् ।
भावेन दत्तं गणनाथ तत्त्वं
गृहाण भक्तोद्धृतिकारणाय ॥ २१

आचान्तमेवं मनसा प्रदत्तं
कुरुष्व शुद्धेन जलेन तुण्डे ।
पुनश्च कौमण्डलकेन पाहि
विश्वं प्रभो खेलकरं सदा ते ॥ २२

उद्यद्दिनेशाभमथो गृहाण
सिन्दूरकं ते मनसा प्रदत्तम् ।
सर्वाङ्गसंलेपनमादराद्वै
कुरुष्व हेरम्ब च तेन पूर्णम् ॥ २३

सहस्रशीर्षं मनसा मया त्वं
दत्तं किरीटं तु सुवर्णजं वै ।
अनेकरत्नैः खचितं गृहाण
ब्रह्मेश ते मस्तकशोभनाय ॥ २४

विचित्ररत्नैः कनकेन तुण्डे
युतानि चित्तेन मया परेश ।
दत्तानि नानापदकुण्डलानि
गृहाण शूर्पश्रुतिभूषणाय ॥ २५

शुण्डाविभूषार्थमनन्तखेलिन्
सुवर्णजं कञ्चुकमागृहाण ।
रत्नैश्च युक्तं मनसा मया य-
दत्तं प्रभो तत्सफलं कुरुष्व ॥ २६

सुवर्णरत्नैश्च युतानि तुण्डे
सदैकदन्ताभरणानि कल्प ।
गृहाण चूडाकृतये परेश
दत्तानि दन्तस्य च शोभनार्थम् ॥ २७

रत्नैः सुवर्णेन कृतानि तानि
गृहाण चत्वारि मया प्रकल्प्य ।
सम्भूषय त्वं कटकानि नाथ
चतुर्भुजेषु ह्यज विघ्नहारिन् ॥ २८

विचित्ररत्नैः खचितं सुवर्ण-
सम्भूतकं गृह्य मया प्रदत्तम् ।
तमाङ्गुलीष्वङ्गुलीकं गणेश
चित्तेन संशोभय तत्परेश ॥ २९

विचित्ररत्नैः खचितानि दुण्ढे
केयूरकाणि ह्यथ कल्पितानि ।
सुवर्णजानि प्रमथाधिनाथ
गृहाण दत्तानि तु बाहुषु त्वम् ॥ ३०

प्रवालमुक्ताफलरत्नजैस्त्वं
सुवर्णसूत्रैश्च गृहाण कण्ठे ।
चित्तेन दत्ता विविधाश्च माला
उरूदरे शोभय विघ्नराज ॥ ३१

चन्द्रं ललाटे गणनाथ पूर्णं
वृद्धिक्षयाभ्यां तु विहीनमाद्यम् ।
संशोभय त्वं वरसंयुतं ते
भक्तिप्रिय त्वं प्रकटीकुरुष्व ॥ ३२

चिन्तामणिं चिन्तिततदं परेश
हृद्देशगं ज्योतिर्मयं कुरुष्व ।
मणिं सदानन्दसुखप्रदं च
विघ्नेश दीनार्थद पालयस्व ॥ ३३

नामौ फणीशं च सहस्रशीर्षं
संवेष्टनेनैव गणाधिनाथ ।
भक्तं सुभूषं कुरु भूषणेन
वरप्रदानं सफलं परेश ॥ ३४

कटीतटे रत्नसुवर्णयुक्तां
काञ्चीं सुचित्तेन च धारयामि ।
विघ्नेश ज्योतिर्गणदीपनीं ते
प्रसीद भक्तं कुरु मां दयाब्धे ॥ ३५

हेरम्ब ते रत्नसुवर्णयुक्ते
सुनूपुरे मञ्जिरके तथैव ।
सुकिङ्किणीनादयुते सुबुद्ध्या
सुपादयोः शोभय मे प्रदत्ते ॥ ३६

इत्यादि नानाविधभूषणानि
तवेच्छया मानसकल्पितानि ।
संभूषयाम्येव त्वदङ्गकेषु
विचित्रधातुप्रभवाणि द्रुण्ढे ॥ ३७

सुचन्दनं रक्तममोघवीर्यं
सुघर्षितं चाष्टकगन्धमुख्यैः ।
युक्तं मया कल्पितमेकदन्त
गृहाण ते त्वङ्गविलेपनार्थम् ॥ ३८

लिप्तेषु वैचित्र्यमथाष्टगन्धै-
रङ्गेषु तेऽहं प्रकरोमि चित्रम् ।
प्रसीद चित्तेन विनायक त्वं
ततः सुरक्तं रविमेव फाले ॥ ३९

घृतेन वै कुङ्कुमकेन रक्तान्
सुतण्डुलांस्ते परिकल्पयामि ।
फाले गणाध्यक्ष गृहाण पाहि
भक्तान्सुभक्तिप्रिय दीनबन्धो ॥ ४०

गृहाण भो चम्पकमालतीनि
जलपङ्कजानि स्थलपङ्कजानि ।
चित्तेन दत्तानि च मल्लिकानि
पुष्पाणि नानाविधवृक्षजानि ॥ ४१

पुष्पोपरि त्वं मनसा गृहाण
हेरम्ब मन्दारशमीदलानि ।
मया सुचित्तेन च कल्पितानि
ह्यपारकाणि प्रणवाकृते तु ॥ ४२

दूर्वाङ्कुरान्वै मनसा प्रदत्तां-
स्त्रिपञ्चपत्रैर्युतकांश्च स्निग्धान् ।
गृहाण विघ्नेश्वर सङ्ख्यया त्वं
हीनांश्च सर्वोपरि वक्रतुण्ड ॥ ४३

दशाङ्गभूतं मनसा मया ते
धूपं प्रदत्तं गणराज तुण्डे ।
गृहाण सौरभ्यकरं परेश
सिद्ध्या च बुद्ध्या सह भक्तपाल ॥ ४४

दीपं सुवर्त्या युतमादरात्ते
दत्तं मया मानसकं गणेश ।
गृहाण नानाविधजं घृतादि-
तैलादिसम्भूतममोघदृष्टे ॥ ४५

भोज्यं तु लेह्यं गणराज पेयं
चोष्यं च नानाविधषड्रसाढ्यम् ।
गृहाण नैवेद्यमतो मया ते
सुकल्पितं पुष्टिपते महात्मन् ॥ ४६

सुवासितं भोजनमध्यभागे
जलं मया दत्तमथो गृहाण ।
कमण्डलुस्थं मनसा गणेश
पिबस्व विघ्नादिकवृत्तिकारिन् ॥ ४७

ततः करोद्वर्तनकं गृहाण
सौगन्ध्ययुक्तं मुखमार्जनाय ।
सुवासितेनैव सुतीर्थजेन
सुकल्पितं नाथ गृहाण तुण्डे ॥ ४८

पुनस्तथाचम्य सुवासितं च
दत्तं मया तीर्थजलं पिबस्व ।
प्रकल्प्य विघ्नेश ततः परं ते
संप्रोक्षनं हस्तमुखे करोमि ॥ ४९

द्राक्षादिरम्भाफलचूतकानि
खार्जूरकार्कन्धुकदाडिमानि ।
सुस्वादयुक्तानि मया प्रकल्प्य
गृहाण दत्तानि फलानि तुण्डे ॥ ५०

पुनर्जलेनैव करादिकं ते
संक्षालयेऽहं मनसा गणेश ।
सुवासितं तोयमथो पिबस्व
मया प्रदत्तं मनसा परेश ॥ ५१

अष्टाङ्गयुक्तं गणनाथ दत्तं
ताम्बूलकं ते मनसा मया वै ।
गृहाण विघ्नेश्वर भावयुक्तं
सदासकृत्तुण्डविशोधनार्थम् ॥ ५२

ततो मया कल्पितके गणेश
महासने रत्नसुवर्णयुक्ते ।
मन्दारकूर्पासकयुक्तवस्त्रै-
रनर्घ्यसञ्छादितके प्रसीद ॥ ५३

ततस्त्वदीयावरणं परेशं
सम्पूजयेऽहं मनसा यथावत् ।
नानोपचारैः परमप्रियैस्तु
त्वत्प्रीतिकामार्थमनाथबन्धो ॥ ५४

गृहाण लम्बोदर दक्षिणां ते
ह्यसङ्ख्यभूतां मनसा प्रदत्ताम् ।
सौवर्णमुद्रादिकमुख्यभावां
पाहि प्रभो विश्वमिदं गणेश ॥ ५५

राजोपचारान्विविधान्गृहाण
हस्त्यश्वछत्रादिकमादराद्वै ।
चित्तेन दत्तान् गणनाथ तुण्डे
ह्यपारसङ्ख्यान् स्थिरजङ्गमांस्ते ॥ ५६

दानाय नानाविधरूपकांस्ते
गृहाण दत्तान्मनसा मयाँ वै ।
पदार्थभूतान् स्थिरजंगमांश्च
हेरम्ब मां तारय मोहभावात् ॥ ५७

मन्दारपुष्पाणि शमीदलानि
दूर्वाङ्कुरांस्ते मनसा ददामि ।
हेरम्ब लम्बोदरदीनपाल
गृहाण भक्तं कुरु मां पदे ते ॥ ५८

ततो हरिद्राम्बिरं गुलालं
सिन्दूरकं ते परिकल्पयामि ।
सुवासितं वस्तु सुवासभूतै-
र्गृहाण ब्रह्मेश्वर शोभनार्थम् ॥ ५९

ततः शुकाद्याः शिवविष्णुमुख्या
इन्द्रादयः शेषमुखास्तथान्ये ।
मुनीन्द्रकाः सेवकभावयुक्ताः
सभासनस्थं प्रणमन्ति ढुण्ढिम् ॥ ६०

वामाङ्गके शक्तियुता गणेशं
सिद्धिस्तु नानाविधसिद्धिभिस्तम् ।
अत्यन्तभावेन सुसेवते तु
मायास्वरूपा परमार्थभूता ॥ ६१

गणेश्वरं दक्षिणभागसंस्था
बुद्धिः कलाभिश्च सुबोधिकाभिः ।
विद्याभिरेवं भजते परेशं
मायासु साङ्ख्यप्रदचित्तरूपाः ॥ ६२

प्रमोदमोदादय एव पृष्ठे
गणेश्वरं भावयुता भजन्ते ।
भक्तेश्वरा मुद्गलशम्भुमुख्याः
शुकादयस्तं स्म पुरो भजन्ते ॥ ६३

गन्धर्वमुख्या मधुरं जगुश्च
गणेश गीतं विविधस्वरूपम् ।
नृत्यं कलायुक्तमथो पुरस्ता-
च्चक्रुस्तथा ह्यप्सरसो विचित्रम् ॥ ६४

इत्यादिनानाविधभावयुक्तैः
संसेवितं विघ्नपतिं भजामि ।
चित्तेन बुध्वा तु निरञ्जनं वै
करोमि नानाविधदीपयुक्तम् ॥ ६५

चतुर्भुजं पाशधरं गणेशं
तथाङ्कुशं दन्तयुतं तमेवम् ।
त्रिनेत्रयुक्तं स्वमयङ्करं तं
महोदरं चैकरदं गजास्यम् ॥ ६६

सर्पोपवीतं गजकर्णधारं
विभूतिभिः सेवितपादपद्मम् ।
ध्याये गणेशं विविधप्रकारैः
सुपूजितं शक्तियुतं परेशम् ॥ ६७

ततो जपं वै मनसा करोमि
स्वमूलमन्त्रस्य विधानयुक्तम् ।
असङ्ख्यभूतं गणराज हस्ते
समर्पयाम्येव गृहाण हुण्ढे ॥ ६८

आरात्रिकां कर्पुरादिभूता-
मपारदीपां प्रकरोमि पूर्णाम् ।
चित्तेन लम्बोदर तां गृहाण
अज्ञानध्वान्ताघहरां निजानाम् ॥ ६९

वेदेषु वैघ्नेश्वरकैः सुमन्त्रैः
सुमन्त्रितं पुष्पदलं प्रभूतम् ।
गृहाण चित्तेन मया प्रदत्त-
मपारवृत्त्या त्वथ मन्त्रपुष्पम् ॥ ७०

अपारवृत्त्या स्तुतिमेकदन्त
गृहाण चित्तेन कृतां गणेश ।
युक्तां श्रुतिस्मार्तभवैः पुराणैः
सर्वैः परेशाधिपते मया ते ॥ ७१

प्रदक्षिणा मानसकल्पितास्ता
गृहाण लम्बोदर भावयुक्ताः ।
सङ्कल्पविहीना विविधस्वरूपा
भक्तान्सदा रक्ष भवार्णवाद्वै ॥ ७०

नतिं ततो विघ्नपते गृहाण
साष्टाङ्गकाद्यां विविधस्वरूपाम् ।
सङ्कल्पविहीनां मनसा कृतां ते
सिद्ध्या च बुद्ध्या परिपालयाशु ॥ ७१

न्यूनातिरिक्तं तु मया कृतं चे-
त्तदर्थमन्ते मनसा गृहाण ।
दूर्वाङ्कुरान्विघ्नपते प्रदत्तान्
सम्पूर्णमेवं कुरु पूजनं मे ॥ ७२

क्षमस्व विघ्नाधिपते मदीयान्
सदापराधान् विविधस्वरूपान् ।
भक्तिं मदीयां सफलां कुरुष्व
सम्प्रार्थयेऽहं मनसा गणेश ॥ ७३

ततः प्रसन्नेन गजाननेन
दत्तं प्रसादं शिरसाभिवन्द्य ।
स्वमस्तके तं परिधारयामि
चित्तेन विघ्नेश्वरमानतोऽस्मि ॥ ७६

उत्थाय विघ्नेश्वर एव तस्मा-
दूतस्ततस्त्वन्तरधानशक्त्या ।
शिवादयस्तं प्रणिपत्य सर्वे
गताः सुचित्तेन च चिन्तयामि ॥ ७७

सर्वान्नमस्कृत्य ततोऽहमेव
भजामि चित्तेन गणाधिपं तम् ।
स्वस्थानमागत्य महानुभावै-
र्भक्तैर्गणेशस्य च खेलयामि ॥ ७८

एवं त्रिकालेषु गणाधिपं तं
चित्तेन नित्यं परिपूजयामि ।
तेनैव तुष्टः प्रददातु भावं
विश्वेश्वरो भक्तिमयं तु मह्यम् ॥ ७९

गणेशपादोदकपानकं च
उच्छिष्टगन्धस्य सुलेपनं तु ।
निर्माल्यसन्धारणकं सुभोज्यं
लम्बोदरस्यास्तु हि भुक्तशेषम् ॥ ८०

यं यं करोम्येव तदेव दीक्षा-
गणेश्वरस्यास्तु सदा गणेश ।
प्रसीद नित्यं तव पादभक्तं
कुरुष्व मां ब्रह्मपते दयालो ॥ ८१

ततस्तु शय्यां परिकल्पयामि
मन्दारकूर्पासकवस्त्रयुक्ताम् ।
सुवासपुष्पादिभिरर्चितां ते
गृहाण निद्रां कुरु विघ्नराज ॥ ८२

सिद्ध्या च बुद्ध्या सहितं गणेशं
सुनिद्रितं वीक्ष्य तथाहमेव ।
गत्वा स्ववासं च करोमि निद्रां
ध्यात्वा हृदि ब्रह्मपतिं तदीयः ॥ ८३

एतादृशं सौख्यममोघशक्ते
देहि प्रभो मानसजं गणेश ।
मह्यं च तेनैव कृतार्थरूपो
भवामि भक्तिरसलालसोऽहम् ॥ ८४

गार्ग्य उवाच—

एवं नित्यं महाराज गृत्समदो महायशाः ।
चकार मानसीं पूजां योगीन्द्राणां गुरुः स्वयम् ॥
य एतां मानसीं पूजां करिष्यति नरोत्तमः ।
पठिष्यति सदा सोऽपि गाणपत्यो भविष्यति ॥ ८६
श्रावयिष्यति यो मर्त्यः श्रोष्यते भावसंयुतः ।
स क्रमेण महीपाल ब्रह्मभूतो भविष्यति ॥ ८७
यद्यदिच्छति तत्तद्वै सफलं तस्य जायते ।
अन्ते स्वानन्दगः सोऽपि योगिवन्द्यो भविष्यति ॥

॥ इति श्रीमदान्त्ये मौद्गल्ये मानसपूजा समाप्ता ॥

॥ गणेशबाह्यपूजा ॥

ऐल उवाच—

बाह्यपूजां वद विभो गृत्समदप्रकीर्तिताम् ।
तेन मार्गेण विघ्नेशं भजिष्यसि निरन्तरम् ॥ १

गार्त्स्य उवाच—

आदौ च मानसीं पूजां कृत्वा गृत्समदो मुनिः ।
बाह्यां चकार विधिवत्तां शृणुष्व सुखप्रदाम् ॥ २
हृदि ध्यात्वा गणेशानं परिवारादिसंयुतम् ।
नासिकारन्ध्रमार्गेण तं बाह्याङ्गं चकार ह ॥ ३
आदौ वैदिकमन्त्रं स गणानान्त्वेति सम्पठन् ।
पञ्चाच्छ्लोकं समुच्चार्य पूजयामास विघ्नपम् ॥ ४

गृत्समद उवाच—

चतुर्बाहुं त्रिनेत्रं च गजास्यं रक्तवर्णकम् ।
पाशाङ्कुशादिसंयुक्तं मायायुक्तं प्रचिन्तयेत् ॥ ५
आगच्छ ब्रह्मणां नाथ सुरासुरवरार्चित ।
सिद्धिबुद्ध्यादिसंयुक्त भक्तिग्रहणलालस ॥ ६

कृतार्थोऽहं कृतार्थोऽहं तवागमनतः प्रभो ।
विघ्नेशानुगृहीतोऽहं सफलो मे भवोऽभवत् ॥ ७
रत्नसिंहासनं स्वामिन् गृहाण गणनायक ।
तत्रोपविश्य विघ्नेश रक्ष भक्तान्विशेषतः ॥ ८
सुवासिताभिरद्भिश्च पादप्रक्षालनं प्रभो ।
शीतोष्णाम्भः करोमि ते गृहाण पाद्यमुत्तमम् ॥ ९
सर्वतीर्थाहृतं तोयं सुवासित सुवस्तुभिः ।
आचमनं च तेनैव कुरुष्व गणनायक ॥ १०
रत्नप्रवालमुक्ताद्यैरनर्घैः संस्कृतं प्रभो ।
अर्घ्यं गृहाण हेरम्ब द्विरदानन तोषकम् ॥ ११
दधिमधुघृतैर्युक्तं मधुपर्कं गजानन ।
गृहाण भावसंयुक्तं मया दत्तं नमोऽस्तु ते ॥ १२
पाद्ये च मधुपर्के च स्नाने वस्त्रोपधारणे ।
उपवीते भोजनान्ते पुनराचमनं कुरु ॥ १३
चम्पकाद्यैर्गणाध्यक्ष वासितं तैलमुत्तमम् ।
अभ्यङ्गं कुरु सर्वेश लम्बोदर नमोऽस्तु ते ॥ १४

यक्षकर्दमकाद्यैश्च विघ्नेश भक्तवत्सल ।
तद्वर्वनं कुरुष्व त्वं मया दत्तैर्महाप्रभो ॥ १५
नानातीर्थजलैर्दुण्ढे सुखोष्णभावरूपकैः ।
कमण्डलूद्भवैः स्नानं मया कुरु समर्पितैः ॥ १६
कामधेनुसमुद्भूतं पयः परमपावनम् ।
तेन स्नानं कुरुष्व त्वं हेरम्ब परमार्थवित् ॥ १७
पञ्चामृतानां मध्ये तु जलैः स्नानं पुनः पुनः ।
कुरु त्वं सर्वतीर्थेभ्यो गङ्गादिभ्यः समाहृतैः ॥ १८
दधि धेनुपयोद्भूतं मलापहरणं परम् ।
गृहाण स्नानकार्यार्थं विनायक दयानिधे ॥ १९
धेनोः समुद्भवं दुण्ढे घृतं सन्तोषकारकम् ।
महामलापघातार्थं तेन स्नानं कुरु प्रभो ॥ २०
सारघं संस्कृतं पूर्णं मधु मधुरसोद्भवम् ।
गृहाण स्नानकार्यार्थं विनायक नमोऽस्तु ते ॥ २१
इक्षुदण्डसमुद्भूतां शर्करां मलनाशिनीम् ।
गृहाण गणनाथ त्वं तया स्नानं समाचर ॥ २२

यक्षकर्दमकाद्यैश्च स्नानं कुरु गणेश्वर ।
आन्त्यं मलहरं शुद्धं सर्वसौगन्ध्यैकसारकम् ॥ २३
ततो गन्धाक्षतादींश्च दूर्वाङ्कुरान्गजानन ।
समर्पयामि स्वल्पांस्त्वं गृहाण परमेश्वर ॥ २४
ब्रह्मणस्पत्यसूक्तैश्च ह्येकविंशतिवारकैः ।
अभिषेकं करोमि त्वं गृहाण द्विरदानन ॥ २५
तत आचमनं देव सुवासितजलेन च ।
कुरुष्व गणनाथ त्वं सर्वतीर्थभवेन वै ॥ २६
वस्त्रयुग्मं गृहाण त्वमनर्घं रक्तवर्णकम् ।
लोकलज्जाहरं चैव विघ्ननाथ नमोऽस्तु ते ॥ २७
उत्तरीयं सुचित्रं वै नभस्तारासन्निभं यथा ।
गृहाण सर्वसिद्धीश मया दत्तं सुभक्तितः ॥ २८
उपवीतं गणाध्यक्ष गृहाण च ततः परम् ।
त्रैगुण्यमयरूपं तु प्रणवग्रन्थिबन्धनम् ॥ २९
ततः सिन्दूरकं देव गृहाण गणनायक ।
अङ्गलेपनभावार्थं सदानन्दविवर्धनम् ॥ ३०

नानाभूषणकानि त्वमङ्गेषु विविधेषु च ।
भासुरस्वर्णरत्नैश्च निर्मितानि गृहाण भो ॥ ३१
अष्टगन्धसमायुक्तं गन्धं रक्तं गजानन ।
द्वादशाङ्गेषु ते दुण्ढे लेपयामि सुचित्रवत् ॥ ३२
रक्तचन्दनसंयुक्तानथवा कुङ्कुमैर्युतान् ।
अक्षतान् विघ्नराज त्वं गृहाण मुखमण्डले ॥ ३३
चम्पकादिसुवृक्षेभ्यः सम्भूतानि गजानन ।
पुष्पाणि शमिमन्दारदूर्वादीनि गृहाण च ॥ ३४
दशाङ्गं गुग्गुलुं धूपं सर्वसौरभकारकम् ।
गृहाण त्वं मया दत्तं विनायक महोदर ॥ ३५
नानाजातिभवं दीपं गृहाण गणनायक ।
अज्ञानमलजं दोषं हरन्तं ज्योतिरूपकम् ॥ ३६
चतुर्विधान्नसम्पन्नं मधुरं लड्डुकादिकम् ।
नैवेद्यं ते मया दत्तं भोजनं कुरु विघ्नप ॥ ३७
सुवासितं गृहाणेदं जलं तीर्थसमाहृतम् ।
मुक्तिमध्ये च पानार्थं देवदेवेश ते नमः ॥ ३८

भोजनान्ते करोद्वर्तं यक्षकर्दमकेन च ।
कुरुष्व त्वं गणाध्यक्ष पिब तोयं सुवासितम् ॥ ३९
दाडिमं खर्जुरं द्राक्षां रम्भादीनि फलानि वै ।
गृहाण देवदेवेश नानामधुरकाणि तु ॥ ४०
अष्टाङ्गं देव ताम्बूलं गृहाण मुखवासनम् ।
असकृद्विघ्नराज त्वं मया दत्तं विशेषतः ॥ ४१
दक्षिणां काञ्चनाढ्यां तु नानाधातुसमुद्भवाम् ।
रत्नाद्यैः संयुतां हुण्ढे गृहाण सकलप्रिय ॥ ४२
राजोपचारकाद्यानि गृहाण गणनायक ।
दानानि तु विचित्राणि मया दत्तानि विघ्नप ॥ ४३
तत आभरणं तेऽहमर्पयामि विधानतः ।
उपचारैश्च विविधैः तेन तुष्टो भव प्रभो ॥ ४४
ततो दूर्वाङ्कुरान्हुण्ढे एकविंशतिसङ्ख्यकान् ।
गृहाण न्यूनसिद्ध्यर्थं भक्तवात्सल्यकारणात् ॥ ४५
नानादीपसमायुक्तं नीराजनमघापहन् ।
गृहाण भावसंयुक्तं सर्वाज्ञानाधिनाशन ॥ ४६

गणानां त्वेति मन्त्रस्य जपं साहस्रकं परम् ।
गृहाण गणनाथ त्वं सर्वसिद्धिप्रदो भव ॥ ४७
आरात्रिकं सुकर्पूरं नानादीपमयं प्रभो ।
गृहाण ज्योतिषां नाथ तथा नीराजयाम्यहम् ॥ ४८
पादयोस्ते तु चत्वारि नाभौ द्वे वदने प्रभो ।
एकं तु सप्तवारं वै सर्वाङ्गेषु निरञ्जनम् ॥ ४९
चतुर्वेदभवैर्मन्त्रैर्गणपत्यैर्गजानन ।
मन्त्रितानि गृहाण त्वं पुष्पपत्राणि विघ्नप ॥ ५०
पञ्चप्रकारकैः स्तोत्रैर्गाणपत्यैर्गणाधिप ।
स्तौमि त्वां तेन सन्तुष्टो भव भक्तिप्रदायक ॥ ५१
एकविंशतिसङ्ख्यं वा त्रिसङ्ख्यं वा गजानन ।
प्रादक्षिण्यं गृहाण त्वं ब्रह्मन् ब्रह्मेशभावन ॥ ५२
साष्टाङ्गां प्रणतिं नाथ एकविंशतिसम्मिताम् ।
हेरम्ब सर्वपूज्य त्वं गृहाण तु मया कृताम् ॥ ५३
न्यूनातिरिक्तभावार्थं किञ्चिद्दूर्वाङ्कुरान्प्रभो ।
समर्पयामि तेन त्वं साङ्गां पूजां कुरुष्व ताम् ॥ ५४

त्वया दत्तं स्वहस्तेन निर्माल्यं चिन्तयाम्यहम् ।
शिखायां धारयाम्येव सदा सर्वप्रदं च तत् ॥ ५५
अपराधानसङ्ख्यातान्क्षमस्व गणनायक ।
भक्तं कुरु च मां ढुण्ढे तव पादप्रियं सदा ॥ ५६
त्वं माता त्वं पिता मे वै सुहृत्सम्बन्धिकादयः ।
त्वमेव कुलदेवश्च सर्वं त्वं मे न संशयः ॥ ५७
जाग्रत्स्वप्नसुषुप्तिभिर्देहवाङ्मानसैः कृतम् ।
सांसर्गिकेण यत्कर्म गणेशाय समर्पये ॥ ५८
बाह्यं नानाविधं पापं महोग्रं तलयं व्रजेत् ।
गणेशपादतीर्थस्य मस्तके धारणात्किल ॥ ५९
पादोदकं गणेशस्य पीतं मर्त्येन तत्क्षणात् ।
सर्वान्तर्गतजं पापं नश्यति गणनातिगम् ॥ ६०
गणेशोच्छिष्टगन्धं वै द्वादशाङ्गेषु चर्चयेत् ।
गणेशतुल्यरूपः स दर्शनात्सर्वपापहा ॥ ६१
यदा गणेशपूजादौ गन्धभस्मादिकं चरेत् ।
अथवोच्छिष्टगन्धं तु नो चेत्तत्र विधिं चरेत् ॥ ६२

द्वादशाब्देषु विघ्नेशं नाममन्त्रेण चार्चयेत् ।
तेन सोऽपि गणेशेन समो भवति भूतले ॥ ६३
मूर्ध्नि गणेश्वरं चादौ ललाटे विघ्ननायकम् ।
दक्षिणे कर्णमूले तु वक्रतुण्डं समर्चयेत् ॥ ६४
वामे कर्णस्य मूले वै चैकदन्तं समर्चयेत् ।
कण्ठे लम्बोदरं देवं हृदि चिन्तामणिं तथा ॥ ६५
बाहौ दक्षिणके चैव हेरम्बं वामबाहुके ।
विकटं नाभिदेशे तु विघ्ननाथं समर्चयेत् ॥ ६६
कुक्षौ दक्षिणगायां तु मयूरेशं समर्चयेत् ।
वामकुक्षौ गजास्यं वै पृष्ठे स्वानन्दवासिनम् ॥ ६७
सर्वाङ्गलेपनं शस्तं चित्रितं चाष्टगन्धकैः ।
गाणेशानां विशेषेण सर्वभद्रस्य कारणात् ॥ ६८
ततः शिष्टं तु नैवेद्यं गणेशस्य भुनज्म्यहम् ।
भुक्तिमुक्तिप्रदं पूर्णं नानापापनिकृन्तनम् ॥ ६९
गणेशस्मरणेनैव करोमि कालखण्डनम् ।
गाणपत्यैश्च संवासः सदा मेऽस्तु गजानन ॥ ७०

गार्ग्य उवाच—

एवं गृत्समदश्चैव चकार बाह्यपूजनम् ।
त्रिकालेषु महायोगी सदा भक्तिसमन्वितः ॥ ७१
तथा कुरु महीपाल गाणपत्यो भविष्यति ।
यथा गृत्समदः साक्षात्तथा त्वमपि निश्चितम् ॥७२

॥ इति श्रीमदाम्त्ये मौद्गल्ये बाह्यपूजा समाप्ता ।

॥ गणेशमहिमस्तोत्रम् ॥

अनिर्वाच्यं रूपं स्तवननिकरो यत्र गलित-
स्तथा वक्ष्ये स्तोत्रं प्रथमपुरुषस्यात्र महतः ।
यतो जातं विश्वं स्थितमपि सदा यत्र विलयः
स कीनाशीर्वाणः सुनिगमनुतः श्रीगणपतिः ॥ १

गणेशं गाणेशाः शिवमिति च शैवाश्च विबुधाः
रविं सौरा विष्णुं प्रथमपुरुषं विष्णुभजकाः ।
वदन्त्येकं शाक्ता जगदुदयमूलां परशिवां
न जाने किं तस्मै नम इति परं ब्रह्म सकलम् ॥ २

तथेशं योगज्ञा गणपतिमिमं कर्म निखिलं
समीमांसा वेदान्तिन इति परं ब्रह्म सकलम् ।
अजां साङ्ख्यो ब्रूते सकलगुणरूपां च सततं
प्रकर्तारं न्यायस्त्वथ जगति बौद्धा धियमिति ॥ ३

कथं ज्ञेयो बुद्धेः परतर इयं बाह्यसरणि-
र्यथाधीर्यस्य स्यात्स च तदनुरूपो गणपतिः ।

महत्कृत्यं तस्य स्वयमपि महान् सूक्ष्ममणुव-
द्द्वीनिर्ज्योतिर्बिन्दुर्गगनसदृशः किञ्च सदसत् ॥ ४
अनेकास्योऽपाराक्षिकरचरणोऽनन्तहृदय-
स्तथा नानारूपो विविधवदनः श्रीगणपतिः ।
अनन्ताद्यैः शक्त्या विविधगुणकर्मैकसमये
त्वसङ्ख्यातानन्ताभिमतफलदोऽनेकविषये ॥ ५
न यस्यान्तो मध्यो न च भवति चादिः सुमहता-
मलिप्तः कृत्वेत्थं सकलमपि खंवत्स च पृथक् ।
स्मृतः संस्मर्तॄणां सकलहृदयस्थः प्रियकरो
नमस्तस्मै देवाय सकलसुवन्द्याय महते ॥ ६
गणेशाद्यं बीजं वहनवमितापल्लवयुतं
मनुश्चैकार्णोऽयं प्रणवसहितोऽभीष्टफलदः ।
सबिन्दुश्चाङ्गाद्यां गणकऋषिच्छन्दोऽस्य च निचृत्
स देवः प्राग्बीजं विपदपि च शक्तिर्जपकृताम् ॥ ७
गकारो हेरम्बः सगुण इति पुंनिर्गुणमयो
द्विधाप्येको जातः प्रकृतिपुरुषो ब्रह्म हि गणः ।

स चेशश्चोत्पत्तिस्थितिलयकरोऽयं प्रमथको
यतो भूतं भव्यं भवति पतिरीशो गणपतिः ॥ ८
गकारः कण्ठोर्ध्वं गजमुखसमो मर्त्यसदृशो
णकारः कण्ठाधो जठरसदृशाकार इति च ।
अधोभावः कट्यां चरण इति हीशस्य च तनु-
र्विभातीत्थं नाम त्रिभुवनसमं भूर्भुवः सुवः ॥ ९
गणेशेति त्र्यर्णात्मकमपि वरं नाम सुखदं
सकृत्प्रोच्चैरुच्चारितमिति नृभिः पावनकरम् ।
गणेशस्यैकस्य प्रतिजपकरस्यास्य सुकृतं
न विज्ञातो नाम्नः सकलमहिमा कीदृशविधः ॥
गणेशेत्याह्वं यः प्रवदति मुहुस्तस्य पुरतः
प्रपश्यंस्तद्रूपं स्वयमपि गणस्तिष्ठति तदा ।
स्वरूपस्य ज्ञानं त्वमुक इति नाम्नास्य भवति
प्रबोधः सुप्तस्य त्वखिलमिह सामर्थ्यमसुना ॥ ११
गणेशो विश्वेऽस्मिन्स्थित इह च विश्वं गणपतौ
गणेशो यत्रास्ते धृतिमतिरमैश्वर्यमखिलम् ।

समुक्तं नामैकं गणपतिपदं मङ्गलमयं
तदेकास्ये दृष्टे सकलविबुधास्येक्षणसमम् ॥ १२
बहुक्लेशैर्व्याप्तः स्मृत उत गणेशे च हृदये
क्षणात्क्लेशान्मुक्तो भवति सहसा त्वभ्रचयवत् ।
वने विद्यारम्भे युधि रिपुभये कुत्र गमने
प्रवेशे प्राणान्ते गणपतिपदं चाशु विशति ॥ १३
गणाध्यक्षो ज्येष्ठः कपिल अपरो मङ्गलनिधि-
र्दयालुर्हेरम्बो वरद इति चिन्तामणिरजः ।
वरानीशो दुण्ढिर्गजवदननामा शिवसुतो
मयूरेशो गौरीतनय इति नामानि पठति ॥ १४
महेशोऽयं विष्णुः सकविरविरिन्दुः कमलजः
क्षितिस्तोयं वह्निः श्वसन इति खं त्वद्रिरुदधिः ।
कुजस्तारः शुक्रो पुरुरुबुधोऽगुश्च धनदो
यमः पाशी काव्यः शनिरखिलरूपो गणपतिः ॥
मुखं वह्निः पादौ हरिरपि विधाता प्रजननं
रविर्नेत्रे चन्द्रो हृदयमपि कामोऽस्य मदनः ।

करौ शक्रः कट्यामवनिरुदरं भाति दशनं
गणेशस्यासन्वै क्रतुमयवपुश्चैव सकलम् ॥ १६
अनर्घ्यालङ्कारैररुणवसनैर्भूषिततनुः
करीन्द्रास्यः सिंहासनमुपगतो भाति बुधराट् ।
स्मिताख्यात्तन्मध्येऽप्युदितरविबिम्बोपमरुचिः
श्रिता सिद्धिर्वामे मतिरितरगा चामरकरा ॥ १७
समन्तात्तस्यासन्प्रवरमुनिसिद्धासुरगणाः
प्रशंसंतीत्यग्रे विविधनुतिभिः साञ्जलिपुटाः ।
विधौजाद्यैर्वेधादिभिरनुवृतो भक्तनिकरै-
र्गणक्रीडामोदप्रमुदविकटाद्यैः सहचरैः ॥ १८
वसिष्ठाद्यष्टाष्टादशदिगखिलाश्लोकमनुवाक्
धृतिः पादूः खड्गोऽनरसवलाः सिद्धय इमाः ।
सदा पृष्ठे तिष्ठन्त्यनिमिषदृशस्तन्मुखलया
गणेशं सेवन्तेऽप्यतिनिकटसूपायनकराः ॥ १९
मृगाक्षाद्या रम्भाप्रभृतिगणिका यस्य पुरतः
सुसङ्गीतं कुर्वन्त्यपि कृतुकगन्धर्वसहिताः ।

मुदः पारो नात्रेत्यनुपमपदे दौर्विगलिता
स्थिरं जातं चित्तं चरणमवलोक्यास्य विमलम् ॥२०
हरेणायं ध्यातस्त्रिपुरमथने चासुरवधे
गणेशः पार्वत्या बलिविजयकालेऽपि हरिणा ।
विधात्रा संसृष्टावुरगपतिना क्ष्मोणिधरणे
नरैः सिद्धौ मुक्तौ त्रिभुवनजये पुष्पधनुषा ॥ २१
अयं सुप्रासादे सुर इव निजानन्दभुवने
महान् श्रीमानाद्यो लघुतरगृहे रङ्कसदृशः ।
शिवद्वारे द्वाःस्थो नृप इव सदा भूपतिगृहे
स्थितो भूत्वोमाङ्के शिशुगणपतिर्लालनपरः ॥ २२
अमुष्मिन्सन्तुष्टे गजवदन एवापि विबुधे
ततस्ते सन्तुष्टास्त्रिभुवनगताः स्युर्बुधगणाः ।
दयालुर्हेरम्बो न च भवति यस्मिंश्च पुरुषे
वृथा सर्वं तस्य प्रजननमतः सान्द्रतमसि ॥ २३
वरेण्यो भृशुण्डिर्भृगुगुरुकुजा मुद्गलमुखा
ह्यपारास्तद्भक्ता जपहवनपूजास्तुतिपराः ।

गणेशोऽयं भक्तप्रिय इति च सर्वत्र गदितं
विमक्तिर्यत्रास्ते स्वयमपि सदा तिष्ठति गणः ॥ २४
मृदः काश्चिद्धातोश्छदविलिखिता वापि दृषदः
स्मृता व्याजान्मूर्तिः पथि यदि बहिर्येन सहसा ।
अशुद्धोऽद्धा द्रष्टा प्रवदति तदाह्वां गणपतेः
श्रुता शुद्धो मर्त्यो भवति दुरितादिस्मय इति ॥ २५
बहिर्द्वारस्योर्ध्वं गजवदनवर्ष्मेन्धनमयं
प्रशस्तं वा कृत्वा विविधकुशलैस्तत्र निहतम् ।
प्रभावात्तन्मूर्त्या भवति सदनं मङ्गलमयं
विलोक्यानन्दस्तां भवति जगतो विस्मय इति ॥
सिते भाद्रे मासे प्रतिशरदि मध्याह्नसमये
मृदो मूर्तिं कृत्वा गणपतितिथौ दुण्ढिसदृशीम् ।
समर्चत्युत्साहः प्रभवति महान् सर्वसदने
विलोक्यानन्दस्तां प्रभवति नृणां विस्मय इति ॥
तथा श्लोकः श्लोको वरयति महिम्नो गणपतेः
कथं स श्लोकेऽस्मिन् स्तुत इति भवेत्सम्प्रपतिते ।

स्मृतं नामास्यैकं सकृदिदमनन्ताह्वयसमं
यतो यस्यैकस्य स्तवनसदृशं नान्यदपरम् ॥ २८
गजवदन विभो यद्वर्णितं वैभवं ते
त्विह जनुषि ममेत्थं चारु तद्दर्शयाशु ।
त्वमसि च करुणायाः सागरः कृत्स्नदाता-
प्यति तव भृतकोऽहं सर्वदा चिन्तकोऽस्मि ॥ २९
सुस्तोत्रं प्रपठतु नित्यमेतदेव
स्वानन्दं प्रति गमनेऽप्ययं सुमार्गः ।
सञ्चिन्त्यं स्वमनसि तत्पदारविंदं
स्याप्याग्रे स्तवनफलं नतीः करिष्ये ॥ ३०
गणेशदेवस्य माहात्म्यमेत-
द्यः श्रावयेद्वापि पठेच्च तस्य ।
क्लेशा लयं यान्ति लभेच्च शीघ्रं
स्त्रीपुत्रविद्यार्थगृहं च मुक्तिम् ॥ ३१

इति श्रीपुष्पदन्तविरचितं श्रीगणेशमहिम्नस्तोत्रं
॥ सम्पूर्णम् ॥

॥ सङ्कटनाशनगणेशस्तोत्रम् ॥

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्तावासं स्मरेन्नित्यमायुःकामार्थसिद्धये ॥ १

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥ २

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च ।
सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टमम् ॥ ३

नवमं फालचन्द्रं च दशमं तु विनायकम् ।
एकादशं गणपतिं द्वादशं तु गजाननम् ॥ ४

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो ॥ ५

विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम् ॥ ६

जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥ ७
अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ॥ ८

इति श्रीनारदपुराणे सङ्कटनाशनं नाम गणेशस्तोत्रं
॥ सम्पूर्णम् ॥

॥ गणेशाष्टकम् ॥

सर्वे ऊचुः—

यतोऽनन्तशक्तेरनन्ताश्च जीवाः
यतो निर्गुणादप्रमेया गुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं
सदा तं गणेशं नमामो भजामः ॥ १

यतश्चाविरासीज्जगत्सर्वमेत-
त्तथाब्जासनो विश्वगो विश्वगोप्ता ।
तथेन्द्रादयो देवसङ्घा मनुष्याः
सदा तं गणेशं नमामो भजामः ॥ २

यतो वह्निमान् भवो भूर्जलं च
यतः सागराश्चन्द्रमा व्योम वायुः ।
यतः स्थावरा जङ्गमा वृक्षसङ्घाः
सदा तं गणेशं नमामो भजामः ॥ ३

यतो दानवाः किन्नरा यक्षसङ्घाः
यतश्चारणा वारणाः श्वापदाश्च ।
यतः पक्षिकीटा यतो वीरुधश्च
सदा तं गणेशं नमामो भजामः ॥ ४

यतो बुद्धिरज्ञाननाशो मुमुक्षोर्यतः
सम्पदो भक्तसन्तोषिकाः स्युः ।
यतो विघ्ननाशो यतः कार्यसिद्धिः
सदा तं गणेशं नमामो भजामः ॥ ५

यतः पुत्रसम्पद्यतो वाञ्छितार्थो
यतोऽभक्तविघ्नास्तथाऽनेकरूपाः ।
यतः शोकमोहौ यतः काम एव
सदा तं गणेशं नमामो भजामः ॥ ६

यतोऽनन्तशक्तिः स शेषो बभूव
धराधारणेऽनेकरूपे च शक्तः ।
यतोऽनेकधा स्वर्गलोका हि नाना
सदा तं गणेशं नमामो भजामः ॥ ७

यतो वेदवाचो विकुण्ठा मनोभिः
सदा नेति नेतीति यत्ता गृणन्ति ।
परब्रह्मरूपं चिदानन्दभूतं सदा
तं गणेशं नमामो भजामः ॥ ८

पुनरूचे गणाधीशः स्तोत्रमेतत्पठेन्नरः ।
त्रिसन्ध्यं त्रिदिनं तस्य सर्वकार्यं भविष्यति ॥ ९

इति श्रीगणेशपुराणे उपासनाखण्डे श्रीगणेशाष्टकं
॥ सम्पूर्णम् ॥

॥ गणनायकाष्टकम् ॥

एकदन्तं महाकायं तप्तकाञ्चनसन्निभम् ।
लम्बोदरं विशालाक्षं वन्देऽहं गणनायकम् ॥ १

मौञ्जीकृष्णाजिनधरं नागयज्ञोपवीतिनम् ।
बालेन्दुशकलं मौळौ वन्देऽहं गणनायकम् ॥ २

चित्ररत्नविचित्राङ्गं चित्रमालाविभूषितम् ।
कामरूपधरं देवं वन्देऽहं गणनायकम् ॥ ३

गजवक्त्रं सुरश्रेष्ठं कर्णचामरभूषितम् ।
पाशाङ्कुशधरं देवं वन्देऽहं गणनायकम् ॥ ४

मूषकोत्तममारुह्य देवासुरमहाहवे ।
योद्धुकामं महावीर्यं वन्देऽहं गणनायकम् ॥ ५

यक्ष किन्नर गन्धर्व सिद्धविद्याधरैस्सदा ।
स्तूयमानं महाबाहुं वन्देऽहं गणनायकम् ॥ ६

अम्बिकाहृदयानन्दं मातृभिः परिवेष्टितम् ।

भक्तप्रियं मदोन्मत्तं वन्देऽहं गणनायकम् ॥ ७
सर्वविघ्नहरं देवं सर्वविघ्नविवर्जितम् ।
सर्वसिद्धिप्रदातारं वन्देऽहं गणनायकम् ॥ ८
गणाष्टकमिदं पुण्यं यः पठेत्सततं नरः ।
सिद्ध्यन्ति सर्वकार्याणि विद्यावान्धनवान्भवेत् ॥ ९

॥ इति गणनायकाष्टकं सम्पूर्णम् ॥

॥ एकदन्तस्तोत्रम् ॥

मदासुरं सुशान्तं वै दृष्ट्वा विष्णुमुखाः सुराः ।
भृग्वादयश्च मुनय एकदन्तं समाययुः ॥ १
प्रणम्य तं प्रपूज्यादौ पुनस्तं नेमुरादरात् ।
तुष्टुवुर्हर्षसंयुक्ता एकदन्तं गणेश्वरम् ॥ २

देवर्षय ऊचुः—

सदात्मरूपं सकलादिभूत-
ममायिनं सोहमचिन्त्यबोधम् ।
अनादिमध्यान्तविहीनमेकं
तमेकदन्तं शरणं व्रजामः ॥ ३
अनन्तचिद्रूपमयं गणेशं
ह्यभेदभेदादिविहीनमाद्यम् ।
हृदि प्रकाशस्य धरं स्वधीस्थं
तमेकदन्तं शरणं व्रजामः ॥ ४
विश्वादिभूतं हृदि योगिनां वै
प्रत्यक्षरूपेण विभान्तमेकम् ।

सदा निरालम्बसमाधिगम्यं
तमेकदन्तं शरणं व्रजामः ॥ ५
स्वबिम्बभावेन विलासयुक्तं
बिम्बस्वरूपा रचिता स्वमाया ।
तस्यां स्ववीर्यं प्रददाति यो वै
तमेकदन्तं शरणं व्रजामः ॥ ६
यदीयवीर्येण समर्थभूता
माया तया संरचितं च विश्वम् ।
नादात्मकं ह्यात्मतया प्रतीतं
तमेकदन्तं शरणं व्रजामः ॥ ७
तदीयसत्ताधरमेकदन्तं
गणेशमेकं त्रयबोधितारम् ।
सेवन्त आपुस्तमजं त्रिसंस्था-
स्तमेकदन्तं शरणं व्रजामः ॥ ८
ततस्त्वया प्रेरित एव नाद-
सेनेदमेवं रचितं जगद्वै ।

आनन्दरूपं समभावसंस्थं
तमेकदन्तं शरणं व्रजामः ॥ ९
तदेव विश्वं कृपया तवैव
सम्भूतमाद्यं तमसा विभातम् ।
अनेकरूपं ह्यजमेकभूतं
तमेकदन्तं शरणं व्रजामः ॥ १०
ततस्त्वया प्रेरितमेव तेन
सृष्टं सुसूक्ष्मं जगदेकसंस्थम् ।
सत्त्वात्मकं श्वेतमनन्तमाद्यं
तमेकदन्तं शरणं व्रजामः ॥ ११
तदेव स्वप्नं तपसा गणेश
संसिद्धिरूपं विविधं बभूव ।
सदेकरूपं कृपया तवापि
तमेकदन्तं शरणं व्रजामः ॥ १२
सम्प्रेरितं तच्च त्वया हृदिस्थं
यथा सुसृष्टं जगदंशरूपम् ।

तेनैव जाग्रन्मयमप्रमेयं
तमेकदन्तं शरणं व्रजामः ॥ १३
जाग्रत्स्वरूपं रजसा विभातं
विलोकितं तत्कृपया यदैव ।
तदा विभिन्नं भवत्येकरूपं
तमेकदन्तं शरणं व्रजामः ॥ १४
एवं च सृष्ट्वा प्रकृतिस्वभावा-
तदन्तरे त्वं च विभासि नित्यम् ।
बुद्धिप्रदाता गणनाथ एक-
स्तमेकदन्तं शरणं व्रजामः ॥ १५
त्वदाज्ञया भानि ग्रहाश्च सर्वे
नक्षत्ररूपाणि विभान्ति खे वै ।
आधारहीनानि त्वया धृतानि
तमेकदन्तं शरणं व्रजामः ॥ १६
त्वदाज्ञया सृष्टिकरो विधाता
त्वदाज्ञया पालक एव विष्णुः ।

त्वदाज्ञया संहरको हरोऽपि
तमेकदन्तं शरणं व्रजामः ॥ १७

यदाज्ञया भूर्जलमध्यसंस्था
यदाज्ञयाऽपः प्रवहन्ति नद्यः ।
सीमां सदा रक्षति वै समुद्र-
स्तमेकदन्तं शरणं व्रजामः ॥ १८

यदाज्ञया देवगणो दिविस्थो
ददाति वै कर्मफलानि नित्यम् ।
यदाज्ञया शैलगणोऽचलो वै
तमेकदन्तं शरणं व्रजामः ॥ १९

यदाज्ञया शेष इलाधरो वै
यदाज्ञया मोहप्रदश्च कामः ।
यदाज्ञया कालधरोऽर्यमा च
तमेकदन्तं शरणं व्रजामः ॥ २०

यदाज्ञया वाति बिभाति वायु-
र्यदाज्ञयाऽग्निर्जठरादिसंस्थः ।

यदाज्ञया वै सचराचरं च
तमेकदन्तं शरणं व्रजामः ॥ २१

सर्वान्तरे संस्थितमेकगूढं
यदाज्ञया सर्वमिदं विभाति ।
अनन्तरूपं हृदि बोधकं वै
तमेकदन्तं शरणं व्रजामः ॥ २२

यं योगिनो योगबलेन साध्यं
कुर्वन्ति तं कः स्तवनेन स्तौति ।
अतः प्रणामेन सुसिद्धिदोऽस्तु
तमेकदन्तं शरणं व्रजामः ॥ २३

गृत्समद उवाच—

एवं स्तुत्वा च प्रह्लाद देवाः समुनयश्च वै ।
तूष्णीम्भावं प्रपद्येव ननृतुर्हर्षसंयुताः ॥ २४

॥ इति एकदन्तस्तोत्रं सम्पूर्णम् ॥

॥ महागणपतिस्तोत्रम् ॥

योगं योगविदां विधूतविविधव्यासङ्गशुद्धाशय-
प्रादुर्भूतसुधारसप्रसृमरध्यानास्पदाध्यासिनाम् ।
आनन्दप्लवमानबोधमधुरामोदच्छटामेदुरं
तं भूमानमुपास्महे परिणतं दन्तावलास्यात्मना ॥ १

तारश्रीपरशक्तिकामवसुधारूपानुगं यं विदु-
स्तस्मै स्तात्प्रणतिर्गणाधिपतये यो रागिणाभ्यर्थ्यते ।
आमन्त्र्य प्रथमं वरेति वरदेत्यार्तेन सर्वं जनं
स्वामिन्मे वशमानयेति सततं स्वाहादिभिः पूजितः॥

कल्लोलाञ्चलचुम्बितास्बुदततविश्रुद्रवाम्भोनिधौ
द्वीपे रत्नमये सुरद्रुमवनामोदैकमेदस्विनि ।
मूले कल्पतरोर्महामणिमये पीठेऽम्बुराम्भोरुहे
षट्कोणाकलितत्रिकोणरचनासत्कर्णिकेऽमुं भजे ॥

चक्रप्रासरसालकार्मुकगदासद्बीजपूरद्विज
व्रीह्यग्रोत्पलपाशपङ्कजकरं शुण्डाग्रजाग्रद्घटम् ।

आश्लिष्टं प्रियया सरोजकरया रत्नस्फुरद्भूषया
माणिक्यप्रतिमं महागणपतिं विश्वेशमाशास्महे ॥ ४
दानाम्भःपरिमेदुरप्रसृमरव्यालम्बिरोलम्बभृ-
त्सिन्दूरारुणगण्डमण्डलयुगव्याजात्प्रशस्तिद्वयम् ।
त्रैलोक्येष्टविधानवर्णसुभगं यः पद्मरागोपमं
धत्ते स श्रियमातनोतु सततं देवो गणानां पतिः ॥
भ्राम्यन्मन्दरघूर्णनापरवशक्षीराब्धिवीचिच्छटा-
सच्छायाधवलचामरव्यतिकरश्रीगर्वसर्वंकषाः ।
दिक्कान्ताघनसारचन्दनरसासाराः श्रयन्तां मनः
स्वच्छन्दप्रसरप्रलिप्तवियतो हेरम्बदन्तत्विषः ॥ ६
मुक्ताजालकरम्बितप्रविकसन्माणिक्यपुञ्जच्छटा
कान्ताः कन्दुकदम्बचुम्बितवनाभोगप्रवालोपमाः
ज्योत्स्नापूरतरङ्गमन्थरतरस्सन्ध्यावयस्याश्चिरं
हेरम्बस्य जयन्ति दन्तकिरणाकीर्णाः शरीरत्विषः ॥
शुण्डाग्राकलितेन हेमकलशेनावर्जितेन क्षर-
न्नानारत्नचयेन साधकजनान्सम्भावयन्कोटिशः ।

दानामोदविनोदलुब्धमधुपप्रोत्सारणाविर्भव-
त्कर्णान्दोलनखेलनो विजयते देवो गणग्रामणीः ॥८॥
हेरम्बं प्रणमामि यस्य पुरतः शाण्डिल्यमूले श्रिया
बिभ्रत्याम्बुरुहेसमं मधुरिपुस्ते शङ्खचक्रे वहन् ।
न्यग्रोधस्य तले सहाद्रिसुतया शम्भुस्तया दक्षिणे
बिभ्राणः परशुं त्रिशूलमितया देव्या धरण्या सह ॥
पश्चात्पिप्पलमाश्रितो रतिपतिर्देवस्य रत्योत्पले
बिभ्रत्या सममैक्षवं धनुरिषून्पौष्पान्वहन्पञ्च च ।
वामे चक्रगदाधरः स भगवान्क्रोडः प्रियागोस्तले
हस्ताद्यच्छुकशालिमञ्जरिकया देव्या धरण्या सह ॥
षट्कोणाश्रिषु षट्सु षट्गजमुखाः पाशाङ्कुशाभीवरा-
न्बिभ्राणाः प्रमदासखाः पृथुमहाशोणाश्मपुञ्जत्विषः ।
आमोदः पुरतः प्रमोदसुमुखौ तं चाभितो दुर्मुखः
पश्चात्पार्श्वगतोऽस्य विघ्न इति यो यो विघ्नकर्तेति च ॥
आमोदादिगणेश्वरप्रियतमास्तत्रैव नित्यं स्थिताः
कान्ताश्लेषरसज्ञमन्थरदृशः सिद्धिः समृद्धिस्ततः ।

कान्तिर्या मदनावतीत्यपि तथा कल्पेषु या गीयते
सान्या यापि मदद्रवा तदपरा द्राविण्यमूः पूजिताः ॥
आश्लिष्टौ वसुधेत्यथो वसुमती ताभ्यां सितालोहितौ
वर्षन्तौ वसुपार्श्वयोर्विलसतस्तौ शङ्खपद्मौ निधी ।
अङ्गान्यन्वथ मातरश्च परितः शक्रादयोऽङ्गाश्रया-
स्तद्वाहे कुलिशादयः परिपतत्कालानलज्योतिषः ॥
इत्थं विष्णुशिवादितत्त्वतनवे श्रीवक्रतुण्डाय हुं-
काराक्षिप्तसमस्तदैत्यपृतनात्राताय दीप्तास्विषे ।
आनन्दैकरसावबोधलहरीविध्वस्तसर्वांमये
सर्वत्र प्रथमानमुग्धमहसे तस्मै परस्मै नमः ॥ १४
सेवाहेवाकिदेवासुरनरनिकरस्फारकोटीरकोटी-
कोटिव्याटीकमानद्युमणिसममणिश्रेणिभावेणिकानाम्।
राजन्नीराजनश्रीमुखचरण-
नखद्योतविद्योतमानः
श्रेयः स्थेयः स देयान्मम
विमलदृशो बन्धुरं सिन्धराजः ॥ १५

एतेन प्रकटरहस्यमन्त्रमाला
गर्भेण स्फुटतरसंविदा स्तवेन ।
यः स्तौति प्रचुरतरं महागणेशं
तस्येयं भवति वशंवदा त्रिलोकी ॥ १६

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीराघवचैतन्यविरचितं
॥ महागणपतिस्तोत्रं समाप्तम् ॥

॥ गणेशपञ्चरत्नम् ॥

मुदा करात्तमोदकं सदा विमुक्तिसाधकं
कलाधरावतंसकं विलासिलोकरञ्जकम् ।
अनायकैकनायकं विनाशितेभदैत्यकं
नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १

नतेतराविभीकरं नवोदितार्कभास्वरं
नमत्सुरारिनिर्जरं नताधिकापदुद्धरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं
महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरं
दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करं
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३

अकिंचनार्तिमार्जनं चिरन्तनोक्तिभाजनं
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् ।

प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं
कपोलदानवारणं भजे पुराणवारणम् ॥ ४

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजं
अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेव योगिनां
तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥ ५

महागणेशपञ्चरत्नमादरेण योऽन्वहं
प्रजल्पति प्रभातके हृदि स्मरन्गणेश्वरम् ।
अरोगतामदोषतां सुसाहितीं सुपुत्रतां
समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात् ॥ ६

इति श्रीपरमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
॥ श्रीशङ्करभगवतः कृतौ गणेशपञ्चरत्नं समाप्तम् ॥

॥ गणेशभुजङ्गम् ॥

रणत्क्षुद्रघण्टानिनादाभिरामं
चलत्ताण्डवोद्दण्डवत्पद्मतालम् ।
लसत्तुन्दिलाङ्गोपरिव्यालहारं
गणाधीशमीशानसूनुं तमीडे ॥ १

ध्वनिर्ध्वंसवीणालयोल्लासिवक्त्रं
स्फुरच्छुण्डदण्डोल्लसद्बीजपूरम् ।
गलद्दर्पसौगन्ध्यलोलिमालं
गणाधीशमीशानसूनुं तमीडे ॥ २

प्रकाशज्जपारक्तरत्नप्रसून
प्रवालप्रभातारुणज्योतिरेकम् ।
प्रलम्बोदरं वक्रतुण्डैकदन्तं
गणाधीशमीशानसूनुं तमीडे ॥ ३

विचित्रस्फुरद्रत्नमालाकिरीटं
किरीटोल्लसच्चन्द्ररेखाविभूषम् ।

विभूषैकभूषं भवध्वंसहेतुं
गणाधीशमीशानसूनुं तमीडे ॥ ४
उदञ्चद्भुजावल्लरीदृश्यमूलो
वलद्वल्लता विभ्रमभ्राजदक्षम् ।
मरुत्सुन्दरीचामरैः सेव्यमानं
गणाधीशमीशानसूनुं तमीडे ॥ ५
स्फुरन्निष्ठुरालोलपिङ्गाक्षितारं
कृपाकोमलोदारलीलावतारम् ।
कलाबिन्दुगं गीयते योगिवर्यै-
र्गणाधीशमीशानसूनुं तमीडे ॥ ६
यमेकाक्षरं निर्मलं निर्विकल्पं
गुणातीतमानन्दमाकारशून्यम् ।
परं परमोङ्कारमाम्नायगर्भं
वदन्ति प्रगल्भं पुराणं तमीडे ॥ ७
चिदानन्दसान्द्राय शान्ताय तुभ्यं
नमो विश्वकर्त्रे च हर्त्रे च तुभ्यम् ।

नमोऽनन्तलीलाय कैवल्यभासे
नमो विश्वबीज प्रसीदेशसूनो ॥ ८

इमं संस्तवं प्रातरुत्थाय भक्त्या
पठेद्यस्तु मर्त्यो लभेत्सर्वकामान् ।
गणेशप्रसादेन सिद्ध्यन्ति वाचो
गणेशे विभौ दुर्लभं किं प्रसन्ने ॥ ९

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
॥ श्रीशङ्करभगवतः कृतौ गणेशभुजङ्गस्तोत्रं सम्पूर्णम् ॥



॥ बृहत्स्तोत्ररत्नाकरः ॥

॥ अथ सुब्रह्मण्याष्टोत्तरशतनामस्तोत्रम् ॥

शक्तिहस्तं विरूपाक्षं शिखिवाहं षडाननम् ।
दारुणं रिपुरोगघ्नं भावये कुक्कुटध्वजम् ॥

(इति ध्यानम् .)

स्कन्दो गुहःषण्मुखश्च फालनेत्रसुतः प्रभुः ।
पिङ्गळः कृत्तिकासूनुः शिखिवाहो द्विषड्भुजः ॥ १
द्विषण्णेत्रश्शक्तिधरः पिशिताशप्रभञ्जनः ।
तारकासुरसंहारी रक्षोबळविमर्दनः ॥ २
मत्तः प्रमत्तोन्मत्तश्च सुरसैन्यसुरक्षकः ।
देवसेनापतिः प्राज्ञः कृपाळुर्भक्तवत्सलः ॥ ३
उमासुतश्शक्तिधरः कुमारः क्रौञ्चदारणः ।

सेनानीरग्निजन्मा च विशाखः शङ्करात्मजः ॥ ४
शिवस्वामी गणस्वामी सर्वस्वामी सनातनः ।
अनन्तशक्तिरक्षोभ्यः पार्वतीप्रियनन्दनः ॥ ५
गङ्गासुतश्शरोद्भूत आहूतः पावकात्मजः ।
जृम्भः प्रजृम्भ उज्जृम्भः कमलासनसंस्तुतः ॥ ६
एकवर्णो द्विवर्णश्च त्रिवर्णस्सुमनोहरः ।
चतुर्वर्णः पञ्चवर्णः प्रजापतिरहर्पतिः ॥ ७
अग्निगर्भश्शमीगर्भो विश्वरेतास्सुरारिहा ।
हरिद्वर्णश्शुभकरो वटुश्च पटुवेषभृत् ॥ ८
पूषा गभस्तिर्गहनश्चन्द्रवर्णः कलाधरः ।
मायाधरो महामायी कैवल्यश्शङ्करात्मजः ॥ ९
विश्वयोनिरमेयात्मा तेजोनिधिरनामयः ।
परमेष्ठी परब्रह्मा वेदगर्भो विराट्सुतः ॥ १०
पुलिन्दकन्याभर्ता च महासारस्वतावृतः ।
आश्रिताखिलदाताच रोगघ्नो रोगनाशनः ॥ ११

अनन्तमूर्तिरानन्दः शिखण्डिकृतकेतनः ।
डम्भः परमडम्भश्च महाडम्भो वृषाकपिः ॥ १२
कारणोत्पत्तिदेहश्च कारणातीतविग्रहः ।
अनीश्वरोऽमृतः प्राणः प्राणायामपरायणः ॥ १३
विरुद्धहन्ता वीरघ्नः रक्तश्यामगळोऽपि च ।
सुब्रह्मण्यो महः प्रीतः ब्राह्मण्यो ब्राह्मणप्रियः ॥ १४
वंशवृद्धिकरो वेदवेद्योऽक्षयफलप्रदः ॥

॥ सुब्रह्मण्याष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ अथ सुब्रह्मण्यसहस्रनामस्तोत्रम् ॥

ऋषयः—

सर्वशास्त्रार्थतत्त्वज्ञ सर्वलोकोपकारक ।
वयं चातिथयः प्राप्ता आतिथेयोऽसि सुव्रत ॥ १
ज्ञानदानेन संसारसागरात्तारयस्व नः ।
कलौ कलुषचित्ता ये नराः पापरतास्सदा ॥ २
केन स्तोत्रेण मुच्यन्ते सर्वपातकबन्धनैः ।
इष्टसिद्धिकरं पुण्यं दुःखदारिद्र्यनाशनम् ॥ ३
सर्वरोगहरं स्तोत्रं सूत नो वक्तुमर्हसि ।

सूतः—

शृणुध्वं ऋषयस्सर्वे नैमिशारण्यवासिनः ॥ ४
तत्त्वज्ञास्तपसा निष्ठास्सर्वशास्त्रविशारदाः ।
स्वयम्भुवा पुरा प्रोक्तं नारदाय महात्मने ॥ ५
तदहं संप्रवक्ष्यामि श्रोतुं कौतूहलं यदि ।

ऋषयः—

किमाह भगवान्ब्रह्मा नारदाय महात्मने ॥ ६

सूतपुत्र महाभाग वक्तुमर्हसि साम्प्रतम् ।

सूतः—

दिव्यसिंहासनासीनं सर्वदेवैरभिष्टुतम् ॥ ७
साष्टाङ्गं प्रणिपत्यैनं ब्रह्माणं भुवनेश्वरम् ।
नारदः परिपप्रच्छ कृताञ्जलिरुपस्थितः ॥ ८

नारदः—

लोकनाथ सुरश्रेष्ठ सर्वज्ञ करुणाकर ।
षण्मुखस्य परं स्तोत्रं पावनं पापनाशनम् ॥ ९
हे धातः पुत्रवात्सल्यात्तद्वद प्रणताय मे ।
उपदिष्टा तु मामव रक्ष रक्ष कृपानिधे ॥ १०

ब्रह्मा—

शृणु वक्ष्यामि देवर्षे स्तवराजमिदं परम् ।
मातृकामालिकायुक्तं ज्ञानमोक्षसुखप्रदम् ॥ ११
सहस्राणि च नामानि षण्मुखस्य महात्मनः ।
यानि नामानि दिव्यानि दुःखरोगहराणि च ॥ १२
जपमात्रेण सिध्यन्ति मनसा चिन्तितान्यपि ।

इहामुत्र परं भोगं लभते नात्र संशयः ॥ १३
इदं स्तोत्रं परं पुण्यं कोटियज्ञफलप्रदम् ।
सन्देहो नात्र कर्तव्यः शृणु मे निश्चितं वचः ॥१४

ओं अस्य श्रीसुब्रह्मण्यसहस्रनामस्तोत्रमाला-मन्त्रस्य, ब्रह्मा ऋषिः, अनुष्टुप्छन्दः, सुब्रह्मण्यो देवता । शरजन्मा क्षय इति बीजम् । शक्तिधरः क्षयः कार्तिकेय इति शक्तिः । क्रौञ्चधर इतिकीलकम् । शिखिवाहन इति कवचम् । षण्मुखाय इति ध्यानम् । श्रीसुब्रह्मण्यप्रसाद-सिद्ध्यर्थे जपे विनियोगः । ओं शं ओंकारस्वरूपाय ओजोधराय ओजस्विने नमस्संहृताय इष्ट-चित्तात्मने भास्वररूपाय अङ्गुष्ठाभ्यां नमः । रं षट्कोणमध्यनिलयाय षट्किरीटधराय श्रीमते षडाधाराय तर्जनीभ्यां नमः । हं षण्मुखाय शरजन्मने सुमङ्गलाय शिखिवाहनाय मध्यमाभ्यां नमः । णं कृशानुसम्भवाय कवचिने कुक्कुटध्वजाय अनामि-

काभ्यां नमः । भं कन्दर्पकोटिदीप्यमानाय द्विषड्-बाहवे द्वादशाक्षाय कनिष्ठिकाभ्यां नमः । वं खेटधराय खड्गिने शक्तिहस्ताय करतलकरपृष्ठाभ्यां नमः । ओं शं ओंकारस्वरूपाय ओजोधराय ओज-स्विने नमस्संहृताय इष्टचित्तात्मने भास्वररूपाय हृदयाय नमः । रं षट्कोणमध्यनिलयाय षट्किरीट-धराय श्रीमते षडाधाराय शिरसे स्वाहा । हं षण्मुखाय शरजन्मने शुभलक्षणाय शिखिवाहनाय शिखायै वौषट् । णं कृशानुसम्भवाय कवचिने कुक्कुटध्वजाय कवचाय हुम् । भं कन्दर्पकोटिदीप्य-मानाय द्विषड्बाहवे द्वादशाक्षाय नेत्रत्रयाय वौषट् । वं खेटधराय खड्गिने शक्तिहस्ताय अस्त्राय फट् । ओं भूर्भुवस्सुवरोमिति दिग्बन्धः । ध्यानम् ।

ध्याये षण्मुखमिन्दुकोटिसदृशं रत्नप्रभाशोभितं
बालार्कद्युतिषट्किरीटविलसत्केयूरहारान्वितम् ।

कर्णालम्बितकुण्डलप्रविलसद्दण्डस्थलाशोभितं
किञ्चित्कङ्कणकिङ्किणीरवयुतं शृङ्गारसारोदयम् ॥ १
ध्यायेदीप्सितसिद्धिदं शिवसुतं श्रीद्वादशाक्षं गुहं
खेटं कुक्कुटमङ्कुशं च वरदं पाशं धनुश्चक्रकम् ।
वज्रं शक्तिमसिं च शूलमभयं दोर्भिर्धृतं षण्मुखं
ध्यायेच्चित्रमयूरवाहनशुभं चित्राम्बरालङ्कृतम् ॥ २

(इति ध्यानम् ।)

॥ सहस्रनामप्रारम्भः ॥

ओं अचिन्त्यशक्तिरनघस्त्वक्षोभ्यो ह्यपराजितः ।
अनाथवत्सलोऽमोघस्त्वशोकोऽप्यजरोऽभयः ॥ १
अत्युदारोऽप्यघहरोऽप्यग्रगण्योऽद्रिजासुतः ।
अनन्तमहिमाऽपारोऽनन्तसौख्यप्रदोऽव्ययः ॥ २
अनन्तमोक्षदोऽनादिरप्रमेयोऽक्षरोऽच्युतः ।
अकल्मषोऽभिरामोऽप्रधृर्यश्चामितविक्रमः ॥ ३
अतुलस्त्वमृतो घोरस्त्वनन्तोऽनन्तविक्रमः ।

अनाथनाथो ह्यमलो ह्यप्रमत्तोऽमरप्रभुः ॥ ४
अरिन्दमोऽखिलाधारस्त्वणिमादिगुणाग्रणीः ।
अचञ्चलोऽमरस्तुत्यो ह्यकळङ्कोऽमिताशनः ॥ ५
अग्निभूरनवद्याङ्गो ह्यद्भुतोऽभीष्टदायकः ।
अतीन्द्रियोऽप्रमेयात्मा ह्यदृश्योऽव्यक्तलक्षणः ॥ ६
आपद्विनाशकस्त्वार्यश्चाढ्यस्त्वागमसंस्तुतः ।
आर्तसंरक्षणस्त्वाद्यस्त्वानन्दस्त्वार्यसेवितः ॥ ७
आश्रितेष्टार्थवरदो ह्यानन्द्यार्तफलप्रदः ।
आश्चर्यरूपस्त्वानन्द आपन्नार्तिविनाशनः ॥ ८
इभवक्त्रानुजस्त्विष्टस्त्विभासुरहरात्मजः ।
इतिहासश्रुतिस्तुत्य इन्द्रभोगफलप्रदः ॥ ९
इष्टापूर्तफलप्राप्तिरिष्टेष्टवरदायकः ।
इहामुत्रेष्टफलदस्त्विष्टदस्त्विन्द्रवन्दितः ॥ १०
ईडनीयस्त्वीशपुत्र ईप्सितार्थप्रदायकः ॥
ईतिभीतिहरश्चेड्य ईषणात्रयवर्जितः ॥ ११
उदारकीर्तिरुद्योगी चोत्कृष्टोरुपराक्रमः ।

उत्कृष्टशक्तिरुत्साह उदारश्चोत्सवप्रियः ॥ १२
उज्जृम्भश्चोद्भवश्चोग्रश्चोदग्रश्चोग्रलोचनः ।
उन्मत्तश्चोग्रशमन उद्वेगघ्नोरगेश्वरः ॥ १३
उरुप्रभावश्चोदीर्णश्चोमासूनुरुदारधीः ।
ऊर्ध्वरेतस्सुतस्तूर्ध्वगतिदस्तूर्विपालकः ॥ १४
ऊर्जितस्तूर्ध्वगस्तूर्ध्व ऊर्ध्वलोकैकनायकः ।
ऊर्जस्वानूर्जितोदारस्तूर्जितोर्जितशासनः ॥ १५
ऋषिदेवगणस्तुत्यो ऋणत्रयविमोचनः ।
ऋजुरूपो ऋजुकरो ऋजुमार्गप्रदर्शकः ॥ १६
ऋतम्भरो ऋजुप्रीतो ऋषभो ऋत्थितो ऋचः ।
ॡकारोद्धारको ॡतभवपाशप्रभञ्जनः ॥ १७
एणाङ्कधरसत्पुत्रस्त्वेक एनौघनाशनः ।
ऐश्वर्यदश्चैन्द्रभोगी चैदिहश्चैन्द्रवद्युतिः ॥ १८
ओजस्वी चौषधीस्थानश्चोजोदश्चोदनप्रियः ।
औदासीनस्त्वौपमेय औग्रस्त्वौन्नत्यदायकः ॥ १९

औदार्यस्त्वौषधाकारस्त्वौषस्त्वौषधधारकः ।
अंशुमाल्यंशुमालाढ्य अम्बिकातनयोऽव्ययः ॥ २०
अन्धकारिसुतोऽन्धत्वहारीत्वम्बुजलोचनः ।
अस्तमायोऽमराधीशो ह्यस्पष्टोऽस्तोकपुण्यदः ॥ २१
अस्तामित्रोऽस्तरूपश्चास्खलत्सुगतिदायकः ।
कार्तिकेयः कामरूपः कुमारः क्रौञ्चदारणः ॥ २२
कामदः कारणः काम्यः कमनीयः कृपाकरः ।
काञ्चनाभः कान्तियुक्तः कामी कामप्रदः कविः ॥
कीर्तिकृत् कुक्कुटधरः कूटस्थः कुवलेक्षणः ।
कुङ्कुमाङ्गकुमहरः कुशलः कुक्कुटध्वजः ॥ २४
कृशानुसम्भवः क्रूरः क्रूरघ्नः कलितापहृत् ।
कामरूपः कल्पतरुः कान्तः कामितदायकः ॥ २५
कल्याणकृत् क्लेशनाशः कृपालुः करुणाकरः ।
कलुषघ्नः क्रियाशक्तिः कठोरः कवची कृतिः ॥ २६
कोमलाङ्गः कुशप्रीतः कुत्सितघ्नः कलाधरः ।
ख्यातः खेटधरः खड्गी खट्वाङ्गी खलनिग्रहः ॥ २७

ख्यातिप्रदः खेचरेशः ख्यातेहः खेचरस्तुतः ।
खरतापहरः खस्थः खेचरः खेचराश्रयः ॥ २८
खण्डेन्दुमौलितनयः खेलत्खेचरपालकः ।
खलः खण्डितार्कश्च खेचरीजनपूजितः ॥ २९
गाङ्गेयो गिरिजापुत्रो गणनाथानुजो गुहः ।
गोप्ता गीर्वाणसंसेव्यो गुणातीतो गुहाश्रयः ॥ ३०
गतिप्रदो गुणनिधिर्गम्भीरो गिरिजात्मजः ।
गूढरूपो गदहरो गुणाधीशो गुणाग्रणीः ॥ ३१
गोधरो गहनो गुप्तो गर्वघ्नो गुणवर्धनः ।
गुह्यो गुणज्ञो गीतज्ञो गतातङ्को गुणाश्रयः ॥ ३२
गद्यपद्यप्रियो गुण्यो गोस्तुतो गगनेचरः ।
गणनीयचरित्रश्च गतक्लेशो गुणार्णवः ॥ ३३
घूर्णिताक्षो घृणिनिधिः घनगम्भीरघोषणः ।
घण्टानादप्रियो घोराघौघनाशो घनप्रियः ॥ ३४
घनानन्दो घर्महन्ता घृणिवान् घृष्टिपातकः ।
घृणी घृणाकरो घोषो घोरदैत्यप्रहारकः ॥ ३५

घटितैश्वर्यसन्दोहो घनार्थी घनसंक्रमः ।
चित्रकृत् चित्रवर्णश्च चञ्चलश्चपलद्युतिः ॥ ३६
चिन्मयश्चित्स्वरूपश्च चिदानन्दश्चिरंतनः ।
चित्रचेलश्चित्रथश्चिन्तनीयश्चमत्कृतः ॥ ३७
चोरघ्नश्चतुरश्चारुचामीकरविभूषणः ।
चन्द्रार्ककोटिसदृशश्चन्द्रमौलितनूभवः ॥ ३८
छादिताङ्गश्छलघ्नहन्ता छेदिताखिलपातकः ।
छेदीकृततमःक्लेशः छत्रीकृतमहायशाः ॥ ३९
छादिताशेषसन्तापश्चरितामृतसागरः ।
छन्नत्रैगुण्यरूपश्च छातेहश्छिन्नसंशयः ॥ ४०
छन्दोमयश्छन्नगामी छिन्नपाशश्छविच्छदः ।
जगद्धितो जगत्पूज्यो जगज्ज्येष्ठो जगन्मयः ॥ ४१
जनको जाह्नवीसूनुर्जितामित्रो जगद्गुरुः ।
जयी जितेन्द्रियो जैत्रो जरामरणवर्जितः ॥ ४२
ज्योतिर्मयो जगन्नाथो जगज्जीवो जनाश्रयः ।
जगत्सेव्यो जगत्कर्ता जगत्साक्षी जगत्प्रियः ॥ ४३

जन्मारिवन्द्यो जयदो जगज्जनमनोहरः ।
जगदानन्दजनको जनजाड्यापहारकः ॥ ४४
जपाकुसुमसङ्काशो जनलोचनशोभनः ।
जनेश्वरो जितक्रोधो जनजन्मनिवर्हणः ॥ ४५
जयदो जन्तुतापघ्नो जितदैत्यमहाव्रजः ।
जितमायो जितक्रोधो जितजम्भो जनप्रियः ॥ ४६
झंझानिलमहावेगो झरिताशेषपातकः ।
झर्झरीकृतदैत्यौघो झल्लरीवाद्यसंप्रियः ॥ ४७
ज्ञानमूर्तिर्ज्ञानगम्यो ज्ञानी ज्ञानमहानिधिः ।
टङ्कारनृत्यविभवष्टङ्कवज्रध्वजाङ्कितः ॥ ४८
टङ्कितखिललोकश्च टङ्कितैनस्तमोरविः ।
डम्बरप्रभवो डम्बो डमड्डमरुकप्रियः ॥ ४९
डमरोत्कटसन्नादो डमरोत्कटजाण्डजः ।
ढक्कानादप्रीतिकरो ढुळितासुरसङ्कुलः ॥ ५०
ढाकितामरसन्दोहो ढुण्ढीविघ्नेश्वरानुजः ।
तत्त्वज्ञस्तत्त्वगस्तीव्रस्तपोरूपस्तपोमयः ॥ ५१

ॐ

त्रयीमयस्त्रिकालज्ञस्त्रिमूर्तिस्त्रिगुणात्मकः ।
त्रिदशेशस्तारकारिस्तापन्नस्तापसप्रियः ॥ ५२

तुष्टिदस्तुष्टिकृत्तीक्ष्णस्तपोरूपस्त्रिकालवित् ।
स्तोता स्तव्यः स्तवप्रीतस्तुतस्तोत्रस्तुतिप्रियः ॥ ५३

स्थितिस्थायी स्थापकश्च स्थूलसूक्ष्मप्रदर्शकः ।
स्थविष्ठः स्थविरः स्थूलः स्थानदः स्थैर्यदः स्थिरः ॥

दान्तो दयापरो दाता दुरितघ्नो दुरासदः ।
दर्शनीयो दयासारो देवदेवो दयानिधिः ॥ ५५

दुराधर्षो दुर्विगाह्यो दक्षो दर्पणशोभितः ।
दुर्धरो दानशीलश्च द्वादशाक्षो द्विषद्भुजः ॥ ५६

द्विषट्कर्णो द्विषड्बाहुर्दीनसन्तापनाशनः ।
दन्दशूकेश्वरो देवो दिव्यो दिव्याकृतिर्दमः ॥ ५७

दीर्घवृत्तो दीर्घबाहुर्दीर्घदृष्टिर्दिवस्पतिः ।
दण्डो दमयिता दर्पो देवसिंहो दृढव्रतः ॥ ५८

दुर्लभो दुर्गमो दीप्तो दुष्प्रेक्ष्यो दिव्यमण्डनः ।
दुरोदरघ्नो दुःखघ्नो दुरितघ्नो दिशांपतिः ॥ ५९

दुर्जयो देवसेनेशो दुर्ज्ञेयो दुरतिक्रमः ।
दम्भो दृप्तो देवऋषिर्दैवज्ञो दैवचिन्तकः ॥ ६०
धुरन्धरो धर्मधरो धनदो धृतिवर्धनः ।
धर्मेशो धर्मशास्त्रज्ञो धन्वी धर्मपरायणः ॥ ६१
धनाध्यक्षो धनपतिर्धृतिमान् धृतकिल्बिषः ।
धर्महेतुर्धर्मशूरो धर्मकृद्धर्मविद् ध्रुवः ॥ ६२
धाता धीमान् धर्मचारी धन्यो धुर्यो धृतव्रतः ।
नित्योत्सवो नित्यतृप्तो निर्लेपो निश्चलात्मकः ॥ ६३
निरवद्यो निराधारो निष्कलङ्को निरञ्जनः ।
निर्ममो निरहङ्कारो निर्मोहो निरुपद्रवः ॥ ६४
नित्यानन्दो निरातङ्को निष्प्रपञ्चो निरामयः ।
निरवद्यो निरीहश्च निर्द्वन्द्वो निर्मलात्मकः ॥ ६५
नित्यानन्दो निर्जरेशो निस्सङ्गो निगमस्तुतः ।
निष्कलङ्को निरालम्बो निष्प्रत्यूहो निजोद्भवः ॥ ६६
नित्यो नियतकल्याणो निर्विकल्पो निराश्रयः ।
नता निर्विनैकरूपो निराकारो नदीसुतः ॥ ६७

पुळिन्दकन्यारमणः पुरजित्परमप्रियः ।
प्रत्यक्षमूर्तिः प्रत्यक्षः परेशः पूर्णपुण्यदः ॥ ६८
पुण्याकारः पुण्यरूपः पुण्यः पुण्यपरायणः ।
पुण्योदयः परज्योतिः पुण्यकृत्पुण्यवर्धनः ॥ ६९
परानन्दः परतरः पुण्यकीर्तिः पुरातनः ।
प्रसन्नरूपः पुण्येशः पन्नगः पापनाशनः ॥ ७०
प्रणतार्तिहरः पूर्णः पार्वतीनन्दनः प्रभुः ।
पूतात्मा पुरुषः प्राणः प्रभवः पुरुषोत्तमः ॥ ७१
प्रसन्नः परमस्पष्टः परः परिवृढः परः ।
परमात्मा परब्रह्म परार्थः प्रियदर्शनः ॥ ७२
पवित्रः पुष्टिदः पूर्तिः पिङ्गळः पुष्टिवर्धनः ।
पापहारी पाशधरः प्रमत्तासुरशिक्षकः ॥ ७३
पावनः पावकः पूज्यः पूर्णानन्दः परात्परः ।
पुष्कलः प्रवरः पूर्वः पितृभक्तः पुरोगमः ॥ ७४
प्राणदः प्राणजनकः प्रतिष्ठः पावकोद्भवः ।
परब्रह्मस्वरूपश्च परमैश्वर्यकारणः ॥ ७५

परार्थदः पुष्टिकरः प्रकाशात्मा प्रतापवान् ।
प्रज्ञापरः प्रकृष्टार्थः पृथुः पृथुपराक्रमः ॥ ७६
फणीश्वरः फणिवरः फणामणिभूषणः ।
फलदः फलहस्तश्च फुल्लाम्बुजविलोचनः ॥ ७७
पुटच्छमितपापौघः फणिराजविभूषणः ।
बाहुलेयो ब्रह्मरूपो बलिष्ठो बलवान् बली ॥ ७८
ब्रह्मेशविष्णुरूपश्च बुद्धो बुद्धिमतां वरः ।
बालरूपो ब्रह्मगर्भो ब्रह्मचारी बुधप्रियः ॥ ७९
बहुश्रुतो बहुमतिर्ब्रह्मण्यो ब्राह्मणप्रियः ।
बलप्रमथनो ब्रह्मा बहुरूपो बहुप्रदः ॥ ८०
बृहद्भानुतनूभूतो बृहत्सेनो बिलेशयः ।
बहुबाहुर्बलश्रीमान् बलदैत्यविनाशकः ॥ ८१
बिलद्वारान्तरालस्थो बृहच्छक्तिधनुर्धरः ।
बालार्कद्युतिमान् बालो बृहद्वक्षो बृहत्तनुः ॥ ८२
भव्यो भोगीश्वरो भाव्यो भवनाशो भवप्रियः ।
भक्तिगम्यो भयहरो भावज्ञो भक्तसुप्रियः ॥ ८३

भुक्तिमुक्तिप्रदो भोगी भगवान् भाग्यवर्धनः ।
भ्राजिष्णुर्भावनो भर्ता भीमो भीमपराक्रमः ॥ ८४
भूतिदो भूतिकृद्भोक्ता भूतात्मा भुवनेश्वरः ।
भावको भावकृद्भेषो भावकेष्टो भवोद्भवः ॥ ८५
भवतापप्रशमनो भोगवान् भूतभावनः ।
भोज्यप्रदो भ्रान्तिनाशो भानुमान् भुवनाश्रयः ॥
भूरिभोगप्रदो भद्रो भजनीयो भिषग्वरः ।
महासेनो महोदारो महाशक्तिर्महाद्युतिः ॥ ८७
महाबुद्धिर्महावीर्यो महोत्साहो महाबलः ।
महाभोगी महामायी मेधावी मेखली महान् ॥ ८८
मुनिस्तुतो महामान्यो महानन्दो महायशाः ।
महोर्जितो माननिधिर्मनोरथफलप्रदः ॥ ८९
महोदयो महापुण्यो महाबलपराक्रमः ।
मानदो मतिदो माली मुक्तामालाविभूषणः ॥ ९०
मनोहरो महामुख्यो महर्धिर्मूर्तिमान्मुनिः ।
महोत्तमो महापायो मोक्षदो मङ्गलप्रदः ॥ ९१

मुदाकरो मुक्तिदाता महाभोगो महोरगः ।
यशस्करो योगयोनिर्योगिष्ठो यमिनां वरः ॥ ९२
यज्ञस्त्री योगपुरुषो योग्यो योगनिधिर्यमी ।
यतिसेव्यो योगयुक्तो योगविद्योगसिद्धिदः ॥ ९३
यन्त्रो यन्त्री च यन्त्रज्ञो यन्त्रवान् यन्त्रवाहकः ।
यातनारहितो योगी योगीशो योगिनां वरः ॥ ९४
रमणीयो रम्यरूपो रसज्ञो रसभावकः ।
रञ्जनो रञ्जितो रागी रुचिरो रुद्रसम्भवः ॥ ९५
रणप्रियो रणोदारो रागद्वेषविनाशनः ।
रत्नार्चीरुचिरो रम्यो रूपलावण्यविग्रहः ॥ ९६
रत्नाङ्गदधरो रत्नभूषणो रमणीयकः ।
रुचिकृद्रोचमानश्च रञ्जितो रोगनाशनः ॥ ९७
राजीवाक्षो राजराजो रत्नमाल्यानुलेपनः ।
ऋग्यजुस्सामसंस्तुत्यो रजस्सत्त्वगुणान्वितः ॥ ९८
रजनीशकलारम्यो रत्नकुण्डलमण्डितः ।
रत्नसन्मौलिशोभाढ्यो रणन्मञ्जीरभूषणः ॥ ९९

लोकैकनाथो लोकेशो ललितो लोभनाशकः ।
लोकरक्षो लोकशिक्षो लोकलोचनरञ्जितः ॥ १००
लोकबन्धुर्लोकधाता लोकत्रयसमाहितः ।
लोकचूडामणिर्लोकवन्द्यो लावण्यविग्रहः ॥ १०१
लोकाध्यक्षस्तु लीलावान् लोकोत्तरगुणान्वितः ।
लोकबन्धुर्लोकनाथो लोकत्रयमहाहितः ॥ १०२
वरिष्ठो वरदो वैद्यो विशिष्टो विक्रमो विभुः ।
विबुधाग्रचरो वश्यो विकल्पपरिवर्जितः ॥ १०३
विपाशो विगतातङ्को विचित्राङ्गो विरोचनः ।
विद्याधरो विशुद्धात्मा वेदाङ्गो विबुधप्रियः ॥ १०४
वचस्करो व्यापकश्च विज्ञानी विनयान्वितः ।
विद्वत्तमो विरोधिघ्नो वीरो विगतरागवान् ॥ १०५
वीतभावो विनीतात्मा वेदगर्भो वसुप्रदः ।
विश्वदीप्तिर्विशालाक्षो विजितात्मा विभावनः ॥
वेदवेद्यो विधेयात्मा वीतदोषश्च वेदवित् ।
विश्वकर्मा वीतभयो वागीशो वासवार्चितः ॥१०७

वीरध्वंसो विश्वमूर्तिर्विश्वरूपो वरानन: ।
विशाखो विमलो वाग्मी विद्वान् वेदधरो वटुः ॥
वीरचूडामणिर्वीरो विद्येशो विबुधाश्रयः ।
विजयी विनयी वेत्ता वरीयान् वीरजो वसुः ॥
वीरघ्नो विज्वरो वेद्यो वेगवान् वीर्यवान् वशी ।
वरशीलो वरगुणो विशोको वज्रधारकः ॥ ११०
शरजन्मा शक्तिधरश्शत्रुघ्नश्शिखिवाहनः ।
श्रीमान् शिष्टश्शुचिश्शुद्धश्शाश्वतः श्रुतिसागरः ॥
शरण्यश्शुभदश्शर्मा शिष्टेष्टश्शुभलक्षणः ।
शान्तश्शूलधरः श्रेष्ठश्शुद्धात्मा शङ्करप्रियः ॥ ११२
शितिकण्ठात्मजश्शूरश्शान्तिदश्शोकनाशनः ।
षाण्मातुरष्षण्मुखश्च षड्गुणैश्वर्यसंयुतः ॥ ११३
षट्चक्रष्षड्भिन्नष्षडङ्गश्रुतिपारगः ।
षड्भावरहितष्षट्कष्षट्छास्त्रस्मृतिपारगः ॥ ११४
षड्गुणदाता षड्ग्रीवः षडरिघ्नः षडाश्रयः ।
षट्किरीटधरश्श्रीमान् षडाधारश्च षट्क्रमः ॥ ११५

षट्कोणमध्यनिलयष्षण्डत्वपरिहारकः ।
सेनानीस्सुभगस्स्कन्दस्सुरानन्दस्सतां गतिः ॥ ११६
सुब्रह्मण्यस्सुराध्यक्षस्सर्वज्ञस्सर्वदस्सुखी ।
सुलभस्सिद्धिदस्सौम्यस्सिद्धेशस्सिद्धिसाधनः ॥
सिद्धार्थस्सिद्धसङ्कल्पस्सिद्धस्साधुस्सुरेश्वरः ।
सुभुजस्सर्वदृक्साक्षी सुप्रसादस्सनातनः ॥ ११८
सुधापतिस्स्वयञ्जयोतिस्स्वयम्भूस्सर्वतोमुखः ।
समर्थस्सत्कृतिस्सूक्ष्मस्सुघोषस्सुखदस्सुकृत् ॥ ११९
सुप्रसन्नस्सुरश्रेष्ठस्सुशीलस्सत्त्वसायकः ।
संभाव्यस्सुमनस्सेव्यस्सकलागमपारगः ॥ १२०
सुव्यक्तस्सच्चिदानन्दस्सुवीरस्सुजनाश्रयः ।
सर्वलक्षणसम्पन्नस्सत्यधर्मपरायणः ॥ १२१
सर्वदेवमयस्सत्यस्सदामृष्टान्नदायकः ।
सुधापी सुमनास्सत्यस्सर्वविघ्नविनाशनः ॥ १२२
सर्वदुःखप्रशमनस्सुकुमारस्सुलोचनः ।
सुग्रीवस्सुधृतिस्सारस्सुराराध्यस्सुविक्रमः ॥ १२३

सुरारिघ्नस्त्वर्णवर्णस्त्वर्पराजस्त्वदाशुचिः ।
सप्तार्चिर्भूस्त्वसुरवरस्त्वर्वायुधविशारदः ॥ १२४
हस्तिचर्माम्बरसुतो हस्तिवाहनसेवितः ।
हस्तचित्रायुधधरो हृताघो हसिताननः ॥ १२५
हेमभूषो हरिद्वर्णो हृष्टदो हृष्टिवर्धनः ।
हेमाद्रिभिद्वंसरूपो हुङ्कारो हतकिल्बिषः ॥ १२६
हेमाद्रिजातातनुजो हरिकेशो हिरण्मयः ।
हृद्यो हृष्टो हरिसखो हंसो हंसगतिर्हविः ॥ १२७
हिरण्यवर्णो हितकृत् हर्षदो हेमभूषणः ।
हरप्रियो हितकरो हतपापो हरोद्भवः ॥ १२८
क्षेमदः क्षेमकृत् क्षेम्यः क्षेत्रज्ञः क्षामवर्जितः ।
क्षेत्रपालः क्षमाधारः क्षेमक्षेत्रः क्षमाकरः ॥ १२९
क्षुद्रघ्नः क्षान्तिदः क्षेमः क्षितिभूषः क्षमाश्रयः ।
क्षालिताघः क्षितिधरः क्षीणसंरक्षणक्षमः ॥ १३०
क्षणभङ्गुरसन्नद्धघनशोभी कपर्दकः ।
क्षितिभृन्नाथतनयामुखपङ्कजभास्करः ॥ १३१

इति नाम्नां सहस्राणि षण्मुखस्य च नारद ।
यः पठेच्छृणुयाद्वापि भक्तियुक्तेन चेतसा ॥ १३२
स सद्यो मुच्यते पापैर्मनोवाक्कायसम्भवैः ।
आयुर्वृद्धिकरं पुंसां स्थैर्यवीर्यविवर्धनम् ॥ १३३
वाक्येनैकेन वक्ष्यामि वाञ्छितार्थं प्रयच्छति ।
तस्मात् सर्वात्मना ब्रह्मन् नियमेन जपेत्सुधीः ॥

इति श्रीस्कन्दपुराणे ईश्वरप्रोक्ते ब्रह्मनारदसंवादे
॥ सुब्रह्मण्यसहस्रनामस्तोत्रं संपूर्णम् ॥

॥ अथ सुब्रह्मण्याष्टकम् ॥

हे स्वामिनाथ करुणाकर दीनबन्धो.
श्रीपार्वतीशमुखपङ्कजपद्मबन्धो ।
श्रीशादिदेवगणपूजितपादपद्म
वल्लीसनाथ मम देहि करावलम्बम् ॥ १

देवाधिदेवसुत देवगणाधिनाथ
देवेन्द्रवन्द्यमृदुपङ्कजमञ्जुपाद ।
देवर्षिनारदमुनीन्द्रमुगीतकीर्ते
वल्लीसनाथ मम देहि करावलम्बम् ॥ २

नित्यान्नदाननिरताखिलरोगहारिन्
भाग्यप्रदानपरिपूरितभक्तकाम ।
श्रुत्यागमप्रणववाच्यनिजस्वरूप
वल्लीसनाथ मम देहि करावलम्बम् ॥ ३

क्रौञ्चासुरेन्द्रपरिखण्डन शक्तिशूल-
चापादिशस्त्रपरिमण्डितदिव्यपाणे ।

श्रीकुण्डलीशधरतुण्डशिखीन्द्रवाह
वल्लीसनाथ मम देहि करावलम्बम् ॥ ४
देवाधिदेवरथमण्डलमध्यवेद्य
देवेन्द्रपीठनकरं दृढचापहस्तम् ।
शूरं निहत्य सुरकोटिभिरीड्यमान
वल्लीसनाथ मम देहि करालम्बम् ॥ ५
हारादिरत्नमणियुक्तकिरीटहार
केयूरकुण्डललसत्कवचाभिराम ।
हे वीर तारकजयामरवृन्दवन्द्य
वल्लीसनाथ मम देहि करावलम्बम् ॥ ६
पञ्चाक्षरादिमनुमन्त्रितगाङ्गतोयैः
पञ्चामृतैः प्रमुदितेन्द्रमुखैर्मुनीन्द्रैः ।
पट्टाभिषिक्तहरियुक्त परासनाथ
वल्लीसनाथ मम देहि करावलम्बम् ॥ ७
श्रीकार्तिकेय करुणामृतपूर्णदृष्ट्या
कामादिरोगकलुषीकृतदुष्टचित्तम् ।

सिञ्चत्वा तु मामव कलाधरकान्तिकान्त्या
वल्लीसनाथ मम देहि करावलम्बम् ॥ ८

सुब्रह्मण्याष्टकं पुण्यं ये पठन्ति द्विजोत्तमाः ।
ते सर्वे मुक्तिमायान्ति सुब्रह्मण्यप्रसादतः ॥ ९

सुब्रह्मण्याष्टकमिदं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं तत्क्षणादेव नश्यति ॥ १०

॥ सुब्रह्मण्याष्टकं सम्पूर्णम् ॥

॥ सुब्रह्मण्यभुजङ्गप्रयातम् ॥

भजेऽहं कुमारं भवानीकुमारं
गळोल्लासिहारं नमस्कृद्विहारम् ।
रिपुस्तोमसारं नृसिंहावतारं
सदा निर्विकारं गुहं निर्विचारम् ॥ १

नमामीशपुत्रं जपाशोणगात्रं
सुरारातिशत्रुं रवीन्द्वग्निनेत्रम् ।
महाबर्हिपत्त्रं शिवास्याब्जमित्रं
प्रभासत्कळत्रं पुराणं पवित्रम् ॥ २

अनेकार्ककोटिप्रभावज्वलन्तं
मनोहारिमाणिक्यभूषोज्ज्वलं तम् ।
श्रितानामभीष्टं सुशान्तं नितान्तं
भजे षण्मुखं तं शरच्चन्द्रकान्तम् ॥ ३

कृपावारिकल्लोलभास्वत्कटाक्षं
विराजन्मनोहारिशोणाम्बुजाक्षम् ।

प्रयोगप्रदानप्रवाहैकदक्षं
भजे कान्तिकान्ताम्बरस्तोमरक्षम् ॥ ४
सुकस्तूरिकाबिन्दुभास्वल्ललाटं
दयापूर्णचित्तं महादेवपुत्रम् ।
रवीन्दूल्लसद्रत्नराजत्किरीटं
भजे क्रीडिताकाशगङ्गासुकूटम् ॥ ५
मुकुन्दप्रसूनावलीशोभितान्तं
शरत्पूर्णचन्द्रस्य षट्कान्तिकान्तम् ।
शिरीषप्रसूनाभिरामं भवन्तं
भजे देवसेनापतिं वल्लभं तम् ॥ ६
सुलावण्यसत्सूर्यकोटिप्रकाशं
प्रभुं तारकारिं द्विषड्बाहुमीशम् ।
निजार्कप्रभादीप्यमानाखिलाशं
भजे पार्वतीप्राणपुत्रं सुकेशम् ॥ ७
अजं सर्वलोकप्रियं लोकनाथं
गुहं शूरपद्मादिदम्भोलिधारम् ।

सुबाहुं सुनासापुटं सच्चरित्रं
भजे कार्तिकेयं सदा बाहुलेयम् ॥ ८

शरारण्यसम्भूतमिन्द्रादिवन्द्यं
द्विषड्बाहुसङ्घायुधश्रेणिरम्यम् ।
मरुत्सारथिं कुक्कुटेशं सुकेतुं
भजे योगिहृत्पद्ममध्याधिवासम् ॥ ९

विरिंचीन्द्र वह्नीशचीदेवेशमुख्य
प्रशस्तामरस्तोमसंस्तूयमान ।
दिश त्वं दयाळो श्रियं निश्चलां मे
विना त्वां गतिः का प्रभो मे प्रसीद ॥ १०

पदाम्भोजसेवासमायातबृन्दारक-
श्रेणिकोटीरभास्वल्ललाटम् ।
कळत्रोल्लसत्पार्श्वयुग्मं वरेण्यं
भजे देवमाद्यं त्वहीनप्रभावम् ॥ ११

भवाम्भोधिमध्ये तरङ्गे पतन्तं
प्रभो मां सदा पूर्णदृष्ट्या समीक्ष्य ।

भवद्भक्तिनावोद्धर त्वं दयालो
सुगत्यन्तरं नास्ति देव प्रसीद ॥ १२

गले रत्नभूषं तनौ मञ्जुवेषं
करे ज्ञानशक्तिं दरस्मेरमास्ये ।
कटिन्यस्तपाणिं शिखिस्थं कुमारं
भजेऽहं गुहादन्यदैवं न मन्ये ॥ १३

दयाहीनचित्तं परद्रोहपात्रं
सदा पापशीलं गुरोर्भक्तिहीनम् ।
अनन्यावलम्बं भवन्नेत्रपात्रं
कृपाशील मां भो पवित्रं कुरु त्वम् ॥ १४

महासेन गाङ्गेय वल्लीसहाय
प्रभो तारकारे षडास्यामरेश ।
सदा पायसान्नप्रदातर्गुहेति
स्मरिष्यामि भक्त्या सदाऽहं विभो त्वाम् ॥

प्रतप्तस्य बाहो नमद्वीरबाहो
प्रभो कार्तिकेयेष्टकामप्रदेति

यदा ये पठन्ते भवन्तं तदैव
प्रसन्नस्तु तेषां बहुश्रीं ददासि ॥ १६
अपारेऽतिदारिद्र्यपाथोधिमध्ये
भ्रमन्तं जनिग्राहपूर्णे नितान्तम् ।
महासेन मामुद्धर त्वं कटाक्षा-
वलोकेन किञ्चित्प्रसीद प्रसीद ॥ १७
स्थिरां देहि भक्तिं भवत्पादपद्मे
श्रियं निश्चलां देहि महां कुमार ।
गुहं चन्द्रतारं स्ववंशाभिवृद्धिं
कुरु त्वं प्रभो मे मनःकल्पसाल ॥ १८
नमस्ते नमस्ते महाशक्तिपाणे
नमस्ते नमस्ते लसद्वज्रपाणे ।
नमस्ते नमस्ते कटिन्यस्तपाणे
नमस्ते नमस्ते सदाभीष्टपाणे ॥ १९
नमस्ते नमस्ते महाशक्तिधारिन्
नमस्ते सुराणां महासौख्यदायिन् ।

नमस्ते सदा कुक्कुटेशाख्यक त्वं
समस्तापराधं विभो मे क्षमस्व ॥ २०

य एको मुनीनां हृदब्जाधिवासः
शिवाङ्कं समारुह्य सत्पीठकल्पम् ।
विरिञ्चाय मन्त्रोपदेशं चकार
प्रमोदेन सोऽयं तनोतु श्रियं मे ॥ २१

यमाहुः परं वेद शूरेषु मुख्यं
सदा यस्य शक्त्या जगद्भीतभीतम् ।
यमालोक्य देवाः स्थिरं स्वर्गपालाः
सदोङ्काररूपं चिदानन्दमीडे ॥ २२

गुहस्तोत्रमेतत् कृतान्तारिसूनोः
भुजङ्गप्रयातेन पद्येन कान्तम् ।
जना ये पठन्ते सदा ते महान्तो
मनोवाञ्छितं सर्वकामान्लभन्ते ॥ २३

॥ इति सुब्रह्मण्यभुजङ्गप्रयातं सम्पूर्णम् ॥

॥ श्रीसुब्रह्मण्यस्तोत्रम् ॥



आदित्यविष्णुविघ्नेशरुद्रब्रह्ममरुद्गणाः ।
लोकपालास्सर्वदेवाश्चराचरमिदं जगत् ॥ १
सर्वं त्वमेव ब्रह्मैव अजमक्षरमद्वयम् ।
अप्रमेयं महाशान्तमचलं निर्विकारकम् ॥ २
निरालम्बं निराभासं सत्तामात्रमगोचरम् ।
एवं त्वां मेधया बुद्ध्या सदा पश्यन्ति सूरयः ॥ ३
एवमज्ञानगाढान्धतमोपहतचेतसः ।
न पश्यन्ति तथा मूढाः सदा दुर्गतिहेतवे ॥ ४
विष्ण्वादीनि स्वरूपाणि लीलालोकविडम्बनम् ।
कर्तुमुद्यम्य रूपाणि विविधानि भवन्ति च ॥ ५
तत्तदुक्ताः कथास्सम्यक् नित्यसद्गतिप्राप्तये ।
भक्त्या श्रुत्वा पठित्वा च दृष्ट्वा सम्पूज्य श्रद्धया॥ ६
सर्वान्कामानवाप्नोति भवदाराधनात्खलु ।
मम पूजामनुग्राह्य सुप्रसीद भवानघ ॥ ७

चपलं मन्मथवशममर्यादमसूयकम् ।
वञ्चकं दुःखजनकं पापिष्ठं पाहि मां प्रभो ॥ ८
सुब्रह्मण्यस्तोत्रमिदं ये पठन्ति द्विजोत्तमाः ।
ते सर्वे मुक्तिमायान्ति सुब्रह्मण्यप्रसादतः ॥ ९

॥ इति श्री सुब्रह्मण्यस्तोत्रम् सम्पूर्णम् ॥

॥ स्कन्दलहरी ॥

श्रियै भूयाः श्रीमच्छरवणभवस्त्वं शिवसुतः
प्रियप्राप्त्यै भूयाः प्रतनगजवक्त्रस्य सहज ।
त्वयि प्रेमोद्रेकात् प्रकटवचसा स्तोतुमनसा
मयारब्धं स्तोतुं तदिदमनुमन्यस्व भगवन् ॥ १

निराबाधं राजच्छरदुदितराकाहिमकर
प्ररूढज्योत्स्नाभसितवदनषट्काक्षिणयनः ।
पुरः प्रादुर्भूय स्फुरतु करुणापूर्णहृदयः
करोतु स्वास्थ्यं मे कमलदलविन्दूपमहृदि ॥ २

न लोकेऽन्यं देवं नतजनकृतप्रत्ययविधिं
विलोके भीतानां निखिलभयभीतैकशरणम् ।
कलौ कालेऽप्यन्तर्हरसि तिमिरं भास्कर इव
प्रलुब्धानां भोगेष्वपि निखिलभोगान्वितरसि ॥ ३

शिव स्वामिन् देव श्रितकलुषनिश्शेषणगुरो
भवध्वान्तध्वंसे मिहिरशतकोटिप्रतिभट ।

शिवप्राप्त्यै सम्यक्फलितसदुपायप्रकटन
भ्रुवं तत्कारुण्ये कलिरपि कृती भूतविभवः ॥ ४
अशक्तानां कर्मस्वपि निखिलनिश्रेयसकृतौ
पशुत्वग्रस्तानां पतिरसि विपाशत्वकलने ।
प्रशस्तानां भूम्नां निधिरसि निरोद्धा निजशुचा-
मशक्तानां कर्ता जगति धृतशक्तिः किल भवान् ॥
विषार्तानां हर्ता विषयिविषयाणां घटयिता
तृषार्तानां काले परममृतवर्षी घन इव ।
मृषाज्ञानार्तानां निखिलचिकित्सापरिहरो
विषग्रस्तानां त्वं सकलभयहर्ता विलससि ॥ ६
रसाधिक्यं भक्तेरधिकमधिकं वर्धय विभो
प्रसीद त्वं भूयः प्रकटय चिदानन्दलहरीम् ।
असारे संसारे सदसति न लिप्तं मम मनः
कुसीदं भूयान्मे कुशलवति निश्रेयसपथि ॥ ७
महामोहारण्ये विचरति मनस्तन्नियमय-
न्नहन्तां निश्शेषीकुरु करुणया त्वं शमय माम् ।

महीयो माहात्म्यं तव मननमार्गे स्फुरतु मे
महस्तोमाकारे त्वयि मतिजुषि स्यात्कनु तमः ॥
वलक्षाभं स्निग्धं वदनकमलेभ्यः प्रसृमरं
मिलत्कारुण्यार्द्रं मृदितभुवनार्तिस्मितमिदम् ।
पुलिन्दापत्यस्य प्रकटपुलकोद्रेकजनकं
दलद्दैन्यं भेदं हरतु सततं नः सुरगुरोः ॥ ९
अतीतो ब्रह्मादीन् कृतिमुखकृतः कारणपतीन्
क्षितिस्तोयं वह्निः मरुदसि वियत्तत्त्वमखिलम् ।
पतिः कृत्यानां त्वं परिणतचिदात्मेक्षणवतां
धृतिस्त्वं ध्यातस्सन् दिशसि निजसायुज्यपदवीम् ॥
सदात्मा त्वच्चित्तः त्वदनुभवबुद्धिस्मृतिपथः
त्वदालोकस्सर्वं जगदिदमशेषं स्थिरचरम् ।
सदा योगी साक्षाद्भजति तव सारूप्यममलं
त्वदायत्तानां किं न हि सुलभमष्टौ च विभवाः ॥
कति ब्रह्माणो वा कति कमलनेत्राः कति हराः
कति ब्रह्माण्डानां कतिच शतकोटिष्वधिकृताः ।

कृताज्ञास्सन्तस्ते विविधकृतिरक्षाभृतिकरा
अतस्सर्वैश्वर्यं तव यदपरिच्छेद्यविभवम् ॥ १२

नमस्ते स्कन्दाय त्रिदशपरिपालाय महते
नमः क्रौञ्चाभिख्यासुरदलनदक्षाय भवते ।
नमश्शूरक्रूरत्रिदशरिपुदण्डाध्वरकृते
नमो भूयो भूयो नतिकृदवने जागरवते ॥ १३

शिवस्त्वं शक्तिस्त्वं तदुभयतमैक्यं पृथगसि
स्तवे ध्याने पूजाजपनियममुखेऽवभिरतः ।
भुवि स्थित्वा भोगान् सुचिरमुपभुज्य प्रमुदिता
अवन्ति त्वत्स्थाने वदमु पुनरावृत्तिविमुखाः ॥ १४

गुरोर्विद्यां लब्ध्वा सकलमथहन्त्रीं जपपराः
पुरश्चर्यामुख्यक्रमविधिजुषो ध्याननिपुणाः ।
व्रतैः कामस्थैरभिलषितवाञ्छां प्रियभुज-
श्चिरं जीवन्मुक्ता जगति विजयन्ते सुकृतिनः ॥ १५

शरज्योत्स्नाशुभ्रं स्फटिकनिकुरुम्बाभरुचिरं
स्फुरन्मुक्ताहारं धवलवसनं भावयति वः ।

प्ररोहत्कारुण्यामृतबहुलधाराभिरभित-
श्चिरं सिक्तात्मा वै स भवति च विच्छिन्ननिगडः ॥
वृथा कर्तुं दुष्टान्विविधविषवेगान् शमयितुं
सुधारोचिष्कोटिप्रतिभटरुचिं भावयति यः ।
अघः कर्तुं साक्षाद्भवति विनतासूनुमचिरा-
द्विधत्ते सर्पाणां विविधविषदर्पापहरणम् ॥ १७
प्रवालाभापूरे प्रसरति महस्ते जगदिदं
दिवं भूमिं काष्ठास्सकलमपि सञ्चिन्तयति यः ।
द्रवीकुर्याच्चेतश्चिदशनिवहानामपि सुखा-
द्भुवि स्त्रीणां पुंसां वशयति तिरश्चामपि मनः ॥१८
नवाम्भोदश्यामं मरतकमणिप्रख्यमथवा
भवन्तं ध्यायेद्यो भवति निपुणो मोहनविधौ ।
दिविष्ठानां भूमावपि विविधदेशेषु वसतां
नृणां देवानां वा वियति चरतां पतगफणिनाम् ॥

॥ इति स्कन्दलहरी सम्पूर्णा ॥

॥ सुब्रह्मण्यषोडशनामस्तोत्रम् ॥

अस्य श्रीसुब्रह्मण्यषोडशनामस्तोत्रमहामन्त्रस्य अगत्यो भगवानृषिः अनुष्टुप्छन्दः सुब्रह्मण्यो देवता ममेष्टसिद्ध्यर्थे जपे विनियोगः ॥

षड्वक्त्रं शिखिवाहनं त्रिणयनं चित्राम्बरालङ्कृतं
शक्तिं वज्रमसिं त्रिशूलमभयं खेटं धनुश्चक्रकम् ।
पाशं कुक्कुटमङ्कुशं च वरदं हस्तैर्दधानं सदा
ध्यायेदीप्सितसिद्धिदं शिवसुतं स्कन्दं सुराराधितम् ॥

प्रथमो ज्ञानशक्त्यात्मा द्वितीयः स्कन्द एव च ।
अग्निगर्भस्तृतीयस्तु बाहुलेयश्चतुर्थकः ॥ २
गाङ्गेयः पञ्चमः प्रोक्तः षष्ठश्शरवणोद्भवः ।
सप्तमः कार्तिकेयश्च कुमारश्चाष्टमस्तथा ॥ ३
नवमः षण्मुखः प्रोक्तः तारकारिः स्मृतो दश ।
एकादशश्च सेनानीः गुहो द्वादश एव च ॥ ४
त्रयोदशो ब्रह्मचारी शिवतेजश्चतुर्दशः ।
क्रौञ्चदारी पञ्चदशः षोडशश्शिखिवाहनः ॥ ५

षोडशैतानि नामानि यो जपेद्भक्तिसंयुतः ।
बृहस्पतिसमो बुद्ध्या तेजसा ब्रह्मणस्समः ॥ ६
कन्यार्थी लभते कन्यां ज्ञानार्थी ज्ञानमाप्नुयात् ।
विद्यार्थी लभते विद्यां धनार्थी धनमश्नुते ॥ ७
यद्यत्प्रार्थयते मर्त्यः तत्सर्वं लभते ध्रुवम् ।

॥ इति सुब्रह्मण्यषोडशनामस्तोत्रम् ॥

॥ स्कन्दवेदपादस्तवः ॥

यो देवानां पुरो दित्सुरर्थिभ्यो वरमीप्सितम् ।
अग्रे स्थितस्य विघ्नेशो ममान्तर्हृदये स्थितः ॥ १

महः पुरा वैबुधसैन्धवश्रीशराटवीमध्यगतहृदान्तः ।
श्रीकण्ठफालेक्षणजातमीडे तत्पुष्करस्यायतनाद्धि
जातम् ॥ २

महो गुहाख्यं निगमान्तपद्धतिमृग्याङ्घ्रिपङ्केरुह
युग्ममीडे । साम्बो वृषस्थस्तुतदर्शनोक्तो यत्पर्यपश्य-
त्सरिरस्य मध्ये ॥ ३

त्वामेव देवं शिवफालनेत्रमहो विवर्तं परमात्म-
रूपम् । तिष्ठन्व्रजञ्जाग्रदहं शयानः प्राणेन वाचा
मनसा बिभर्मि ॥ ४

नमो भवानीतनुजाय तेऽस्तु विज्ञाततत्वा मुनयः
पुराणाः । यमेव शम्भुं हरिमब्जयोनिं यमिन्द्रमा-
हुर्वरुणं यमाहुः ॥ ५

कोटीरकोटिस्थमहार्घकोटिमणिप्रभाजालवृतं गुहं त्वाम् । अनन्यचेताः प्रणवाऽऽजहंसं वेदाहमेतं पुरुषं महान्तम् ॥ ६

स नोऽवतु स्वालिकपट्टिकाजीवग्रहं ग्रहीतायित-चन्द्रखण्डः । गुहादसीयन्तमिदं स्वरूपं परात्परं यन्महतो महान्तम् ॥ ७

स्वर्गापगामध्यगपुण्डरीक-
दलप्रभाजैत्रविलोचनस्य ।
अक्ष्णां सहस्रेण विलोक्यमानं
न सन्दशेतिष्ठति रूपमस्य ॥ ८

हैमद्विषत्कुण्डलमण्डलाढ्य-
गण्डस्थलीमण्डिततुण्डशोभः ।
ब्रह्मत्वमेवेति गुहोमुनीन्द्रै-
र्हृदामनीषामनसाभिकॢप्तः ॥ ९

सुपक्वबिम्बाधरकान्तिरक्तसन्ध्यामृगाङ्कायितदन्त-

पङ्क्तिः । गुहस्य नः पातु विलोलदृष्टिर्येनावृतं खं च दिवं महीं च ॥ १०

करीन्द्रशुण्डायितदोःप्रकाण्डद्विषद्ककेयूरविराजमानम् । गुहं मृडानीभवमप्रमेयं न चक्षुषा पश्यति कश्चनैनम् ॥ ११

स्वकीयदोर्दण्डगृहीतचण्डकोदण्डनिर्मुक्तपृषत्कषण्डैः । त्रिविष्टपान्धंकरणैरशून्यान्यस्यन्न लोकान कृणोदिशश्च ॥ १२

सौवर्णहारादिविभूषणोज्ज्वलन्मणिप्रभालीढविशालवक्षाः । स्कन्दस्य मां पातु जिताब्जयोनिरजायमानो बहुधा विजायते ॥ १३

देवस्य वैहारिकवेषधारी लीलाकृताशेषजगद्विमर्दः । शिखिध्वजः पातु भयङ्करेभ्यो यस्यन्न सिन्धूनदधात्पृथिव्याम् ॥ १४

षडाननो द्वादशबाहुदण्डः श्रुत्यन्तगामी द्विषडी-

क्षणाढ्यः । भीताय मह्यं गिरिजातनूजो हिरण्यवर्णस्त्वभयं कृणोतु ॥ १५

यो दानवानीकभयङ्करोटवीसमूलनोत्पाटनचण्डवातः । षाण्मातुरस्संहृतसर्वशत्रुरथैकराजो अभवज्जनानाम् ॥ १६

अतीव बालः प्रवयाः कुमारो वर्णी युवा षण्मुखएकवक्त्रः । इत्थं महस्तद्बहुधाविरासीद्यदेकमव्यक्तमनन्तरूपम् ॥ १७

यदीयमायावरणाख्यशक्तिविरोहितान्तः करणा हि मूढाः । न जानते त्वां गुह तं प्रपद्ये परेण नाकं निहितं गुहायाम् ॥ १८

गुरूपदेशाधिगतेन योगमार्गेण सम्प्राप्य च योगिनस्त्वाम् । गुहं परं ब्रह्म हृदम्बुजस्थं बिभ्राजदेतद्यतयो विशन्ति ॥ १९

यो देवसेनापतिरादराद्वै ब्रह्मादिभिर्देवगणैरभिष्टुतः । तं देवसेनान्यमहं प्रपद्ये विश्वं पुराणं तमसः परस्तात् ॥ २०

हृदम्बुजान्तर्दहराग्रवर्ति कृशानुमध्यस्थपरात्म - रूपात् । गुहात्सुसूक्ष्मान्मुनयः प्रतीयुरतः परं नान्य-दणीयसं हि ॥ २१

तपःप्रसन्नेशवहुप्रदत्तवरप्रमत्तासुरभीतिभाजाम् । सुपर्वणां स्कन्द भवान् शरण्य इन्द्रस्य विष्णो वरु-णस्य राज्ञः ॥ २२

स एव देवो गिरिजाकुमारो राजा स मित्रं स हि नो वरेण्यः । भ्राता स बन्धुः स गुरुस्सखा च स एव पुत्रस्स पिता च माता ॥ २३

स्वाराज्यदात्रे स्वसुतां वितीर्य तां देवसेनां सुकु-मारगात्राम् । आराधयत्यन्वहमम्बिकेयमिन्द्रो हवि-ष्मान् सगणो मरुद्भिः ॥ २४

देवेन येनाऽलघुविक्रमेण हतेषु सर्वेष्वपि दानवेषु । पुरेव देवाः स्वपदेषिचक्रुरिन्द्रश्च सम्राड्वरुणश्चराजा ॥

षण्मातुरोऽसौ जगतां शरण्यस्तेजोऽग्रमापःपव-

नश्चभूत्वा। संरक्षणायैव जगत्सु देवो विवेश भूतानि चराचराणि ॥ २६

करौ युवामञ्जलिमेव नित्यमुमाङ्गजाताय विधत्त मस्मै। एष प्रसन्नस्सुकुमारमूर्तिरस्मासुदेवो द्रविणं दधातु ॥ २७

निधिःकलानामुदधिर्दयानां पतिर्जनानां सरणिर्मुनीनाम्। कदा प्रसीदेन्मयि पार्वतेयः पिता विराजामृषभोरयीणाम् ॥ २८

सौन्दर्यवल्लीतनुसौकुमार्यसरोजपुष्पन्धयमानमोयः। चचार कान्तारपथेषु देवः सनो दधातु द्रविणं सुवीर्यम् ॥ २९

इतोऽपि सौन्दर्यवदस्तु देहमितीव हुत्वा शिवफालनेत्रे। जातस्ततः किं स कुमार एव कामस्तदग्रे समवर्ततांधि ॥ ३०

मुमुक्षुलोकाश्शृणुत प्रियं वो भजध्वमेनंगिरिजाकुमारम्। अस्यैव देवस्यपरात्मतेति हृदि प्रतीक्ष्या कवयोमनीषा ॥ ३१

धेनूर्बह्वीः कामदोग्ध्रीस्सुवत्साः कुण्डोघ्नीर्गा देहि-
नस्त्वं सहस्रम् । भक्तार्तिघ्नं देवदेवं षडास्यं विद्माहि
त्वा गोपतिं शूरगोनाम् ॥ ३२

वन्दामहे बर्हिणवाहनस्थितं वनीपकाशेषमनीषित-
प्रदम् । तोष्टूयमानं बहुधा पदे पदे सङ्क्रन्दनेनानिमि-
षेण जिष्णुना ॥ ३३

दिग्भ्यो दशभ्यः परितः पुनः पुनः परश्शताया-
तसिषेविषावताम् । अनुप्रहायेव षडाननो ह्यसौ
प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः ॥ ३४

कूर्मः फणीन्द्रश्च तथा फणाभृतो दिग्दन्तिनश्चैव
कुलाचला अपि । भूत्वाम्बिकेयः प्रथितप्रतापवान्
ब्रह्माण्यतिष्ठद्भुवनानि धारयन् ॥ ३५

यो वै स्कन्दः पृष्टश्शम्भोः सत्यं ज्ञानं ब्रह्मा-
द्वैतम् । ओंकारार्थं प्राह स्मेत्थं सुब्रह्मण्यों सुब्र-
ह्मण्योम् ॥ ३६

यो जाह्नवीशरारण्यह्रदाम्भोजे बभौ पुरा ।
तस्मै नमश्षण्मुखाय महासेनाय धीमहि ॥ ३७
यद्दक्षिणकराम्भोजमिष्टदं स्वानुजीविनाम् ।
तेभ्यश्चन्द्रादिसेनानां सेनानीभ्यश्च वो नमः ॥ ३८
देवतानामृषीणां च भक्तानामपि योगिनाम् ।
भूतानामपि वीराणां पत्नीनां पतये नमः ॥ ३९
नमस्तेऽस्तु महेशान भीतेभ्यश्शूरपद्मनः ।
शुनासीरमुखेभ्यस्त्वं स्वस्तिदा अभयङ्करः ॥ ४०
कटाक्षवीक्षणापास्तनिखिलव्याधिबन्धन ।
देवसेनापते स्वामिन्नभित्वा शूरनूनुमः ॥ ४१
अन्तश्चरसि भूतेषु त्वमेकस्सूक्ष्मरूपतः ।
त्वमेव निगमान्तेषु परमात्मा व्यवस्थितः ॥ ४२
मही द्यौरन्तरिक्षं च वायुरापोऽनलोऽम्बरम् ।
सुब्रह्मण्य जगन्नाथ त्वयि सर्वं प्रतिष्ठितम् ॥ ४३
शैशवे त्वं महासेन बन्दीकृत्य प्रजापतिम् ।
अस्राक्षीस्तान्यथापूर्वं मनुष्याः पशवश्च ये ॥ ४४

वेदान्तकन्दरीवर्तिगुहाशयषडानने ।
त्रिलोकीयं त्वयि विभो नावीवान्तरसमाहिता ॥४५
कला मुहूर्ताः काष्ठाश्च मासा वर्षा युगानि च ।
त्वयि वल्लीश निहिता निमेषास्त्रुटिभिस्सह ॥ ४६
रोगकान्तारदावाग्ने मृत्युकक्षहुताशन ।
शूरघ्न त्वत्प्रतापेन रेजती रोदसी उभे ॥ ४७
परं ब्रह्म विचिन्वन्तो हृदयाम्भोजमध्यगम् ।
योगिनो नारदाद्यास्त्वां सदा पश्यन्ति सूरयः ॥ ४८
हतशूरमुखाशेषदैतेयं त्वां गुहास्तुवन् ।
अग्निविष्णू चेन्द्रवायू सोमो धाता बृहस्पतिः ॥ ४९
वाचालयस्ववाचं त्वं सचक्षुः कुरुषेऽहशम् ।
आश्रितेभ्यो जगन्नाथ शिवो नस्सुमना भव ॥ ५०
स एव जगतः कर्ता भर्ता हर्ता जगद्गुरुः ।
कुमारस्सच्चिदानन्दः सोऽक्षरः परमस्स्वराट् ॥ ५१
असुरान् शूरपद्मादीन् हत्वा शरवणोद्भवः ।
देवान्स्वस्वपदे कृत्वा सम्राडेको विराजति ॥ ५२

तव दृष्ट्वा विश्वरूपं सहर्षभयवेपथु ।
त्वामस्तुवन्नादितेया बृहस्पतिपुरोहिताः ॥ ५३
किन्नरा गरुडा नागा यक्षास्साध्या मरुद्गणाः ।
ऐन्द्रीशं त्वामहरहः विश्वे देवा उपासते ॥ ५४
विश्वासान्मानुषीणां च प्रजानां पशुपक्षिणाम् ।
चराचराणां जगतां ध्रुवो राजा विशामयम् ॥ ५५
अम्भोजसंवर्तिकासु राजहंसा इव प्रभो ।
मदीयहृदयाम्भोजे ध्रुवस्तिष्ठाविचाचलिः ॥ ५६
लीलामात्रकृताशेषभुवनाद्विरिजासुतात् ।
अथर्ववाथ ऋक्सामे यजुस्तस्मादजायत ॥ ५७
तिले तैलमिव प्रोतो दध्न्याज्यमिव षण्मुखे ।
मणौ सूत्रमिव स्यूतो ब्रह्म विश्वमिदं जगत् ॥ ५८
यस्तत्रादीनृषीन् शापादुद्धार हरात्मजः ।
मातुः स्तनसुधासारं पुत्रः प्रमुदितो धयन् ॥ ५९
इज्यया पूजया स्तुत्या भक्त्या च परिचर्यया ।
ध्यानेन तपसा च त्वां देवं मर्तास ईडते ॥ ६०

श्रुतिस्मृत्यागमाद्युक्तकर्मणां फलदायिने ।
स्कन्दाय तुभ्यं मखिभिः श्रद्धया हूयते हविः ॥ ६१
मूर्धा द्यौरम्बरं नाभिरूरू भूरतलं पदे ।
षण्मुखस्येत्येवमाहुरन्तर्विश्वमिदं जगत् ॥ ६२
भक्तसन्तापशमनप्रावृषेण्यघनाघनात् ।
स्कन्दादन्यं मनो मागा स्स दृष्टो मृडयाति नः ॥
जिह्वे त्वमुच्चैर्निस्तन्द्रारात्रिन्दिवमभिष्टुहि ।
देवसेनं महासेनमदुग्धा इव धेनवः ॥ ६४
अकलङ्कशरच्चन्द्रविलसत्त्वन्मुखस्रुताः ।
मन्दस्मितसुधाधारास्ता मे कृण्वन्तु भेषजम् ॥ ६५
देवानीजिमहे पूर्वं तपश्चक्रमहे पुरा ।
यद्गुहो देवतास्माकं कविर्गृहपतिर्युवा ॥ ६६
मदीयहृदयाम्भोजनिर्यूहमणिमञ्जके ।
षडाननत्वत्पादस्स्याद्यदि यान् प्रादेशसम्मितः ॥६७
चिरन्तनवचस्तुत्यः प्रणवाम्बुजषट्पदः ।
करोतु देवसेनेशः शिवानः प्रदिशो दिशः ॥ ६८

दैतेयवधसन्नद्धो भवान्पवनसारथिः ।
द्विलक्षमर्वतो हैमे रथे युक्त्वाधितिष्ठति ॥ ६९
गगनोच्छ्रितकोदण्डकिरीटं शूरमाहवे ।
विभेदिथ त्वं नाराचैः सहस्रेण शतेन च ॥ ७०
ऐशाङ्ललाटनयनाज्जातं वह्निर्यथारणेः ।
मुमुक्षवो गुहं ब्रह्म विचिन्वन्तु मनीषया ॥ ७१
हिरण्यज्योतिषं स्कन्दं याचध्वं भो वनीपकाः ।
एषोऽर्थिनः पूरयति प्रजया च धनेन च ॥ ७२
सन्निधास्यति किं स्वामी भवानम्बुरुहेक्षणः ।
तावकं मञ्जुलं रूपं स्मर्यते न च दृश्यते ॥ ७३
यतः त्वं जगतामेषामाशिषे शिखिवाहन ।
ततो देहि बहून् व्रीहीनकृष्टा ये च कृष्टजाः ॥ ७४
धनधान्यगृहान् पुत्रान् देहि देव दयानिधे ।
त्वमाश्रितेष्टदत्वेन कर्णाभ्यां भूरि विश्रुवम् ॥ ७५
भक्तेभ्यो मुचुकुन्दाख्यप्रमुखेभ्यो यथा गुह ।
प्रादास्तथा देहि मह्यमच्युतां बहुलां श्रियम् ॥ ७६

भक्तान् तत्पुत्रसुहृदस्तन्मातृपितृसोदरान् ।
पाहि स्कन्द पुनश्चास्य द्विपादो ये चतुष्पदः ॥ ७७
चोरव्याघ्रपिशाचाखुसर्पकीटादिबाधकात् ।
भक्तान्निशासु संरक्षन् त्रिषु लोकेषु जागृहि ॥ ७८
दानवेष्वपि दैत्येषु राक्षसेष्वप्यरातिषु ।
पिशाचेष्वपि गाङ्गेय विक्रमस्व महां असि ॥ ७९
आधिभिर्व्याधिभिश्चैव पीडितानामहर्निशम् ।
दूतानां वपुषि स्वामिन्नासुवोर्जमिषं च नः ॥ ८०
अतितीव्रेण तपसा तप्यमाना अहर्निशम् ।
उपासत त्वां तन्नाद्या अथ हैनं पुरर्षयः ॥ ८१
ध्यानावाहनपूजेज्यापरिचर्यास्तुतिष्वहम् ।
अज्ञो मे सफलां पूजां कृणुहि ब्रह्मणस्पते ॥ ८२
असुरान् राक्षसान् क्रूरान् देवयज्ञविघातकान् ।
जहि देवेश यस्मात्त्वं रक्षोहामीव चात्मनः ॥ ८३
दुर्वृत्तेभ्यो धनं दत्से नीचेभ्योऽपि धनं बहु ।
न वदासि कुतो महामेतत्पृच्छामि सम्प्रति ॥ ८४

मुखैरेतान्महारौद्रान् दूरीकुरु जगत्पते ।
मम त्वमभिकाङ्क्षन्ते ये स्तेना ये च तस्कराः ॥ ८५
गुह त्वत्पादभक्तानां गेहे जाग्रत्वहर्दिनम् ।
वीरबाहुमुखा वीरा नित्यानुचरास्तव ॥ ८६
त्रिषड्विलोचनेष्वेकदृक्कटाक्षेण लक्षयन् ।
आढ्यं करोतु मां स्कन्दः पर्जन्यो वृष्टिमानिव ॥
भयानकासुरानीककान्दिशीकाः पुरा खलु ।
गुह त्वां शरणं प्रापुरिन्द्रेण सह देवताः ॥ ८८
त्वामेव कीर्तयन्देव ध्यायन् शृण्वन्प्रपूजयन् ।
गुह त्वत्पादभक्तोऽहं जीवानि शरदश्शतम् ॥ ८९
कृपादुग्धाब्धिकल्लोलायमानापाङ्गवीक्षण ।
देहि मे गुह बह्वायुः दीर्घायुत्वस्त्वेहेशिषे ॥ ९०
पुरारातीक्षणपयःपरावारसुधाकर ।
षड्वक्त्र देहि कृपया मयि मेधां मयि प्रजाम् ॥ ९१
भक्तचातकवृन्देष्टवर्षिं धाराधर प्रभो ।
अस्मान् सञ्जीवय स्वामिन्नस्मिन् लोके शतं समाः ॥

भीता वयं महासेन पथि दुर्गे वने यतः ।
घोरव्याघ्रपिशाचेभ्यस्ततो नो अभयं कृधि ॥ ९३
व्याधयः शूलकुष्ठार्शः प्रमेहाद्या यतस्सदा ।
पीडयन्ति पिशाचाद्याः ततो नो धेहि भेषजम् ॥
त्वदीयपादकमलध्यानवर्मितविग्रहान् ।
कुहका मोहका क्षुद्रा मास्मान्प्रापन्नरातयः ॥ ९५
धनधान्यपशुक्षेत्रबलेष्वस्मदपेक्षया ।
देवसेनापतेस्माकमधरे सन्तु शत्रवः ॥ ९६
अरातिकुलनिर्मूलनालङ्कर्मीणविक्रम ।
अकारणेन बहुधा यो नो द्वेष्टि स रिष्यतु ॥ ९७
मन्त्रैर्यन्त्रैस्तथा तन्त्रैरौषधैरायुधैरपि ।
जिघांसति च योऽस्मान् स द्विषन्मे बहु शोचतु ॥
आखण्डलारीनसुरांस्त्वन्तु स्पर्धावतो यथा ।
जहि गाङ्गेय तौ मर्त्यौ यं चाह द्वेष्टि यश्च माम् ॥
त्वन्नामकीर्तनपरक्षेमङ्करकराम्बुज ।
तमिमं संहर स्वामिन् यश्च नो द्वेषते जनः ॥ १००

दूरेन्तिके वा यश्शत्रुरस्माननपराधिनः ।
शपत्येनं जहि स्कन्द यश्च नश्शपतश्शपात् ॥ १०१
चक्षुषा मनसा वचा मन्त्रेण हवनेन च ।
तत्कृत्यान्नाशय स्वामिन् भ्रातृव्यस्याभिदासतः ॥
मच्छिद्रान्वेषिणश्शत्रोः धनमायुः प्रजाः पशून् ।
सर्वान्नाशय शूरघ्न मा तस्योच्छेषि किञ्चन ॥ १०३
अविद्वांसश्च विद्वांसः स्वप्ने जाग्रति वा गुह ।
तेभ्यो मोचय मां यद्यदेनांसि चकृमा वयम् ॥ १०४
वयमूचिम यदेव जिह्वया देवहेलनम् ।
एनसो मोचयाग्नेय त्वं हि वेत्थ यथातथम् ॥ १०५
वित्तार्थे वा तथान्यार्थे विप्रार्थे गोर्थएव वा ।
पुनह्यस्मान् ततः स्कन्द यत्किञ्चानृतमूदिम ॥ १०६
तमागसं क्षमस्व त्वं स्वकीयाभीष्टलिप्सया ।
सम्प्रार्थ्य तुभ्यं वान्यस्मै यद्वाचानृतमूदिम ॥ १०७
सौन्दर्यवल्लया सहितमम्बया देवसेनया ।
महाग्नेनं भजेदेवं सत्येन तपसा सह ॥ १०८

यो वै पठेद्बृहस्यैनं वेदान्तस्तवमादरात् ।
स्कान्दाः कटाक्षास्तस्योच्चैरायुः कीर्तिं प्रजां ददुः ॥

स्कन्दस्यैनं वेदपादस्तवं यो भक्त्या नित्यं श्रावयेद्वा पठेद्वा । भूयासुस्ते तस्य मर्त्यस्य शीघ्रं ये ये कामा दुर्लभा मर्त्यलोके ॥ ११०

॥ इति स्कन्दवेदपादस्तवः ॥



॥ बृहत्स्तोत्ररत्नाकरः ॥

॥ श्रीशिवाष्टोत्तरशतनामस्तोत्रम् ॥

शिवो महेश्वरश्शंभुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥ १
शङ्करश्शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः ।
शिपिविष्टोऽम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ॥ २
भवश्शर्वस्त्रिलोकेशश्शितिकण्ठश्शिवाप्रियः ।
उग्रः कपाली कामारिरन्धकासुरसूदनः ॥ ३
गङ्गाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥ ४
कैलासवासी कवची कठोरस्त्रिपुरान्तकः ।

वृषाङ्को वृषभारूढो भस्मोद्धूलितविग्रहः ॥
सामप्रियस्त्वरमयस्त्रयीमूर्तिरनीश्वरः ।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥
हविर्यज्ञमयस्सोमः पञ्चवक्त्रस्सदाशिवः ।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥
हिरण्यरेता दुर्धर्षो गिरीशो गिरिशोऽनघः ।
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥
कृत्तिवासाः पुरारातिर्भगवान् प्रमथाधिपः ।
मृत्युञ्जयस्सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ॥
व्योमकेशो महासेनजनकश्चारुविक्रमः ।
रुद्रो भूतपतिः स्थाणुरहिर्बुध्न्यो दिगम्बरः ॥
अष्टमूर्तिरनेकात्मा सात्त्विकश्शुद्धविग्रहः ।
शाश्वतः खण्डपरशुरजः पाशविमोचकः ॥
मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः ।
पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हरः ॥

भगनेत्रभिदव्यक्तसहस्राक्षसहस्रपात् ।
अपवर्गप्रदोऽनन्तस्तारकः परमेश्वरः ॥ १३
एवं श्रीशंभुदेवस्य नाम्नामष्टोत्तरं शतम् ॥

॥ श्रीशिवाष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥

॥ श्रीशिवसहस्रनामस्तोत्रम् ॥

वन्दे शंभुमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्

वासुदेवः—

ततस्स प्रयतो भूत्वा मम तात युधिष्ठिर ।
प्राञ्जलिः प्राह विप्रर्षिर्नामसंग्रहमादितः ॥

उपमन्युः—

ब्रह्मप्रोक्तैर्ऋषिप्रोक्तैर्वेदवेदांगसंभवैः ।
सर्वलोकेषु विख्यातं स्तुत्यं स्तोष्यामि नामभिः
महद्भिर्विहितैस्सत्यैस्सिद्धैस्सर्वार्थसाधकैः ।
ऋषिणा तण्डिना भक्त्या कृतैर्वेदकृतात्मना ॥
यथोक्तैस्साधुभिः ख्यातैर्मुनिभिस्तत्त्वदर्शिभिः ।
प्रवरं प्रथमं स्वर्ग्यं सर्वभूतहितं शुभम् ॥

श्रुतैस्सर्वत्र जगति ब्रह्मलोकावतारितैः ।
सत्यैस्तत्परमं ब्रह्म ब्रह्मप्रोक्तैस्सनातनम् ॥ ५

वक्ष्ये यदुकुलश्रेष्ठ शृणुष्वावहितो मम ।
वरयैनं भवं देवं भक्तस्त्वं परमेश्वरम् ॥ ६

तेन ते श्रावयिष्यामि यत्तद्ब्रह्म सनातनम् ।
न शक्यं विस्तरात्कृत्स्नं वक्तुं शर्वस्य केनचित् ॥ ७

युक्तेनापि विभूतीनामपि वर्षशतैरपि ।
यस्यादिमध्यमान्तानि गम्यन्ते न सुरैरपि ॥ ८

कस्तस्य शक्नुयाद्वक्तुं गुणान् कार्त्स्न्येन माधव ।
किन्तु देवस्य महतस्सङ्क्षिप्तार्थपदाक्षरम् ॥ ९

शक्तितश्चरितं वक्ष्ये प्रसादात्तस्य धीमतः ।
अप्राप्य तु ततोऽनुज्ञां न शक्यः स्तोतुमीश्वरः ॥

यदा तेनाभ्यनुज्ञातस्स्तुतो वै स तदा मया ।
अजादिनिधनस्याहं जगद्योनेर्महात्मनः ॥ ११

नाम्नां किञ्चित्समुद्देशं वक्ष्याम्यव्यक्तयोनिनः ।
वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः ॥ १२

शृणु नाम्नां चयं कृष्ण यदुक्तं पद्मयोनिना ।
दशनामसहस्राणि यान्याह प्रपितामहः ॥ १३
तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतम् ।
गिरेस्सारं यथा हेम पुष्पसारं यथा मधु ॥ १४
घृतात्सारं यथा मण्डं तथैतत्सारमुद्धृतम् ।
सर्वपापापहमिदं चतुर्वेदसमन्वितम् ॥ १५
प्रयत्नेनाधिगन्तव्यं धार्यं च प्रयतात्मना ।
माङ्गल्यं पौष्टिकं चैव रक्षोघ्नं पावनं महत् ॥ १६
इदं भक्ताय दातव्यं श्रद्धयाऽनास्तिकाय च ।
नाश्रद्दधानरूपाय नास्तिकायाजितात्मने ॥ १७
यश्चाभ्यसूयते देवं कारणात्मानमीश्वरम् ।
स कृष्ण नरकं याति सह पूर्वैस्सहात्मजः ॥ १८
इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम् ।
इदं जप्यमिदं ज्ञानं रहस्यमिदमुत्तमम् ॥ १९
यं ज्ञात्वा ह्यन्तकालेऽपि गच्छेत परमां गतिम् ।
पवित्रं मङ्गलं मेध्यं कल्याणमिदमुत्तमम् ॥ २०

इदं ब्रह्मा पुरा कृत्वा सर्वलोकपितामहः ।
सर्वस्तवानां राजत्वे दिव्यानां समकल्पयत् ॥ २१
तदाप्रभृति चैवायमीश्वरस्य महात्मनः ।
स्तवराज इति ख्यातो जगत्यमरपूजितः ॥ २२
ब्रह्मलोकादयं स्वर्गे स्तवराजोऽवतारितः ।
यतस्तण्डिः पुरा प्राप तेन तण्डिकृतोऽभवत् ॥ २३
स्वर्गाच्चैवात्र भूलोकं तण्डिना ह्यवतारितः ।
सर्वमङ्गळमाङ्गल्यं सर्वपापप्रणाशनम् ॥ २४
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ।
ब्रह्मणामपि यद्ब्रह्म पराणामपि यत्परम् ॥ २५
तेजसामपि यत्तेजस्तपसामपि यत्तपः ।
शान्तानामपि यश्शान्तो द्युतीनामपि या द्युतिः॥
दान्तानामपि यो दान्तो धीमतामपि या च धीः
देवानामपि यो देव ऋषीणामपि यस्त्वृषिः ॥ २७
यज्ञानामपि यो यज्ञश्शिवानामपि यश्शिवः ।
रुद्राणामपि यो रुद्रः प्रभा प्रभवतामपि ॥ २८

योगिनामपि यो योगी कारणानां च कारणम् ।
यतो लोकास्समुद्भवन्ति न भवन्ति यतः पुनः॥ २९
सर्वभूतात्मभूतस्य हरस्यामिततेजसः ।
अष्टोत्तरसहस्रं तु नाम्नां सर्वस्य मे शृणु ॥ ३०
यच्छ्रुत्वा मनुजव्याघ्र सर्वान् कामानवाप्स्यसि ।
स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो वरः ॥ ३१
सर्वात्मा सर्वविख्यातः सर्वस्सर्वकरो भवः ।
जटी चर्मी शिखण्डी च सर्वाङ्गस्सर्वभावनः ॥ ३२
हरश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः ।
प्रवृत्तिश्च निवृत्तिश्च नियतश्शाश्वतो ध्रुवः ॥ ३३
श्मशानवासी भगवान् खचरो गोचरोऽर्दनः ।
अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ॥ ३४
उन्मत्तवेषः प्रच्छन्नस्सर्वलोकप्रजापतिः ।
महारूपो महाकायो वृषरूपो महायशाः ॥ ३५
महात्मा सर्वभूतात्मा विश्वरूपो महाहनुः ।
लोकपालोऽन्तर्हितात्मा प्रसादो नीललोहितः ॥ ३६

पवित्रं च महांश्चैव नियमो नियमाश्रितः ।
सर्वकर्मा स्वयंभूत आदिरादिकरो निधिः ॥ ३७
सहस्राक्षो विशालाक्षस्सोमो नक्षत्रसाधकः ।
चन्द्रस्सूर्यश्शनिः केतुर्ग्रहो ग्रहपतिर्वरः ॥ ३८
आदिरन्तो लयः कर्ता मृगबाणार्पणोऽनघः ।
महातपा घोरतपा अदीनो दीनसाधकः ॥ ३९
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ।
योगी योज्यो महाबीजो महारेता महाबलः ॥ ४०
सुवर्णरेतास्सर्वज्ञस्सुबीजो बीजवाहनः ।
दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ॥ ४१
विश्वरूपस्स्वयंश्रेष्ठो बलवीरो बलो गणः ।
गणकर्ता गणपतिर्दिग्वासाः काम एव च ॥ ४२
मन्त्रवित्परमो मन्त्रः सर्वभावकरो हरः ।
कमण्डलुधरो धन्वी बाणहस्तः कपालवान् ॥ ४३
अशनी शतघ्नी खड्गी पट्टसी चायुधी महान् ।
सुवहस्तस्सुरूपश्च तेजस्तेजस्करो निधिः ॥ ४४

उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा ।
दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ॥ ४५
सृगालरूपः सिद्धार्थो मुण्डस्सर्वशुभङ्करः ।
अजश्च बहुरूपश्च गङ्गाधारी कपर्द्यपि ॥ ४६
ऊर्ध्वरेता ऊर्ध्वलिङ्ग ऊर्ध्वशायी नभः स्थलः ।
त्रिजटश्चीरवासाश्च रुद्रस्सेनापतिर्विभुः ॥ ४७
नक्तञ्चरोऽहश्चरश्च तिग्ममन्युस्सुवर्चसः ।
गजहा दैत्यहा कालो लोकधाता गुणाकरः ॥ ४८
सिंहशार्दूलरूपश्च व्याघ्रचर्माम्बरावृतः ।
कालयोगी महानाथस्सर्वकामश्चतुष्पथः ॥ ४९
निशाचरः प्रेतराजो भूतचारी महेश्वरः ।
बहुभूतो बहुधरः स्वर्भानुरमितो गतिः ॥ ५०
नृत्यप्रियो नित्यनर्तो नर्तकस्सर्वलालसः ।
महाघोरतपाश्शूरो नित्योऽनीहो निरालयः ॥ ५१
सहस्रहस्तो विजयो व्यवसायो ह्यतन्द्रितः ।
अमर्षणोऽमर्षणात्मा यज्ञहा कामनाशकः ॥ ५२

दक्षयागापहारी च सुसहो मध्यमस्तथा ।
तेजोपहारी बलहा मुदितोऽर्थोऽजिता वरः ॥ ५३
गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ।
न्यग्रोधरूपो न्यग्रोधवृक्षकर्णस्थितिर्विभुः ॥ ५४
सुतीक्ष्णदशनश्चैव महाकायो महाननः ।
विष्वक्सेनो हरिर्यज्ञस्संयुगापीडवाहनः ॥ ५५
तीक्ष्णतापश्च हर्यश्वस्सहायः कर्मकालवित् ।
विष्णुप्रसादितो यज्ञस्समुद्रो बडवामुखः ॥ ५६
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ।
उग्रतेजा महातेजा जन्यो विजयकालवित् ॥ ५७
ज्योतिषामयनं सिद्धिस्सर्वविग्रह एव च ।
शिखी मुण्डी जटी ज्वाली मूर्तिजो मूर्धगो बली ॥
वैष्णवः प्रजवी ताली खेली कालकटङ्कटः ।
नक्षत्रविग्रहमतिर्गुणबुद्धिर्लयोऽगमः ॥ ५९
प्रजापतिर्विश्वबाहुर्विभागः सर्वतोमुखः ।
विमोचनस्सुमरणो हिरण्यकवचोद्भवः ॥ ६०

मेघज्ञो बलचारी च महीचारी स्तुतस्तथा ।
सर्वतूर्यविनोदी च सर्ववाद्यपरिग्रहः ॥ ६१
व्याळरूपो गुहावासी ग्रहमाली तरङ्गवित् ।
त्रिदशः कालदष्टकर्मसर्वबन्धविमोचनः ॥ ६२
बन्धनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ।
सांख्यप्रसादो दुर्वासास्सर्वसाधुनिषेवितः ॥ ६३
प्रस्कन्दनो विभागज्ञो ह्यतुल्यो यज्ञभागवित् ।
सर्ववासस्सर्वचारी दुर्वासा वासवोऽमरः ॥ ६४
हैमो हेमकरो यज्ञस्सर्वधारी धरोत्तमः ।
लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ॥ ६५
संग्रहो निग्रहः कर्ता सर्पचीरनिवासनः ।
मुख्योऽमुख्यश्च देहश्च काहलिस्सर्वकामदः ॥ ६६
सर्वकालप्रसादश्च सुबलो बलरूपभृत् ।
सर्वकामप्रदश्चैव सर्वदस्सर्वतोमुखः ॥ ६७
आकाशनिर्विरूपश्च निपातो ह्यवशः खगः ।
रौद्ररूपोऽशुरादित्यो बहुरश्मिस्सुवर्चसी ॥ ६८

वसुवेगो महावेगो मनोवेगो निशाचरः ।
सर्ववासी श्रियावासी उपदेशकरोऽकरः ॥ ६९
मुनिरात्मा निरालोकस्सम्भग्नश्च सहस्रदः ।
पक्षी च पक्षरूपश्च अतिदीप्तो विशां पतिः ॥ ७०
उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः ।
वामदेवश्च वामश्च प्राग्दक्षिण उदङ्मुखः ॥ ७१
सिद्धयोगी महर्षिश्च सिद्धार्थस्सिद्धसाधकः ।
भिक्षुश्च भिक्षुरूपश्च विपगो मृदुरव्ययः ॥ ७२
महासेनो विशाखश्च षष्टिभागो गवां पतिः ।
वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ॥ ७३
वृत्तवृत्तकरस्तालो मधुर्मधुकलोचनः ।
वाचस्पत्यो वाजसनो नित्यमाश्रितपूजितः ॥ ७४
ब्रह्मचारी लोकचारी सर्वचारी विचारवित् ।
ईशान ईश्वरः कालो निशाचारी पिनाकभृत् ॥ ७५
निमित्तस्थो निमित्तं च नन्दिर्नन्दिकरो हरिः ।
नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्धनः ॥ ७६

भगहारी निहन्ता च कालो ब्रह्मा पितामहः ।
चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ॥ ७७
लिङ्गाध्यक्षस्सुराध्यक्षो योगाध्यक्षो युगावहः ।
बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ॥ ७८
इतिहासस्सकल्पश्च गौतमोऽथ निशाकरः ।
दन्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः ॥
लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः ।
अक्षरं परमं ब्रह्म बलवान् शक्त एव च ॥ ८०
नीतिर्ह्यनीतिश्शुद्धात्मा शुद्धो मान्यो गतागतः ।
बहुप्रसादस्सुस्वप्नो दर्पणोऽथ त्वमित्रजित् ॥ ८१
वेदकारो मन्त्रकारो विद्वान्समरमर्दनः ।
महामेघनिवासी च महाघोरो वशीकरः ॥ ८२
अग्निज्वालो महाज्वालो ह्यतिधूम्रो हुतो हविः ।
वृषभश्शङ्करो नित्यं वर्चस्वी धूमकेतनः ॥ ८३
नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः ।
स्वस्तिदस्स्वस्तिभागश्च भागी भागकरो लघुः ॥ ८४

उत्सङ्गश्च महाङ्गश्च महागर्भपरायणः ।
कृष्णवर्णस्सुवर्णश्च इन्द्रियं सर्वदेहिनाम् ॥ ८५
महापादो महाहस्तो महाकायो महायशाः ।
महामूर्धा महामात्रो महानेत्रो निशालयः ॥ ८६
महान्तको महाकर्णो महोष्ठश्च महाहनुः ।
महानासो महाकम्बुर्महाग्रीवश्शमशानभाक् ॥ ८७
महावक्षा महोरस्को ह्यन्तरात्मा मृगालयः ।
लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ॥ ८८
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ।
महानखो महारोमा महाकेशो महाजटः ॥ ८९
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः ।
स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ॥ ९०
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ।
गण्डली मेरुधामा च देवाधिपतिरेव च ॥ ९१
अथर्वशीर्षस्सामास्य ऋक्सहस्रामितेक्षणः ।
यजुःपादभुजो गुह्यः प्रकाशो जङ्गमस्तथा ॥ ९२

अमोघार्थः प्रसादश्च अभिगम्यस्सुदर्शनः ।
उपकारः प्रियस्सर्वः कनकः काञ्चनच्छविः ॥ ९३
नाभिर्नन्दिकरो भावः पुष्करस्थपतिः स्थिरः ।
द्वादशश्चासनश्चाद्यो यज्ञो यज्ञसमाहितः ॥ ९४
नक्तं कलिश्च कालश्च मकरः कालपूजितः ।
सगणो गणकारश्च भूतवाहनसारथिः ॥ ९५
भस्माशयो भस्मगोप्ता भस्मभूतस्तरुर्गणः ।
लोकपालस्तथा लोको महात्मा सर्वपूजितः ॥ ९६
शुक्लिश्शुक्लसम्पन्नश्शुचिर्भूतनिषेवितः ।
आश्रमस्थः क्रियावस्थो विश्वकर्मामतिर्वरः ॥ ९७
विशालशाखस्ताम्रोष्ठोऽम्बुजालस्सुनिश्चलः ।
कपिलः कपिशश्शुक्ल आयुश्चैव परोऽपरः ॥ ९८
गन्धर्वो ह्यदितिस्तार्क्ष्यस्सुविज्ञेयस्सुशारदः ।
परश्चधायुधो देवो ह्यनुकारी सुबान्धवः ॥ ९९
तुम्बवीणो महाक्रोधो ऊर्ध्वरेता जलेशयः ।
उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः ॥ १००

सर्वाङ्गरूपो मायावी सुहृदो ह्यनिलोऽनलः ।
बन्धनो बन्धकर्ता च सुबन्धनविमोचनः ॥ १०१
स यज्ञारिस्स कामारिर्महादंष्ट्रो महायुधः ।
बहुधाऽनिन्दितस्सर्वश्शङ्करश्चन्द्रशेखरः ॥ १०२
अमरेशो महादेवो विश्वदेवस्सुरारिहा ।
अहिर्बुध्न्योऽनिलाभश्च चेकितानो हरिस्तथा ॥ १०३
अजैकपाच्च कापाली त्रिशङ्कुरजितश्शिवः ।
धन्वन्तरिर्धूमकेतुस्स्कन्दो वैश्रवणस्तथा ॥ १०४
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ।
प्रभावस्सर्वगो वायुरर्यमा सविता रविः ॥ १०५
उषङ्गुश्च विधाता च मान्धाता भूतभावनः ।
विभुर्वर्णविभावी च सर्वकामगुणावहः ॥ १०६
पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ।
बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ॥ १०७
कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः ।
सर्वाशयो दर्भचारी सर्वेषां प्राणिनां पतिः ॥ १०८

देवदेवस्सुखासक्तस्सदसत्सर्वरत्नवित् ।
कैलासगिरिवासी च हिमवद्गिरिसंश्रयः ॥ १०९
कूलहारी कूलकर्ता बहुविद्यो बहुदः ।
वणिजो वर्धकी वृक्षो वकुलश्चन्दनच्छदः ॥ ११०
सारग्रीवो महाजत्रुरलोलश्च महौषधः ।
सिद्धार्थकारी सिद्धार्थश्छन्दोव्याकरणोत्तरः ॥ १११
सिंहनादस्सिंहदंष्ट्रस्सिंहगस्सिंहवाहनः ।
प्रभावात्मा जगत्कालः कालो लोकहितस्तरुः ॥ ११२
साराङ्गो नवचक्राङ्गः केतुमाली सभावनः ।
भूतालयो भूतपतिरहोरात्रमनिंदितः ॥ ११३
वर्धितस्सर्वभूतानां निलयश्च विभुर्भवः ।
अमोघस्संयतो ह्यश्वो भोजनः प्राणधारणः ॥ ११४
धृतिमान् मतिमान् दक्षः सत्कृतश्च युगाधिपः ।
गोपाली गोपतिर्ग्रामो गोचर्मवसनो हरिः ॥ ११५
हिरण्यबाहुश्च तथा गुहापालः प्रवेशकः ।
प्रकृष्टारिर्महाहर्षो जितकामो जितेन्द्रियः ॥ ११६

गान्धारश्च सुवासश्च तपस्सक्तो रतिर्नरः ।
महागीतो महानृत्यो ह्यप्सरोगणसेवितः ॥ ११७
महाकेतुर्महाधातुर्नैकसानुचरश्चलः ।
आवेदनीय आवेशः सर्वगन्धसुखावहः ॥ ११८
तोरणस्तारणो वातः परिधीपतिखेचरः ।
संयोगो वर्धनो वृद्धो ह्यतिवृद्धो गुणाधिकः ॥११९
नित्य आत्मा सहायश्च देवासुरपतिः पतिः ।
युक्तश्च युक्तबाहुश्च देवो दिवि सुपर्वणः ॥ १२०
आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हरः ।
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः ॥ १२१
शिरोहारी विमर्शश्च सर्वलक्षणलक्षितः ।
अक्षश्च रथयोगी च सर्वयोगी महाबलः ॥ १२२
समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः ।
निर्जीवो जीवनो मन्त्रश्शुभाक्षो बहुकर्कशः ॥१२३
रत्नप्रभूतो रक्ताङ्गो महार्णवनिपानवित् ।
मूलं विशालो ह्यमृतो व्यक्ताव्यक्तस्तपोनिधिः ॥

आरोहणोऽधिरोहश्च शीलधारी महायशाः ।
सेनाकल्पे महाकल्पे योगो योगकरो हरिः ॥ १२५
युगरूपो महारूपो महानागहनो वधः ।
न्यायनिर्वपणः पादः पण्डितो ह्यचलोपमः ॥ १२६
बहुमालो महामालदृशशी हरिसुलोचनः ।
विस्तारो लवणः कूपस्त्रियुगः सफलोदयः ॥ १२७
त्रिलोचनो विषण्णाक्षो मणिविद्धो जटाधरः ।
बिन्दुर्विसर्गस्सुमुखः शरस्सर्वायुधस्सहः ॥ १२८
निवेदनस्सुखाजातः सुगन्धारो महाधनुः ।
गन्धपाली च भगवानुत्थानस्सर्वकर्मणाम् ॥ १२९
मन्थानो बहुळो वायुः सकलस्सर्वलोचनः ।
तलस्तालः करस्थाली ऊर्ध्वसंहननो महान् ॥ १३०
छत्रं सुछत्रो विख्यातो लोकस्सर्वाश्रयः क्रमः ।
मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः ॥
हर्यक्षः ककुभो वज्री शतजिह्वस्सहस्रपात् ।
सहस्रमूर्धा देवेन्द्रस्सर्वदेवमयो गुरुः ॥ १३२

सहस्रबाहुस्सर्वाङ्गः शरण्यस्सर्वलोककृत् ।
पवित्रं त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिङ्गलः ॥ १३३
ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान् ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥ १३४
गभस्तिर्ब्रह्मकृद्ब्रह्म ब्रह्मविद्ब्राह्मणो गतिः ।
अनन्तरूपश्चैकात्मा तिग्मतेजास्स्वयम्भुवः ॥ १३५
ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ।
चन्दनी पद्मनालाग्रस्सुरभ्युत्तरणो नरः ॥ १३६
कर्णिकारमहास्रग्वी नीलमौलिः पिनाकभृत् ।
उमापतिरुमाकान्तो जाह्नवीभृदुमाधवः ॥ १३७
वरो वराहो वरदो वरेण्यस्सुमहास्वनः ।
महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥ १३८
प्रीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत् ।
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो वरः ॥ १३९
चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो विवस्वान् सविताऽमृतः ॥

व्यासस्सर्गस्सुसङ्क्षेपो विस्तरः पर्ययो नरः ।
ऋतुस्संवत्सरो मासः पक्षस्संख्यासमापनः ॥ १४१
कला काष्ठा लवा मात्रा मुहूर्ताहःक्षपाक्षणाः ।
विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्सुनिर्गमः ॥ १४२
सदसव्यक्तमव्यक्तं पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ १४३
निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः ।
देवासुरविनिर्माता देवासुरपरायणः ॥ १४४
देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरगणाश्रयः ॥ १४५
देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवादिदेवो देवर्षिर्देवासुरवरप्रदः ॥ १४६
देवासुरेश्वरो विश्वो देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिन्त्यो देवतात्मात्मसम्भवः ॥ १४७
ऊर्द्धित्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ।
ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः ॥ १४८

विबुधोऽग्रवरस्सूक्ष्मस्सर्वदेवस्तपोमयः ।
सुयुक्तश्शोभनो वज्री प्रासानां प्रभवोऽव्ययः ॥
गुहः कान्तो निजस्सर्गः पवित्रं सर्वपावनः ।
शृङ्गी शृङ्गप्रियो बभ्रू राजराजो निरामयः ॥ १५०
अभिरामस्सुरगणो विरामस्सर्वसाधनः ।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ॥ १५१
स्थावराणां पतिश्चैव नियमेन्द्रियवर्धनः ।
सिद्धार्थस्सिद्धभूतार्थोऽचिन्त्यस्सत्यव्रतश्शुचिः॥१५२
व्रताधिपः परं ब्रह्म भक्तानुग्रहकारकः ।
विमुक्तो मुक्ततेजाश्च श्रीमान् श्रीवर्धनो जगत् ॥
यथाप्रधानं भगवानिति भक्त्या स्तुतो मया ।
यं न ब्रह्मादयो देवा विदुस्तत्त्वेन नर्षयः ॥ १५४
स्तोतव्यमर्च्यं वन्द्यं च कः स्तोष्यति जगत्पतिम् ।
भक्त्या त्वेवं पुरस्कृत्य मया यज्ञपतिर्विभुः ॥ १५५
ततोऽभ्यनुज्ञां सम्प्राप्य स्तुतो मतिमतां वरः ।
शिवमेभिः स्तुवन् देवं नामभिः पुष्टिवर्धनैः ॥१५६

नित्ययुक्तश्शुचिर्भूतः प्राप्नोत्यात्मानमात्मना ।
एतद्धि परमं ब्रह्म परं ब्रह्माधिगच्छति ॥ १५७
ऋषयश्चैव देवाश्च स्तुवन्त्येतेन तत्पराः ।
स्तूयमानो महादेवस्तुष्यते नियतात्मभिः ॥ १५८
भक्तानुकम्पी भगवानात्मसंस्थाकरो विभुः ।
तथैव च मनुष्येषु ये मनुष्याः प्रधानतः ॥ १५९
आस्तिकाश्श्रद्दधानाश्च बहुभिर्जन्मभिस्स्तवैः ।
भक्त्या ह्यनन्यमीशानं परं देवं सनातनम् ॥ १६०
कर्मणा मनसा वाचा भावेनामिततेजसः ।
शयाना जाग्रमाणाश्च व्रजन्नुपविशंस्तथा ॥ १६१
उन्मिषन्निमिषंश्चैव चिन्तयन्तः पुनः पुनः ।
शृण्वन्तश्श्रावयन्तश्च कथयन्तश्च ते भवम् ॥ १६२
स्तुवन्तस्स्तूयमानाश्च तुष्यन्ति च रमन्ति च ।
जन्मकोटिसहस्रेषु नानासंसारयोनिषु ॥ १६३
जन्तोर्विगतपापस्य भवे भक्तिः प्रजायते ।
उत्पन्ना च भवे भक्तिरनन्या सर्वभावतः ॥ १६४

भाविनः कारणं चास्य सर्वमुक्तस्य सर्वदा ।
एतद्देवेषु दुष्प्रापं मनुष्येषु न लभ्यते ॥ १६५
निर्विघ्ना निर्मला रुद्रे भक्तिरव्यभिचारिणी ।
तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृणाम् ॥ १६६
येन यान्ति परां सिद्धिं तद्भावगतचेतसः ।
यं सर्वभावानुगताः प्रपद्यन्ते महेश्वरम् ॥ १६७
प्रपन्नवत्सलो देवस्संसारात्तान् समुद्धरेत् ।
एवमन्ये न कुर्वन्ति देवास्संसारमोचनम् ॥ १६८
मनुष्याणामृते देवं नान्या शक्तिस्तपोबलम् ।
इति तेनेन्द्रकल्पेन भगवान् सदसत्पतिः ॥ १६९
कृत्तिवासास्तुतः कृष्ण तण्डिना शुभबुद्धिना ।
स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत् ॥ १७०
गीयते च स बुध्येत ब्रह्मशङ्करसन्निधौ ।
इदं पुण्यं पवित्रं च सर्वदा पापनाशनम् ॥ १७१
योगदं मोक्षदं चैव स्वर्गदं तोषदं तथा ।
एवमेतत्पठन्ते य एकभक्त्या तु शङ्करम् ॥ १७२

या गतिस्सांख्ययोगानां व्रजन्ते तां गतिं तथा ।
स्तवमेनं प्रयत्नेन सदा रुद्रस्य सन्निधौ ॥ १७३
अब्दमेकं चरेद्भक्तः प्राप्नुयादीप्सितं फलम् ।
एतद्ब्रह्म्यं परमं ब्रह्मणो हृदि संस्थितम् ॥ १७४
ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे ।
मृत्युः प्रोवाच रुद्रेभ्यो रुद्रेभ्यस्तण्डिमागमत् ॥ १७५
महता तपसा प्राप्तं तण्डिना ब्रह्मसद्मनि ।
तण्डिः प्रोवाच शुक्राय गौतमाय च भार्गवः ॥ १७६
वैवस्वताय मनवे गौतमः प्राह माधव ।
नारायणाय साध्याय मनुरिष्टाय धीमते ॥ १७७
यमाय प्राह भगवान् साध्यो नारायणोऽच्युतः ।
नाचिकेताय भगवानाह वैवस्वतो यमः ॥ १७८
मार्कण्डेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत ।
मार्कण्डेयान्मया प्राप्तो नियमेन जनार्दन ॥ १७९
तवाप्यहममित्रघ्न स्तवं दद्यां ह्यविश्रुतम् ।
स्वर्ग्यमारोग्यमायुष्यं धन्यं वेदेन सम्मितम् ॥ १८०

नास्य विघ्नं विकुर्वंति दानवा यक्षराक्षसाः ।
पिशाचा यातुधाना वा गुह्यका भुजगा अपि ॥
यः पठेत शुचिः पार्थ ब्रह्मचारी जितेंद्रियः ।
अभग्नयोगो वर्षं तु सोऽश्वमेधफलं लभेत् ॥ १८२

इति श्रीमन्महाभारते आनुशासनिकपर्वणि दानधर्मपर्वणि
श्रीशिवसहस्रनामस्तोत्ररत्नकथनं नाम सप्तदशोऽध्यायः
श्रीशिवसहस्रनामस्तोत्ररत्नं समाप्तम् ॥

॥ अथ वेदपादस्तवप्रारम्भः ॥

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १

कुण्डलीकृतनागेन्द्रं खण्डेन्दुकृतशेखरम् ।
पिण्डीकृतमहाविघ्नं दुण्डिराजंनमाम्यहम् ॥ २

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरिवारणम् ॥ ३

ऋषय ऊचुः—
पुण्डरीकपुरं प्राप्य जैमिनिर्मुनिसत्तमः ।
किं चकार महायोगी नूतनो वक्तुमर्हसि ॥ ४

सूत उवाचः—
भगवान् जैमिनिर्धीमान्पुण्डरीकपुरे पुरा ।
महर्षिसिद्धगन्धर्वयक्षकिन्नरसेविते ॥ ५

नृत्यद्भिरप्सरस्सङ्घैर्दिव्यगानैश्च शोभिते ।
नृत्यन्तं परमीशानं ददर्श सदसि प्रभुम् ॥ ६

ननाम दूरतो दृष्ट्वा दण्डवत्क्षितिमण्डले ।
वपावुत्थाय देवस्य ताण्डवामृतमङ्गलम् ॥ ७
पार्श्वस्थितां महादेवीं पश्यन्तीं तस्य ताण्डवम् ।
दृष्ट्वा सुसंहृष्टमनाः पपात पुरतो मुनिः ॥ ८
ततश्शिष्यास्समाहूय वेदशास्त्रार्थपारगान् ।
अग्निकेशमकेशं च सतयोगं च माधवम् ॥ ९
वक्रनासं समित्पाणिं धूमगन्धिं कुशासनम् ।
एतैस्सार्थं महादेवं पूजयामास जैमिनिः ॥ १०
ततोऽपि वेदवेदान्तसारार्थं तत्प्रसादतः ।
कृताञ्जलिरुवाचेदं वेदान्तस्तवमुत्तमम् ॥ ११

श्रीजैमिनिरुवाचः—

विघ्नेशविधिमार्ताण्डचन्द्रेन्द्रोपेन्द्रवन्दित ।
नमो गणपते तुभ्यं ब्रह्मणां ब्रह्मणस्पते ॥ १२
उमाकोमलहस्ताब्जसम्भावितललाटिकम् ।
हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् ॥ १३
शिवं विष्णोश्च दुर्दर्शं नरः कस्स्तोतु मर्हति ।

तस्मान्मत्तस्स्तुतिस्सेयमभ्राद्वृष्टिरिवाजनि ॥ १४
नमश्शिवाय साम्बाय नमश्शर्वाय शम्भवे ।
नमो नटाय रुद्राय सदस्सस्पतये नमः ॥ १५
पादभिन्नाहिलोकाय मौळिभिन्नाण्डभित्तये ।
भुजभ्रान्तदिगन्ताय भूतानां पतये नमः ॥ १६
क्वणन्नूपुरयुग्माय विलसत्कृत्तिवाससे ।
फणीद्रमेखलायास्तु पशूनां पतये नमः ॥ १७
कालकालाय सोमाय योगिने शूलपाणये ।
अस्थिभूषाय शुद्धाय जगतां पतये नमः ॥ १८
पात्रे सर्वस्य जगतो नेत्रे सर्वदिवौकसाम् ।
गोत्राणां पतये तुभ्यं क्षेत्राणां पतये नमः ॥ १९
शङ्कराय नमस्तुभ्यं मङ्गळाय नमोऽस्तु ते ।
धनानां पतये तुभ्यमन्नानां पतये नमः ॥ २०
अष्टाङ्गयोगहृष्टाय क्लिष्टभक्तेष्टदायिने ।
इष्टिभास्तुतयूष्टाय पुष्टानां पतये नमः ॥ २१
पञ्चभूताधिपतये कालाधिपतये नमः ।

नम आत्माधिपतये दिशां च पतये नमः ॥ २२
विश्वकर्त्रे महेशाय विश्वभर्त्रे पिनाकिने ।
विश्वहर्त्रेऽग्निनेत्राय विश्वरूपाय वै नमः ॥ २३
ईशान ते तत्पुरुष नमो घोराय ते सदा ।
वामदेव नमस्तुभ्यं सद्योजाताय वै नमः ॥ २४
भूतिभूषाय भक्तानां भीतिभङ्गरताय ते ।
नमो भवाय भर्गाय नमो रुद्राय मीढुषे ॥ २५
सहस्राङ्घ्राय साम्बाय सहस्राधीश ते नमः ।
सहस्रबाहवे तुभ्यं सहस्राक्षाय मीढुषे ॥ २६
सुकपोलाय सोमाय सुललाटाय सुभ्रुवे ।
सुदेहाय नमस्तुभ्यं सुमृडीकाय मीढुषे ॥ २७
वन्देऽहं देवमानन्दसन्दोहं लास्यसुन्दरम् ।
समस्तजगतां नाथं सदसस्पतिमद्भुतम् ॥ २८
भवक्लेशनिमित्तोरुभयच्छेदकृते सताम् ।
नमस्तुभ्यमषाढाय सहमानाय वेधसे ॥ २९
सुजङ्घं सूदरं सूरुं सुकण्ठं सोमभूषणम् ।

सुगण्डं सुदृशं वन्दे सुगन्धिं पुष्टिवर्धनम् ॥ ३०
भिक्षाहारं हरित्श्मश्रुं रक्षाभूषं क्षितिक्षमम् ।
यक्षेशेष्टं नमामीशमक्षरं परमं प्रभुम् ॥ ३१
अर्धालकमवस्त्रार्धमस्थ्युत्पलदलस्रजम् ।
अर्धं पुंलक्षणं वन्दे पुरुषं कृष्णपिङ्गलम् ॥ ३२
सकृत्प्रणतसंसारमहासागरतारकम् ।
प्रणमामि तमीशानं जगतस्तस्थुषस्पतिम् ॥ ३३
त्रातारं जगतामीशं दातारं सर्वसम्पदाम् ।
नेतारं मरुतां वन्दे जेतारमपराजितम् ॥ ३४
तं त्वामन्तकहन्तारं वन्दे मन्दाकिनीधरम् ।
ततानि विदधे योऽयमिमानि त्रीणि विष्टपान् ॥
सर्वज्ञं सर्वगं सर्वं कविं वन्दे तमीश्वरम् ।
यतश्च यजुषा सार्थमृचस्सामानि जज्ञिरे ॥ ३६
भवन्तं सुदृशं वन्दे भूतभव्यभवत्पतिम् ।
सृजन्तीतरकर्माणि यो विश्वा भुवि पश्यति ॥ ३७
हरं सुरनियन्तारं परं तमहमानतः ।

यदाज्ञया जगत्सर्वं व्याप्य नारायणः स्थितः ॥
तं नमामि महादेवं यन्नियोगादिदं जगत् ।
कल्पादौ भगवान् धाता यथापूर्वमकल्पयत् ॥
ईश्वरं तमहं वन्दे यस्य लिङ्गमहर्निशम् ।
यजन्ते सह भार्याभिरिन्द्रज्येष्ठा मरुद्गणाः ॥ ४०
नमामि तमिमं रुद्रं यमभ्यर्च्य सकृत्पुरा ।
अवापुस्त्वं स्वमैश्वर्यं देवासः पूषरातयः ॥ ४१
तं वन्दे देवमीशानं यं शिवं हृदयाम्बुजे ।
सततं यतयश्शान्तास्सञ्जानाना उपासते ॥ ४२
तदस्मै सततं कुर्मो नमः कमलकान्तये ।
उमाकुचपदोरस्का या ते रुद्र शिवा तनूः ॥ ४३
नमस्ते रुद्र भावाय नमस्ते रुद्र केलये ।
नमस्ते रुद्र शान्त्यै च नमस्ते रुद्र मन्यवे ॥ ४४
ईशानं सकलाराध्यं वन्दे सम्पत्समृद्धिदम् ।
यस्य चासीद्धरिश्शस्त्रं ब्रह्मा भवति सारथिः ॥ ४५
श्रुताश्वरथनिष्ठाभ्यां पादाभ्यां त्रिपुरान्तक ।

बाणकार्मुकयुक्ताभ्यां बाहुभ्यामुत ते नमः ॥ ४६
नमः परशवे देवशूलायानलरोचिषे ।
हर्यग्नीन्द्रान्मने तुभ्यमुतोत इषवे नमः ॥ ४७
नमस्ते वासुकिघ्याय विष्फाराय च शङ्कर ।
महते मेरुरूपाय नमस्ते अस्तु धन्वने ॥ ४८
सुरेतरवधूहार हारिणी हरयानिते ।
अन्यान्यस्त्राण्यहं तूर्णमहं तेभ्योऽकरं नमः ॥ ४९
धराधरसुतालीलसरोजाहतबाहवे ।
तस्मै तुभ्यमवोचाम नमो अस्मां अवस्यवः ॥ ५०
रक्ष मामक्षमं क्षीणमक्षक्षतमशिक्षितम् ।
अनाथं दीनमापन्नं दरिद्रं नीललोहित ॥ ५१
दुर्मुखं दुष्क्रियं दुष्टं रक्ष मामीश मादृशम् ।
मादृशानामहं नत्वदन्यं विन्दामि रायसे ॥ ५२
भवाख्येनाग्निना शम्भो रागद्वेषमदार्चिषा ।
दयाळो देह्यमानानामस्माकमविता भव ॥ ५३
परदारं परावासं परवस्त्रं परापियम् ।

हर पाहि परान्नं मां पुरुनामन् पुरुष्टुत ॥ ५४
कीलौकैर्यत्कृतं पुष्टैर्नावमानं सहामहे ।
देवेश तव दानेभ्यो भूरिदा भूरिदेहिनः ॥ ५५
लोकानामुपपन्नानां गर्विणामीश पश्यताम् ।
अस्मभ्यं क्षेत्रमायुश्च वसुरत्नार्हं तथा भर ॥ ५६
याच्ञादौ महतीं लज्जामस्मदीयां घृणानिधे ।
त्वमेव वेत्सि नस्तूर्णमिवग् स्तोतृभ्य आभर ॥
जाया माता पिता चान्ये मा द्विषन्त्यमतिं कृशम् ।
देहि मे महतीं विद्यां राधा विश्वपुषा सह ॥ ५८
अदृष्टार्थेषु सर्वेषु दृष्टार्थेष्वपि कर्मसु ।
मेरुधन्वन्नशक्तेभ्यो बलं देहि तनूषुणः ॥ ५९
लब्धारिषसहस्रस्य नित्यमिष्टवियोगिनः ।
हृद्रोगं मम देवेश हरिमाणं च नाशय ॥ ६०
ये ये रोगाः पिशाचा वा नरा देवाश्च मामिह ।
बाधन्ते देव तान् सर्वान् निबाधस्व महानसि ॥
त्वमेव रक्षितास्माकं नान्यः कश्चन विद्यते ।

तस्मात्स्वीकृत्य देवेश रक्षाणो ब्रह्मणस्पते ॥ ६२
त्वमेवोमापते माता त्वं पिता त्वं पितामहः ।
त्वमायुस्त्वं मतिस्त्वं श्रीरुत भ्रातोतमस्सखा ॥ ६३
यतस्त्वमेव देवेश कर्ता सर्वस्य कर्मणः ।
ततः क्षमस्व तत्सर्वं यन्मया दुष्कृतं कृतम् ॥ ६४
त्वत्समो न प्रभुत्वेन फल्गुत्वेन च मत्समः ।
अतो देव महादेव त्वमस्माकं तवस्तसि ॥ ६५
सुस्थितं भस्मगौराङ्गं तरुणादित्यविग्रहम् ।
प्रसन्नवदनं सौम्यं गायेद्वा मनसा गिरा ॥ ६६
एष एवतु सोऽस्माकं नृत्यन्तं त्वावभासते ।
लोकयन्तमुमाकान्तं पश्येम शरदश्शतम् ॥ ६७
अरोगिणो महाभागा विद्वांसश्च बहुश्रुताः ।
भवन्ति त्वत्प्रसादेन जीवेम शरदश्शतम् ॥ ६८
सदा च बन्धुभिस्सार्धं त्वदीयं ताण्डवामृतम् ।
पिबतः काममीशानं ददाम शरदश्शतम् ॥ ६९
देवदेव महादेव त्वदीयाङ्घ्रिसरोरुहम् ।

कामं मधुमयं पीत्वा मोदाम शरदश्शतम् ॥ ७०
कीटा नागाः पिशाचा वा ये वा केवा भवे भवे ।
तव दासा महादेव भवाम शरदश्शतम् ॥ ७१
सभायामीश ते दिव्यं नृत्यवाद्यकलस्वनम् ।
श्रवणाभ्यां महादेव शृणवाम शरदश्शतम् ॥ ७२
स्मृतिमात्रेण संसारविनाशनपराणि ते ।
नामानि तव दिव्यानि प्रब्रवाम शरदश्शतम् ॥ ७३
इषुसन्धानमात्रेण दग्धत्रिपुरधूर्जटे ।
आधिभिर्व्याधिभिर्नित्य-
मजीतास्याम शरदश्शतम् ॥ ७४
चारुचामीकराभासं गौरीकुचपदोरसम् ।
कदानुलोपयिष्यामि युवानं विश्रुतं कविम् ॥ ७५
प्रमथेंद्रावृतं प्रीतवदनं प्रियभाषणम् ।
सेविष्येऽहं कदा साम्ब सुभासं शुक्रशोचिषम् ॥
बह्वेनसं मामकृतपुण्यलेशं च दुर्मतिम् ।
स्वीकरिष्यति किंन्वीशो नीलग्रीवो विलोहितः ॥

कालशूरानलासक्तभीतिव्याकुलमानसम् ।
कदानु रक्ष्यतीशो मां तु सुग्रीवो अवानतः ॥ ७८
गायका यूयमायात यदि राधादिलिप्सवः ।
धनदस्य सखे सायमुपास्यै गायता नरः ॥ ७९
आगच्छत सखायो मे यदि यूयं मुमुक्षवः ।
स्तुतेशमेवं मुक्त्यर्थमेषविप्रैरभिष्टुतः ॥ ८०
पदे पदे पदे देवपदं नः क्षेष्यति ध्रुवम् ।
प्रदक्षिणं प्रकुर्वीत मध्यक्षं धर्मणा मिमम् ॥ ८१
सर्वं कार्यं युवाभ्यां हि सुकृतं सुहृदौ मम ।
अञ्जलिं कुरुतं हस्तौ रुद्राय स्थिरधन्विने ॥ ८२
यन्मूर्ध मरुता मूर्ध्वं भवं चन्द्रार्धमूर्धकम् ।
मूर्धघ्नं च चतुर्मूर्ध्नं नमस्याकल्मनीकिनम् ॥ ८३
नयने नयनोद्भूतदमनालीढमन्मथम् ।
पश्यन्तं तरुणं सौम्यं भ्राजमानं हिरण्मयम् ॥ ८४
सभायां शूलिनस्सन्ध्यानृत्तवाद्यस्तनामृतम् ।
कर्णौ तूर्णं यथाकामं पातं गौ राविवैरिणे ॥ ८५

नासिके वासुकिश्वासवासिताभासितोरसम् ।
घ्रायतं गरळग्रीवमसभ्यं शर्म यच्छतम् ॥ ८६
स्वस्त्यस्तु सखि ते जिह्वे विद्यादातुरुमापते ।
स्तवमुच्छतरं ब्रूहि जयतामिव दुन्दुभिः ॥ ८७
चेतःपोत नशोच त्वं निन्द्यं विन्दाखिलं जगत् ।
अस्य नृत्तामृतं शम्भो गौरो न तृषितः पिब ॥ ८८
सुगन्धि सुखसंस्पर्शं कामदं सोमभूषणम् ।
गाढमालिङ्ग मच्चित्त योषाजारमिव प्रियम् ॥ ८९

महामयूखाय महाभुजाय
महाशरीराय महाम्बराय ।
महाकिरीटाय महेश्वराय
महोमहाय सुष्टुतमीरयामि ॥ ९०

यथा कथञ्चिद्रचिताभिरीश
प्रसादतस्त्वारुभिरादरेण ।
प्रपूजयामस्तुतिभिर्महेश-
मवाङ्मुखं सहमानमाभिः ॥ ९१

नमश्शिवाय त्रिपुरान्तकाय
जगत्त्रयेशाय दिगम्बराय ।
नमोऽस्तु मुख्याय हराय भूयो
नमो जघन्याय च बुध्नाय च ॥ ९२

नमो विकाराय विकारिणे ते
नमो भवायास्तु भवोद्भवाय ।
बहु प्रजात्यन्तविचित्ररूपा
यतः प्रसूता जगतः प्रसूती ॥ ९३

तस्मै सुरेशोरुकिरीटनाना
रत्नावृताष्टापदविष्टराय ।
भस्माङ्गरागाय नमः परस्मै
यस्मात्परान्ना परमस्ति किंञ्चित् ॥ ९४

सर्पाधिराजौषधिनाथ युद्ध-
क्षुभ्यज्जटामण्डलगह्वराय ।
तुभ्यं नमस्सुन्दरताण्डवाय
यस्मिन्निदगूं सञ्चविचैति सर्वम् ॥ ९५

नमामि नित्यं त्रिपुरारिमेनं
यमान्तकं षण्मुखतातमीशम् ।
ललाटनेत्रार्चितपुष्पचापं
विश्वं पुराणं तमसः परस्तात् ॥ ९६

मुरारिनेत्रार्चितपादपद्म-
मुमाङ्किलाक्षारससक्तपाणिम् ।
नमामि देवं विषनीलकण्ठं
हिरण्यदन्तं शुचिवर्णमादरात् ॥ ९७

अनन्तमव्यक्तमचिन्त्यमेकं
हरन्तमाशाम्बरमम्बराभम् ।
अजं पुराणं प्रणमामि योऽयं-
मणोरणीयान्महतो महीयान् ॥ ९८

अन्तस्थमात्मानमजं न दृष्ट्वा
भ्रमन्ति मूढा गिरिगह्वरेषु ।
पश्चादुदग्दक्षिणतः पुरस्ता-
दधस्विदासीदुपरि स्विदासीत् ॥ ९९

इमं नमामीश्वरमिन्दुमौलिं
शिवं महानन्दमशोकदुःखम् ।
हृदम्बुजे तिष्ठति यः परात्मा
परीत्य सर्वाः प्रदिशो दिशश्च ॥ १००

रागादिकापथ्यसमुद्भवेन
भग्नं भवाख्येन महामयेन ।
विलोक्य मां पालय चन्द्रमौळे
भिषक्तमं त्वाभिसजां शृणोमि ॥ १०१

दुःखाम्बुराशिं सुखलेशहीन-
मस्पृष्टपुण्यं बहुपातकं माम् ।
मृत्योः करस्थं भवसर्पभीतं
पश्चात्पुरस्तादधरादुदक्त्वात् ॥ १०२

गिरीन्द्रजाचारुसुखावलोक-
सुगीतया चारुतयैव दृष्ट्या ।
वयं दयापूरितयैव तूर्ण-
मपोन्न नावा दुरिता तरेम ॥ १०३

अपारसंसारसमुद्रमध्ये
निमग्नमुत्क्रोशमनल्परागम् ।
मामक्षयं पाहि महेश जुष्ट-
मोजिष्ठया दक्षिणयैव रातिम् ॥ १०४

स्मरन् पुरा सञ्चितपातकानि
खरं यमस्याभिमुखं यमारे ।
बिभेमि मे देहि यथेष्टमायु-
र्यदि क्षतायुर्यदि वा परेतः ॥ १०५

सुगन्धगस्सुन्दरभस्मगौरै-
रनन्तभोगैर्मृदुलैरघोरैः ।
इमं कदालिङ्गति मां पिनाकी
स्थिरोभिरङ्गैः पुरुरूप उग्रः ॥ १०६

क्रोशन्तमीशः पतितं भवाब्धौ
नागास्यमण्डूकमिवातिभीतम् ।
कदानु मां रक्ष्यति देवदेवो
हिरण्यरूपस्स हिरण्यसन्दृक् ॥ १०७

चारुस्मितं चन्द्रकलावतंसं
गौरीकटाक्षार्हमयुग्मनेत्रम् ।
आलोकयिष्यामि कदानु देव-
मादित्यवर्णं तमसः परस्तात् ॥ १०८

आगच्छतात्राशु मुमुक्षवो ये
यूयं शिवं चिन्तयतोऽन्तरङ्गे ।
ध्यायन्ति मुक्त्यर्थमिमं हि नित्यं
वेदान्तविज्ञानसुनिश्चितार्थाः ॥ १०९

आयात यूयं भुवनाधिपत्य-
कामा महेशं सकृदर्चयध्वम् ।
एनं पुराभ्यर्च्य हिरण्यगर्भो
भूतस्य जातः पतिरेक आसीत् ॥ ११०

ये कामयन्ते विपुलां श्रियं ते
श्रीकण्ठमेनं सकृदानमन्ताम् ।
श्रीमानयं श्रीपतिवन्द्यपाद-
श्रीणा मुदारो धरुणो रयीणाम् ॥ १११

सुपुत्रकामा अपि ये मनुष्या
युवानमेनं गिरिशं यजन्ताम् ।
यतस्त्रयम्भूर्जगतां विधाता
हिरण्यगर्भस्समवर्तताग्रे ॥ ११२

अलं किमुक्तैर्बहुभिस्समीरितं
समस्तमस्याश्रयणेन सिध्यति ।
पुरैनमाश्रित्य हि कुम्भसम्भवो
दिवा न सक्तं पलितो युवाजनि ॥ ११३

अन्यं परित्यज्य ममाक्षिभृङ्गा
स्सर्वे सदैनं शिवमाश्रयध्वम् ।
आमोदवानेष मृदुश्शिवोऽयं
स्वादुः किलायं मधुमां उतायम् ॥ ११४

भविष्यसि त्वं प्रतिमाविहीना
विनिर्जिताऽशेषनरामरा च ।
नमोऽस्तु ते वाणि महेशमेनं
स्तुहि श्रुतं गर्तनदं युवानम् ॥ ११५

यद्यन्मनश्चिन्तयसि स्वमिष्टं
तत्तद्भविष्यत्यखिलं ध्रुवं ते ।
दुःखे निवृत्ते विषये कदाचि-
द्यक्ष्यामहे सौमनसाय रुद्रम् ॥ ११६

अज्ञानयोगादपचारकर्म
यत्पूर्वमस्माभिरनुष्ठितं ते ।
तद्देव सोढ्वा सकलं दयाळो
पितेव पुत्रान् प्रति नो जुषस्व ॥ ११७

संसाराख्यक्रुद्धसर्पेण तीव्रैः
रागद्वेषोन्मादलोभादिदन्तैः ।
दष्टं दृष्ट्वा मां दयालुः पिनाकी
देवत्राता त्रायतामप्रयच्छन् ॥ ११८

इत्युक्त्वान्ते यत्समाधेर्न मन्त्रो
रुद्रं ध्यात्वा यान्ति जन्माहिदष्टाः ।
सन्तो नीलग्रीवमन्त्रात्मनाहं
तत्त्वायामि त्र्यक्षणा वन्दमानः ॥ ११९

भवाब्धिभीषणज्वरेण पीडितान्महाभया-
नशेषपातकालयान दूरकाललोचनान् ।
अनाथनाथ ते करेण मेषजेन कालह-
न्दूषणोवसो महेमृशस्व शूर राधसे ॥ १२०
जयेम येन सर्वमेतदिष्टमष्टदिग्गतं
भुवः स्थलं नभः स्थलं दिवःस्थलं च तद्धुतम् ।
य एष सर्वदेवदानवानतस्सभापति-
स्सनो ददा तुरं रयिं रायिं पिशङ्गसन्धृतम् ॥ १२१
नमो भवाय ते हराय भूतिभासितो
रसे नमो भवारये भवार्तिभीतिभङ्गदायिने ।
नमश्शिवाय विश्वपाय शाश्वताय शूलिने
न यस्य हन्यते सखा न जीयते कदाचन ॥ १२२
सुरपतिपतये नमो नमः
क्षितिपतिपतये नमो नमः ।
ज्यापतिपतये नमो नमोऽम्बिका-
पतय उमापतये पशुपतये नमो नमः ॥

विनायकं वन्दनमस्तकाहृति-
प्रणादसङ्कुष्टसमस्तविष्टपम् ।
नमामि नित्यं प्रणतार्तिनाशनं
कविं कवीनामुपमश्रवस्तमम् ॥ १२४

देवा युद्धे यागे विप्राः स्त्रीयां सिद्धिं ह्रायं ह्रायं ।
यं सिञ्चन्ति स्कन्दं वन्दे सुब्रह्मण्योमंसुब्रह्मण्योम् ॥

नमश्शिवायै जगदम्बिकायै
शिवप्रियायै शिवविग्रहायै ।
समुद्भवोद्भूवाद्रिपतेस्सुतायै
चतुष्कवर्दायुवतिस्सुपेशाः ॥ १२६

हिरण्यवर्णां मणिनूपुरांघ्रिं
प्रसन्नवक्त्रांशुकपद्महस्ताम् ।
विशालनेत्रां प्रणमामि गौरीं
वचो विदं वाच मुदीरयन्तीम् ॥ १२७

नमामि मेनातनयाममेय-
मुमामिमां मानवतीं च मान्याम् ।

करोति या भूतिसितौ स्तनौ द्वौ
प्रियं सखायं परिषस्वजाना ॥ १२८
कान्तामिमां कान्तनितान्तकान्ति
भ्रान्तामुमां तां नतहर्यजेन्द्राम् ।
नकोऽस्मियास्ते गिरिशस्य पार्श्वे
विश्वानि देवी भुवनाभिचक्ष्या ॥ १२९
वन्दे गौरीं तुङ्गपीनस्तनीं तां
चन्द्रापीडां मृष्टसर्वाङ्गरागाम् ।
एषा देवी प्राणिनामन्तरात्मा
देवंदेवं राधसे चोदयन्तीम् ॥ १३०
एनां वन्दे दीनरक्षाविनोदा-
मेनां कन्यामानतानन्ददात्रीं ।
या विद्यानां मङ्गळानां च वाचा-
मेषा नेत्री राधसस्मृनृतानाम् ॥ १३१
भवानुभूतोरुभयापहन्त्रीं
भवानुभागाभरणैकभोगी ।
धियं परां देहि शिवप्रिये मे
ययातिविश्वा दुरिता तरेम १३२

शिवे कथं त्वं स्तुतिभिस्तु गीयसे
जगत्त्रयी केलिरियं शिवः पतिः ।
हरिस्तु दासोऽनुचरेन्दिरा शची
सरस्वती वा सुभगागणेर्ष्वसु ॥ ११३
इमं स्तवं जैमिनिना समीरितं
द्विजोत्तमो यः पठतीशभक्तितः ।
तमिष्टवाक्सिद्धिमतिश्रियः परं
परिष्वजन्ते जनयो यथामतिम् ॥ ११४
महीपतिर्यस्तु युयुत्सुरादरा-
दिदं पठत्याशु तथैव सादरात् ।
प्रयान्ति वा शीघ्रमथान्तकं भियं
परं दधाना हृदयेषु शत्रवः ॥ ११५
लभन्ते पठन्तो मतिं बुद्धिकामा
लभन्ते चिरायुस्तथाऽऽयुष्यकामाः ।
लभन्ते तथैव श्रियं पुष्टिकामा
लभन्ते ह पुत्रान् लभन्ते ह पौत्रान् ॥ ११६

इति श्रीजैमिनिमहर्षिणा प्रणीतो वेदपादस्तवस्सम्पूर्णः ॥

॥ शिवमहिम्नःस्तोत्रम् ॥

पुष्पदन्त उवाच—

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥ १

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २

मधुस्फीता वाचः परममृतं निर्मितवत-
स्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम्।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृ-
त्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन्वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद्भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥ ६

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७

महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां
नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८
ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ९
तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः ।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १०
अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।
शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ ११

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः ॥ ११

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीं
अधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।
न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयो-
र्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १३

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्याऽऽसीद्यस्त्रिनयन विषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥ १४

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥

मही पादाघाताद्व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ १६

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥ १७

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥ १८

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥ १९

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधानऋते ।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः ॥ १०

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ।
क्रतुभ्रंषस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥ ११

प्रजानाथ नाथ प्रसभमभिकं स्वां दुहितरं
गतां रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुःपाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ १२

स्खलद्वाण्याशंसा धृतधनुषमह्राय तृणव-
त्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटना-
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥ १३

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथाऽपि स्मर्तॄणां वरद परमं मङ्गलमसि ॥ २४

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥ २५

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
परं विभ्रस्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥ २६

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥ २७

भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रविहितनमस्योऽस्मि भवते ॥ २८
नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥ २९
बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३०
कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः ।
इति चकितममंदीकृत्य मां भक्तिराधा-
द्धरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥ ३१

असितगिरिसमं स्यात्कज्जलं सिंधुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सार्वकालं
तदपि तव गुणानामीश पारं न याति ॥ ३२

असुरसुरमुनीन्द्रैरर्चितस्येंदुमौले-
र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगुणवरिष्ठः पुष्पदंताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥ ३३

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठतिपरमभक्त्या शुद्धचित्तः पुमान्यः ।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनायुःपुत्रवान्कीर्तिमांश्च ॥ ३४

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥ ३५

दीक्षादानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तवपाठस्य कलां नार्हंति षोडशीम् ॥ ३६

कुसुमदशननामा सर्वगन्धर्वराजः
शशिधरवरमौलेर्देवदेवस्य दासः ।
स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥ ३७

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥ ३८

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥ ३९

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥ ४०

इति पुष्पदन्तविरचितं शिवमहिम्नःस्तोत्रं सम्पूर्णम्

॥ चन्द्रशेखराष्टकम् ॥

चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर पाहि माम् ।
चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर रक्ष माम् ॥ १

रत्नसानुशरासनं रजताद्रिशृङ्गनिकेतनं
सिञ्जिनीकृतपन्नगेश्वरमच्युताननसायकम् ।
क्षिप्रदग्धपुरत्रयं त्रिदिवालयैरभिवन्दितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै नमः ॥ २

पञ्चपादपपुष्पगन्धपदाम्बुजद्वयशोभितं
भाललोचनजातपावकदग्धमन्मथविग्रहम् ।
भस्मदिग्धकलेबरं भवनाशनं भवमव्ययं
चन्द्रशेखर ... ॥ ३

मत्तवारणमुख्यचर्मकृतोत्तरीयमनोहरं
पङ्कजासनपद्मलोचनपूजिताङ्घ्रिसरोरुहम् ।
देवसिन्धुतरङ्गशीकरसिक्तशुभ्रजटाधरं
चन्द्रशेखर ... ॥ ४

यक्षराजसखं भगाक्षरं भुजङ्गविभूषणं
शैलराजसुतापरिष्कृतचारुवामकलेवरम् ।
क्ष्वेडनीलगलं परश्वधधारिणं मृगधारिणं
चन्द्रशेखर ... ॥ ५

कुण्डलीकृतकुण्डलेश्वरकुण्डलं वृषवाहनं
नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम् ।
अन्धकान्धकमाश्रितामरपादपं शमनान्तकं
चन्द्रशेखर ... ॥ ६

भेषजं भवरोगिणामखिलापदामपहारिणं
दक्षयज्ञविनाशनं त्रिगुणात्मकं त्रिविलोचनम् ।
भक्तिमुक्तिफलप्रदं सकलाघसङ्घनिबर्हणं
चन्द्रशेखर ... ॥ ७

भक्तवत्सलमर्चितं निधिमक्षयं हरिदम्बरं
सर्वभूतपतिं परात्परमप्रमेयमनुत्तमम् ।
सोमवारिनभोहुताशनसोमपानिलखाकृतिं
चन्द्रशेखर ... ॥ ८

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं
संहरन्तमपि प्रपञ्चमशेषलोकनिवासिनम् ।
क्रीडयन्तमहर्निशं गणनाथयूथसमन्वितं
चन्द्रशेखर ... ॥ ९

मृत्युभीतमृकण्डसूनुकृतस्तवं शिवसन्निधौ
यत्रकुत्र च यः पठेन्नहि तस्य मृत्युभयं भवेत् ।
पूर्णमायुररोगितामखिलार्थसम्पदमादरं
चन्द्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥ १०

॥ इति श्रीचन्द्रशेखराष्टकस्तोत्रं सम्पूर्णम् ॥

॥ उपमन्युकृताशिवस्तोत्रम् ॥

जय शङ्कर पार्वतीपते
मृड शम्भो शशिखण्डमण्डन ।
मदनान्तक भक्तवत्सल
प्रियकैलास दयासुधाम्बुधे ॥ १

सदुपायकथास्वपण्डितो
हृदये दुःखशरेण खण्डितः ।
शशिखण्डशिखण्डमण्डनं
शरणं यामि शरण्यमीश्वरम् ॥ २

महतः परितः प्रसर्पत-
स्तमसो दर्शनभेदिनो भिदे ।
दिननाथ इव स्वतेजसा
हृदयव्योम्नि मनागुदेहि नः ॥ ३

न वयं तव चर्मचक्षुषा
पदवीमप्युपवीक्षितुं क्षमाः ।

कृपयाऽभयदेन चक्षुषा
सकलेनेश विलोकयाशु नः ॥ ४
त्वदनुस्मृतिरेव पावनी
स्तुतियुक्ता न हि वक्तुमीश सा ।
मधुरं हि पयः स्वभावतो
ननु कीदृक्सितशर्करान्वितम् ॥ ५
सविषोऽप्यमृतायते भवा-
ञ्छवमुण्डाभरणोऽपि पावनः ।
भव एव भवान्तकः सतां
समदृष्टिर्विषमेक्षणोऽपि सन् ॥ ६
अपि शूलधरो निरामयो
दृढवैराग्यरतोऽपि रागवान् ।
अपि भैक्ष्यचरो महेश्वर-
श्चरितं चित्रमिदं हि ते प्रभो ॥ ७
वितरत्यभिवाञ्छितं दृशा
परिदृष्टः किल कल्पपादपः ।

हृदये स्मृत एव धीमते
नमतेऽभीष्टफलप्रदो भवान् ॥ ८
सहसैव भुजङ्गपाशवा-
न्विनिगृह्णाति न यावदन्तकः ।
अभयं कुरु तावदाशु मे
गतजीवस्य पुनः किमौषधैः ॥ ९
सविषैरिव भीमपन्नगै-
र्विषयैरेभिरलं परिक्षतम् ।
अमृतैरिव सम्भ्रमेण मा-
मभिषिञ्चाशु दयावलोकनैः ॥ १०
मुनयो बहवोऽद्य धन्यतां
गमिताः स्वाभिमतार्थदर्शिनः ।
करुणाकर येन तेन मा-
मवसन्नं ननु पश्य चक्षुषा ॥ ११
प्रणमाम्यथ यामि चापरं
शरणं कं कृपणाभयप्रदम् ।

विरहीव विभो प्रियामयं
परिपश्यामि भवन्मयं जगत् ॥ १२
बहवो भवताऽनुकम्पिताः
किमितीशान न मानुकम्पसे ।
दधता किमु मन्दराचलं
परमाणुः कमठेन दुर्धरः ॥ १३
अशुचिं यदि मानुमन्यसे
किमिदं मूर्ध्नि कपालदाम ते ।
उत शाठ्यमसाधुसङ्गिनं
विषलक्ष्मासि न किं द्विजिह्वधृक् ॥ १४
क दृशं विदधामि किं करो-
म्यनुतिष्ठामि कथं भयाकुलः ।
क नु तिष्ठसि रक्ष रक्ष मा-
मयि शम्भो शरणागतोऽस्मि ते ॥ १५
विलुठाम्यवनौ किमाकुलः
किमुरो हन्मि शिरश्छिनद्मि वा ।
किमु रोदिमि रारटीमि किं
कृपणं मां न यदीक्षसे प्रभो ॥ १६

शिव सर्वग शर्व शर्मदं
प्रणतो देव दयां कुरुष्व मे ।
नम ईश्वर नाथ दिक्पते
पुनरेवेश नमो नमोऽस्तु ते ॥ १७
शरणं तरुणेन्दुशेखरः
शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ
शरणं नान्यदुपैमि दैवतम् ॥ १८
उपमन्युकृतं स्तवोत्तमं
जपतः शम्भुसमीपवर्तिनः ।
अभिवाञ्छितभाग्यसम्पदः
परमायुः प्रददाति शङ्करः ॥ १९
उपमन्युकृतं स्तवोत्तमं
प्रजपेद्यस्तु शिवस्य सन्निधौ ।
शिवलोकमवाप्य सोऽचिरा-
त्सह तेनैव शिवेन मोदते ॥ २०

इत्युपमन्युकृतं शिवस्तोत्रं सम्पूर्णम् ॥

॥ शिवभुजङ्गम् ॥

गलद्दानगण्डं मिलद्भृङ्गषण्डं
चलच्चारुशुण्डं जगत्त्राणशौण्डम् ।
लसद्दन्तकाण्डं विपद्भङ्गचण्डं
शिवप्रेमपिण्डं भजे वक्रतुण्डम् ॥ १

अनाद्यन्तमाद्यं परं तत्त्वमर्थं
चिदाकारमेकं तुरीयं त्वमेयम् ।
हरिब्रह्ममृग्यं परब्रह्मरूपं
मनोवागतीतं महः शैवमीडे ॥ २

स्वशक्त्यादिशक्त्यन्तसिंहासनस्थं
मनोहारिसर्वाङ्गरत्नादिभूषम् ।
जटाहीन्दुगङ्गास्थिशश्वर्कमौलिं
परं शक्तिमित्रं नुमः पञ्चवक्त्रम् ॥ ३

शिवेशानतत्पूरुषाघोरवामा-
दिभिर्ब्रह्मभिः हृन्मुखैः षड्भिरङ्गैः ।

अनौपम्यषट्त्रिंशतं तत्त्वविद्या-
मतीतं परं त्वां कथं वेत्ति को वा ॥ ४
प्रवालप्रवाहप्रभाशोणमर्धं
महत्त्वन्मणिश्रीमहःश्याममर्धम् ।
गुणस्यूतमेकं वपुश्चैकमन्तः
स्मरामि स्मरापत्तिसम्पत्तिहेतुम् ॥ ५
स्वसेवासमायातदेवासुरेन्द्रा-
नमन्मौलिमन्दारमालाभिषिक्तम् ।
नमस्यामि शम्भो पदाम्भोरुहं ते
भवाम्भोधिपोतं भवानीविभाव्यम् ॥ ६
जगन्नाथ मन्नाथ गौरीसनाथ
प्रपन्नानुकम्पिन्विपन्नार्तिहारिन् ।
महःस्तोममूर्ते समस्तैकबन्धो
नमस्ते नमस्ते पुनस्ते नमोऽस्तु ॥ ७
महादेव देवेश देवादिदेव
स्मरारे पुरारे यमारे हरेति ।

ब्रुवाणः स्मरिष्यामि भक्त्या भवन्तं
ततो मे दयाशील देव प्रसीद ॥ ८
विरूपाक्ष विश्वेशविद्यादिकेश
त्रयीमूल शम्भो शिव त्र्यम्बक त्वम् ।
प्रसीद स्मर त्राहि पश्याव पुष्य
समस्त्राप्तुहीति क्षपा हि क्षिपामः ॥ ९
त्वदन्यः शरण्यः प्रपन्नस्य नेति
प्रसीद स्मरन्नेव हन्यास्तु दैन्यम् ।
न चेत्ते भवेद्भक्तवात्सल्यहानि-
स्ततो मे दयालो दयां सन्निधेहि ॥ १०
अयं दानकालस्त्वहं दानपात्रं
भवान्नाथ दाता त्वदन्यं न याचे ।
भवद्भक्तिमेव स्थिरां देहि मह्यं
कृपाशील शम्भो कृतार्थोऽस्मि तस्मात् ॥
पशुं वेत्सि चेन्मां त्वमेवाधिरूढं
कलङ्कीति वा मूर्ध्नि धत्से त्वमेव

द्विजिह्वः पुनः सोऽपि ते कण्ठभूषा
त्वदङ्गीकृताः शर्व सर्वेऽपि धन्याः ॥ १३

न शक्नोमि कर्तुं परद्रोहलेशं
कथं प्रीयसे त्वं न जाने गिरीश ।
तदा हि प्रसन्नोऽसि कस्यापि कान्ता-
सुतद्रोहिणो वा पितृद्रोहिणो वा ॥ १३

स्तुतिं ध्यानमर्चां यथावद्विधातुं
भजन्नप्यजानन्महेशावलम्बे ।
प्रपन्नं सुतं त्रातुमग्रे मृकण्डो-
र्यमप्राणनिर्वापणं त्वत्पदाब्जम् ॥ १४

शिरो दृष्टि हृद्रोग शूलप्रमेह
ज्वरार्शो जरायक्ष्म हिक्का विषार्तान् ।
त्वमाद्यो भिषग्भेषजं भस्म शम्भो
त्वदुल्लाघयास्मान्वपुर्लाघवाय ॥ १५

दरिद्रोऽस्म्यभद्रोऽस्मि भग्नोऽस्मि दूये
विषण्णोऽस्मि सन्नोऽस्मि भिन्नोऽस्मि चाहम् ।

भवान्प्राणिनामन्तरात्मासि शम्भो
ममाधिं न वेत्सि प्रभो रक्ष मां त्वम् ॥ १६
त्वदक्ष्णोः कटाक्षः पतेत्त्र्यक्ष यत्र
क्षणं क्ष्मा च लक्ष्मीः स्वयं तं वृणीते ।
किरीटस्फुरच्चामरच्छत्रमाला
कलाची गज क्षामभूषाविशेषैः ॥ १७
भवान्यै भवायापि मात्रे च पित्रे
मृडान्यै मृडायाप्यघघ्न्यै मखघ्ने ।
शिवाङ्गयै शिवाङ्गाय कुर्मः शिवायै
शिवायाम्बिकायै नमस्त्र्यम्बकाय ॥ १८
भवद्गौरवं मल्लघुत्वं विदित्वा
प्रभो रक्ष कारुण्यदृष्ट्यानुगं माम् ।
शिवात्मानुभावस्तुतावक्षमोऽहं
स्वशक्त्या कृतं मेऽपराधं क्षमस्व ॥ १९
यदा कर्णरन्ध्रं व्रजेत्कालवाह्
द्विषत्कण्ठ घण्टाघणात्कारनादः ।

वृषाधीशमारुह्य देवोपवाह्यं
तदा वत्स मा भीरिति प्रीणय त्वम् ॥ २०
यदा दारुणा भीषणा भाषणा मे
भविष्यन्त्युपान्ते कृतान्तस्य दूताः ।
तदा मन्मनस्त्वत्पदाम्भोरुहस्थं
कथं निश्चलं स्यान्नमस्तेऽस्तु शम्भो ॥ २१
यदा दुर्निवारव्यथोऽहं शयानो
लुठन्निःश्वसन्निःसृता व्यक्तवाणिः ।
तदा जह्नुकन्याजलालङ्कृतं ते
जटामण्डलं मन्मनोमन्दिरं स्यात् ॥ २२
यदा पुत्रमित्रादयो मत्सकाशे
रुदन्त्यस्य हा कीदृशीयं दशेति ।
तदा देवदेवेश गौरीश शम्भो
नमस्ते शिवायेत्यजस्रं ब्रवाणि ॥ २३
यदा पश्यतां मामसौ वेत्ति नासा-
नयं श्वास एवेति वाचो भवेयुः ।

तदा भूतिभूषं भुजङ्गावनद्धं
पुरारे भवन्तं स्फुटं भावयेयम् ॥ २४
यदा यातनादेह सन्देहवाही
भवेदात्मदेहे न मोहो महान्मे ।
तदा काशशीतांशु सङ्काशभीश
स्मरारे वपुस्ते नमस्ते स्मराणि ॥ २५
यदा पारमच्छायमस्थानमद्धि-
र्जनैर्वा विहीनं गमिष्यामि मार्गम् ।
तदा तं निरुन्धन्कृतान्तस्य मार्गं
महादेव मह्यं मनोज्ञं प्रयच्छ ॥ २६
यदा रौरवादि स्मरन्नेव भीत्या
व्रजाम्यत्र मोहं महादेव घोरम् ।
तदा मामहो नाथ तस्तारयिष्य-
त्यनाथं पराधीनमर्धेन्दुमौळे ॥ २७
यदा श्वेतपत्रायतालङ्घ्य शक्तैः
कृतान्ताद्भयं भक्तवात्सल्यभावात् ।

तदा पाहि मां पार्वतीवल्लभान्यं
न पश्यामि पातारमेतादृशं मे ॥ २८
इदानीमिदानीं मृतिर्मे भवित्री-
त्यहो सन्ततं चिन्तया पीडितोऽस्मि ।
कथं नाम मा भून्मृतौ भीतिरेषा
नमस्ते गतीनां गते नीलकण्ठ ॥ २९
अमर्यादमेवाह मा बालवृद्धं
हरन्तं कृतान्तं समीक्ष्यास्मि भीतः ।
मृतौ तावकाङ्घ्र्यब्जदिव्यप्रसादा-
द्भवानीपते निर्भयोऽहं भवानि ॥ ३०
जराजन्म गर्भाधिवासादिदुःखा-
न्यसह्यानि जह्यां जगन्नाथदेव ।
भवन्तं विना मे गतिर्नैव शम्भो
दयालो न जागर्ति किं वा दया ते ॥ ३१
शिवायेति शब्दो नमःपूर्व एष
स्मरन्मुक्तिकृन्मृत्युहा तत्त्ववाची ।

महेशान मा गान्मनस्तो वचस्तः
सदा मह्यमेतत्प्रदानं प्रयच्छ ॥ ३२

त्वमत्यम्ब मां पश्य शीतांशुमौलि-
प्रिये भेषजं त्वं भवव्याधिशान्तौ ।
बहुक्लेशभाजं पदाम्भोजपोते
भवाब्धौ निमग्नं नयस्वाद्य पारम् ॥ ३३

अनुद्यल्ललाटाक्षिवह्निप्ररोहै-
रवामस्फुरच्चारु वामोरुशोभैः ।
अनङ्गभ्रमद्भोगिभूषाविशेषै-
रचन्द्रार्धचूडैरलं दैवतैनैः ॥ ३४

अकण्ठे कलङ्कादनङ्गे भुजङ्गा-
दृपाणौ कपालादभालेऽनलाक्षात् ।
अमौलौ शशाङ्कादवामे कलत्रा-
दहं देवमन्यं न मन्ये न मन्ये ॥ ३५

महादेव शम्भो गिरीश त्रिशूलिं-
स्त्वयीदं समस्तं विभातीति यस्मात् ।

शिवादन्यथा दैवतं नाभिजाने
शिवोऽहं शिवोऽहं शिवोऽहम् ॥ १६

यतोऽजायतेदं प्रपञ्चं विचित्रं
स्थितिं याति यस्मिन्यदेकान्तमन्ते ।
स कर्णादिहीनः स्वयं ज्योतिरात्मा
शिवोऽहं शिवोऽहं शिवोऽहम् ॥ १७

किरीटे निशेशो ललाटे हुताशो
भुजे भोगिराजो गले कालिमा च ।
तनौ कामिनी यस्य तत्तुल्यदेवं
न जाने न जाने न जाने न जाने ॥ १८

अनेन स्तवेनादरादम्बिकेशं
परां भक्तिमासाद्य यं ये नमन्ति ।
मृतौ निर्भयास्ते जनास्तं भजन्ते
हृदम्भोजमध्ये सदासीनमीशम् ॥ १९

भुजङ्गप्रियाकल्प शम्भो मयैवं
भुजङ्गप्रयातेन वृत्तेन कृतम् ।
नरस्तोत्रमेतत्पठित्वोरुभक्त्या
सुपुत्रायुरारोग्यमैश्वर्यमेति ॥ ४०

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
॥ शिवभुजङ्गं सम्पूर्णम् ॥

॥ अथ शिवपञ्चाक्षरस्तोत्रम् ॥

नागेन्द्रहाराय विलोचनाय
भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय
तस्मै नकाराय नमः शिवाय ॥ १

मन्दाकिनीसलिलचन्दनचर्चिताय
नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारमुख्यबहुपुष्पसुपूजिताय
तस्मै मकाराय नमः शिवाय ॥ २

शिवाय गौरीवदनाब्जवृन्द-
सूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय
तस्मै शिकाराय नमः शिवाय ॥ ३

वसिष्ठकुम्भोद्भवगौतमार्य-
मुनीन्द्रदेवार्चितशेखराय ।

चन्द्रार्कवैश्वानरलोचनाय
तस्मै वकाराय नमः शिवाय ॥ ४

यक्षस्वरूपाय जटाधराय
पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय
तस्मै यकाराय नमः शिवाय ॥ ५

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ६

॥ इति श्रीमच्छङ्कराचार्यविरचितं शिवपञ्चाक्षरस्तोत्रं सम्पूर्णम् ॥

॥ अथ शिवापराधक्षमापणस्तोत्रम् ॥

आदौ कर्मप्रसङ्गात् कलयति
कलुषं मातृकुक्षौ स्थितं मां
विण्मूत्रामेध्यमध्ये कथयति
नितरां जाठरो जातवेदाः ।
यद्यद्वै तत्र दुःखं व्यथयति
नितरां शक्यते केन वक्तुं
क्षन्तव्यो मेऽपराधः शिव शिव
शिव भोः श्रीमहादेव शम्भो ॥ १

बाल्ये दुःखातिरेकान्मललुलित-
वपुः स्तन्यपाने पिपासा
नो शक्तश्चेन्द्रियेभ्यो भवगुण-
जनिता जन्तवो मां तुदन्ति ।
नानारोगादिदुःखाद्रुदनपरवशः
शङ्करं न स्मरामि क्षन्त ... ॥ २

प्रौढोऽहं यौवनस्थो विषयविष-
धरैः पञ्चभिर्मर्मसन्धौ
दष्टो नष्टो विवेकः सुतधन-
युवतिस्वादसौख्ये निषण्णः ।
शैवीचिन्ताविहीनं मम हृदय-
महो मानगर्वाधिरूढं क्षन्त ... ॥ ३
वार्धक्ये चेन्द्रियाणां विगत-
गतिमतिश्चादिदैवाधितापैः
पापै रोगैर्वियोगैस्त्वनवसित-
वपुः प्रौढिहीनं च दीनम् ।
मिथ्यामोहाभिलाषैर्भ्रमति
मम मनो धूर्जटेर्ध्यानशून्यं क्षन्त ... ॥ ४
नो शक्यं स्मार्तकर्म प्रतिपद-
गहनप्रत्यवायाकुलाख्यं
श्रौते वार्ता कथं मे द्विजकुल-
विहिते ब्रह्ममार्गेऽसुरारे ।

ज्ञातो धर्मो विचारैः श्रवण-
मननयोः किं निदिध्यासितव्यं क्षन्त ...॥
स्नात्वा प्रत्यूषकाले स्नपनविधि-
विधौ नाहृतं गाङ्गतोयं
पूजार्थं वा कदाचिद्बहुतर-
गहनात्खण्डबिल्वीदलानि ।
नानीता पद्ममाला सरसि विक-
सिता गन्धपुष्पैस्त्वदर्थं क्षन्त ... ॥ ६
दुग्धैर्मध्वाज्ययुक्तैर्दधिसित-
सहितैः स्नापितं नैव लिङ्गं
नो लिप्तं चन्दनाद्यैः कनक-
विरचितैः पूजितं न प्रसूनैः ।
धूपैः कर्पूरदीपैर्विविधरसयुतै-
र्नैव भक्ष्योपहारैः क्षन्त ... ॥ ७
ध्यात्वा चित्ते शिवाख्यं प्रचुर-
तरधनं नैव दत्तं द्विजेभ्यो

हृत्यं ते लक्षसंख्यैर्हुतवह-
वदने नार्पितं बीजमन्त्रैः ।
नो तप्तं गाङ्गतीरे व्रतजप-
नियमै रुद्रजाप्यैर्न वेदैः क्षन्त ... ॥ ८

स्थित्वा स्थाने सरोजे प्रणव-
मयमरुत्कुण्डले सूक्ष्ममार्गे
शान्ते स्वान्ते प्रलीने प्रकटित-
विभवे ज्योतिरूपे पराख्ये ।
लिङ्गज्ञे ब्रह्मवाक्ये सकल-
तनुगतं शङ्करं न स्मरामि क्षन्त ... ॥ ९

नम्रो निस्सङ्गशुद्धस्त्रिगुण-
विरहितो ध्वस्तमोहान्धकारो
नासाग्रे न्यस्तदृष्टिर्विदित-
भवगुणो नैव दृष्टः कदाचित् ।
उन्मत्ताऽवस्थया त्वां विगत-
कलिमलं शङ्करं न स्मरामि क्षन्त... ॥१०

चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे
सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे ।
दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे
मोक्षार्थं कुरु चित्तवृत्तिमखिलामन्यैस्तु किं कर्मभिः ॥

किं वाऽनेन धनेन वाजि-
करिभिः प्राप्तेन राज्येन किं
किंवा पुत्रकलत्रमित्रप-
शुभिर्देहेन गेहेन किम् ।
ज्ञात्वैतत्क्षणभङ्गुरं सपदि
रे त्याज्यं मनो दूरतः
स्वात्मार्थं गुरुवाक्यतो
भज भज श्रीपार्वतीवल्लभम् ॥ १२

आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ।
लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं
तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शम्भो ॥ १४

इति श्रीमत्परमहंस परिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
॥ शिवापराधक्षमापणस्तोत्रं सम्पूर्णम् ॥

॥ रावणकृतशिवताण्डवस्तोत्रम् ॥

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥ १

धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुर-
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि ॥ २

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा-
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे ।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥ ३

सहस्रलोचनप्रभृत्यशेषलेखशेखर-
प्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः ।

भुजङ्गराजमालया निबद्धजाटजूटकः
श्रियै चिराय जायतां चकोरबन्धुशेखरः ॥ ४
ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा-
निपीतपञ्चसायकं नमन्निलिम्पनायकम् ।
सुधामयूखलेखया विराजमानशेखरं
महाकपालिसम्पदे शिरो जटालमस्तु नः ॥ ५
करालभालपट्टिकाधगद्धगद्धगज्ज्वल-
द्धनञ्जयाधरीकृतप्रचण्डपञ्चसायके ।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक-
प्रकल्पनैकशिल्पिनि त्रिलोचने मतिर्मम ॥ ६
नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुर-
त्कुहूनिशीथिनीतमःप्रबन्धबन्धुकन्धरः ।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः ॥ ७
प्रफुल्लनीलपङ्कजप्रपञ्चकालिमच्छटा-
विडम्बिकण्ठकन्धरारुचिप्रबन्धकन्धरम् ।

स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥ ८

अगर्वसर्वमङ्गलाकलाकदम्बमञ्जरी-
रसप्रवाहमाधुरीविजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥ ९

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमस्फुर-
द्धगद्धगद्विनिर्गमत्करालफालहव्यवाट् ।
धिमिद्धिमिद्धिमिध्वनन्मृदङ्गतुङ्गमङ्गल-
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः ॥ १०

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो-
र्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समं प्रवर्तयन्मनः कदा सदाशिवं भजे ॥ ११

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वस-
न्विमुक्तदुर्मतिः सदा शिरःस्थमञ्जलिं वहन् ।

विमुक्तलोललोचनाललामफाललग्नकः
शिवेति मन्त्रमुच्चरन्कदा सुखी भवाम्यहम् ॥ ११

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति सन्ततम् ।
हरे गुरौ स भक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां तु शङ्करस्य चिन्तनम् ॥ १३

पूजावसानसमये दशवक्त्रगीतं
यः शम्भुपूजनमिदं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः ॥ १४

॥ इति श्रीरावणविरचितं शिवताण्डवस्तोत्रं सम्पूर्णम् ॥

॥ द्वादशज्योतिर्लिङ्गस्तोत्रम् ॥



सौराष्ट्रदेशे विशदेऽतिरम्ये
ज्योतिर्मयं चन्द्रकलावतंसम् ।
भक्तिप्रदानाय कृपावतीर्णं
तं सोमनाथं शरणं प्रपद्ये ॥ १

श्रीशैलशृङ्गे विबुधातिसङ्गे
तुलाद्रितुङ्गेऽपि मुदा वसन्तम् ।
तमर्जुनं मल्लिकपूर्वमेकं
नमामि संसारसमुद्रसेतुम् ॥ २

अवन्तिकायां विहितावतारं
मुक्तिप्रदानाय च सज्जनानाम् ।
अकालमृत्योः परिरक्षणार्थं
वन्दे महाकालमहासुरेशम् ॥ ३

कावेरिकानर्मदयोः पवित्रे
समागमे सज्जनतारणाय ।

सदैव मान्धातृपुरे वसन्त-
मोङ्कारमीशं शिवमेकमीडे ॥ ४
पूर्वोत्तरे प्रज्वलिकानिधाने
सदा वसन्तं गिरिजासमेतम् ।
सुरासुराराधितपादपद्मं
श्रीवैद्यनाथं तमहं नमामि ॥ ५
याम्ये सदङ्गे नगरेऽतिरम्ये
विभूषिताङ्गं विविधैश्च भोगैः ।
सद्भक्तिमुक्तिप्रदमीशमेकं
श्रीनागनाथं शरणं प्रपद्ये ॥ ६
महाद्रिपार्श्वे च तटे रमन्तं
सम्पूज्यमानं सततं मुनीन्द्रैः ।
सुरासुरैर्यक्षमहोरगाद्यैः
केदारमीशं शिवमेकमीडे ॥ ७
सह्याद्रिशीर्षे विमले वसन्तं
गोदावरीतीरपवित्रदेशे ।

यद्दर्शनात्पातकमाशु नाशं
प्रयाति तं त्र्यम्बकमीशमीडे ॥ ८
सुताम्रपर्णीजलराशियोगे
निबध्य सेतुं विशिखैरसंख्यैः ।
श्रीरामचन्द्रेण समर्पितं तं
रामेश्वराख्यं नियतं नमामि ॥ ९
यो डाकिनीशाकिनिकासमाजै-
र्निषेव्यमाणः पिशिताशनैश्च ।
सदैव भीमादिपदप्रसिद्धः
तं शङ्करं भक्तहितं नमामि ॥ १०
सानन्दमानन्दवने वसन्त-
मानन्दकन्दं हतपापवृन्दम् ।
वाराणसीनाथमनाथनाथं
श्रीविश्वनाथं शरणं प्रपद्ये ॥ ११
इलापुरे रम्यविशालकेऽस्मि-
न्समुल्लसन्तं च जगद्वरेण्यम् ।

नित्यं महोदारतरस्वभावं
घृष्णेश्वराख्यं शरणं प्रपद्ये ॥ १२

ज्योतिर्मयद्वादशलिङ्गकानां
शिवात्मनां प्रोक्तमिदं क्रमेण ।
स्तोत्रं पठित्वा मनुजाऽतिभक्त्या
फलं तदालोक्यनिशं भजेच्च ॥ १३

॥ इति श्रीद्वादशज्योतिर्लिङ्गस्तोत्रं संपूर्णम् ॥

॥ वेदसारशिवस्तवः ॥

पशूनां पतिं पापनाशं परेशं
गजेंद्रस्य कृत्तिं वसानं वरेण्यम् ।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं
महादेवमेकं स्मरामि स्मरारिम् ॥ १

महेशं सुरेशं सुरारातिनाशं
विभुं विश्वनाथं विभूत्यङ्गभूषम् ।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं
सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥ २

गिरीशं गणेशं गले नीलवर्णं
गवेन्द्राधिरूढं गुणातीतरूपम् ।
भवं भास्वरं भस्मना भूषिताङ्गं
भवानीकलत्रं भजे पञ्चवक्त्रम् ॥ ३

शिवाकान्त शम्भो शशाङ्कार्धमौले
महेशान शूलिन् जटाजूटधारिन् ।

त्वमेको जगव्यापको विश्वरूप
प्रसीद प्रसीद प्रभो पूर्णरूप ॥ ४
परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोङ्कारवेद्यम् ।
यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वम् ॥ ५
न भूमिर्न चापो न वह्निर्न वायु-
र्न चाकाशमास्ते न तन्द्रा न निद्रा ।
न ग्रीष्मो न शीतं न देशो न वेषो
न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥ ६
अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानाम् ।
तुरीयं तमःपारमाद्यन्तहीनं
प्रपद्ये परं पावनं द्वैतहीनम् ॥ ७
नमस्ते नमस्ते विभो विश्वमूर्ते
नमस्ते नमस्ते चिदानन्दमूर्ते ।

नमस्ते नमस्ते तपोयोगगम्य
नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥ ८
प्रभो शूलपाणे विभो विश्वनाथ
महादेव शंभो महेश त्रिनेत्र ।
शिवाकान्त शान्त स्मरारे पुरारे
त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥ ९
शम्भो महेश करुणामय शूलपाणे
गौरीपते पशुपते पशुपाशनाशिन् ।
काशीपते करुणया जगदेतदेक-
स्त्वं हंसि पासि विदधासि महेश्वरोऽसि ॥
त्वत्तो जगद्भवति देव भव स्मरारे
त्वय्येव तिष्ठति जगन्मृड विश्वनाथ ।
त्वय्येव गच्छति लयं जगदेतदीश
लिङ्गात्मकं हर चराचरविश्वरूपिन् ॥ ११

॥ इति श्रीमच्छङ्कराचार्यविरचितं वेदसारशिवस्तोत्रं सम्पूर्णम् ॥

॥ निर्वाणदशकम् ॥

न भूमिर्न तोयं न तेजो न वायु-
र्न खं नेंद्रियं वा न तेषां समूहः ।
अनैकान्तिकत्वात्सुषुप्त्येकसिद्ध-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ १

न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यानयोगादयोऽपि ।
अनात्माश्रयोऽहं ममाध्यासहानात्तदेको ... ॥ २

न माता पिता वा न देवा न लोका
न देवा न यज्ञा न तीर्थं न वेदाः ।
सुषुप्तौ निरस्तातिशून्यात्मकत्वात्तदेको ... ॥ ३

न सांख्यं न शैवं न तत्पाञ्चरात्रं
न जैनं न मीमांसकादेर्मतं वा ।
विशिष्टानुभूत्या विशुद्धात्मकत्वात्तदेको .... ॥ ४

न शुक्लं न कृष्णं न रक्तं न पीतं
न पीनं न कुब्जं न ह्रस्वं दीर्घम् ।
अरूपं तथा ज्योतिराकारकत्वात्तदेको ... ॥ ५

न जाग्रन्न मे स्वप्नको वा सुषुप्ति-
र्न विश्वो न वा तेजसःप्राज्ञको वा ।
अविद्यात्मकत्वात्त्रयाणां तुरीयं तदेको ... ॥ ५
न शास्ता न शास्त्रं न शिष्यो न शिक्षा
न च त्वं न चाहं न चायं प्रपञ्चः ।
स्वरूपावबोधाद्विकल्पासहिष्णुस्तदेको ... ॥ ६
न चोर्ध्वं न चाधो न चान्तर्न बाह्यं
न मध्यं न तिर्यङ् न पूर्वा परा दिक् ।
वियद्व्यापकत्वादखण्डैकरूपस्तदेको ... ॥ ८
अपि व्यापकत्वादितत्त्वात्प्रयोगा-
त्स्वतःसिद्धभावादनन्याश्रयत्वात् ।
जगत्तुच्छमेतत्समस्तं तदन्यस्तदेको ... ॥ ९
न चैकं तदन्यद्द्वितीयं कुतः स्या-
न्न चाकेवलत्वं न वा केवलत्वम् ।
न शून्यं न चाशून्यमद्वैतकत्वा-
त्कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥ १०

॥ इति श्रीमच्छङ्कराचार्यविरचितं निर्वाणदशकस्तोत्रं सम्पूर्णम् ॥

॥ निर्वाणषट्कम् ॥

मनोबुद्ध्यहङ्कारचित्तानि नाहं
न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।
न च व्योम भूमिर्न तेजो न वायु-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ १

न च प्राणसंज्ञो न वै पञ्चवायु-
र्न वा सप्तधातुर्न वा पञ्चकोशः ।
न वाक्पाणिपादं न चोपस्थपायू चिदानन्द ...॥ २

न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्षश्चिदा ... ॥ ३

न पुण्यं न पापं न सौख्यं न दुःखं
न मंत्रो न तीर्थं न वेदा न यज्ञाः ।
अहं भोजनं नैव भोज्यं न भोक्ता चिदा ... ॥ ४

न मृत्युर्न शङ्का न मे जातिभेदः
पिता नैव मे नैव माता च जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्यश्चिदा ... ॥ ५
अहं निर्विकल्पो निराकाररूपी
विभुत्वाच्च सर्वत्र सर्वेन्द्रियाणाम् ।
न चासङ्गतं नैव मुक्तिर्न मेयश्चिदा ... ॥ ६

॥ इति श्रीमच्छङ्कराचार्यविरचितं निर्वाणषट्कं सम्पूर्णम् ॥

॥ कालभैरवाष्टकम् ॥

देवराजसेव्यमानपावनाङ्घ्रिपङ्कजं
व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादियोगिवृन्दवन्दितं दिगम्बरं
काशिकापुराधिनाथकालभैरवं भजे ॥ १

भानुकोटिभास्वरं भवाब्धितारकं परं
नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
कालकालमम्बुजाक्षमक्षशूलमक्षरं काशिका ... ॥२

शूलटङ्कपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं
काशिका ... ॥ ३

भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं
भक्तवत्सलं स्थितं समस्तलोकविग्रहम् ।

विनिकणन्मनोज्ञहेमकिङ्किणीलसत्कटिं
काशिका ... ॥ ४
धर्मसेतुपालकं त्वधर्ममार्गनाशकं
कर्मपाशमोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्णशेषपाशशोभिताङ्गमण्डलं काशिका ... ॥
रत्नपादुकाप्रभाभिरामपादयुग्मकं
नित्यमद्वितीयमिष्टदैवतं निरञ्जनम् ।
मृत्युदर्पनाशनं करालदंष्ट्रमोक्षणं काशिका ... ॥ ६
अट्टहासभिन्नपद्मजाण्डकोशसन्ततिं
दृष्टिपातनष्टपापजालमुग्रपापशासनम् ।
अष्टसिद्धिदायकं कपालमालिकन्धरं
काशिका ... ॥ ७
भूतसङ्घनायकं विशालकीर्तिदायकं
काशिवासलोकपुण्यपापशोधकं विभुम् ।
नीतिमार्गकोविदं पुरातनं जगत्पतिं
काशिका ... ॥ ८

कालभैरवाष्टकं पठन्ति ये मनोहरं
ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम् ।
शोकमोहदैन्यलोभकोपतापनाशनं
ते प्रयान्ति कालभैरवाङ्घ्रिसन्निधिं ध्रुवम् ॥ ९

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
॥ कालभैरवाष्टकं सम्पूर्णम् ॥

॥ शिवपादादिकेशान्तस्तुतिः ॥

कल्याणं वो विधत्तां कटक-
वटलसत्कल्पवाटीनिकुञ्ज-
क्रीडासंसक्तविद्याधरनिवहवधूगीतरुद्रापदानः ।
तारैर्हेरम्बनादैस्तरलितनिनदत्तारकारातिकेकी-
कैलासश्रृङ्गनिर्वृत्त्यभिजनकपदस्सर्वदा पर्वतेन्द्रः ॥ १

यस्य प्राहुस्स्वरूपं सकलदिविषदां सारसर्वस्वयोगं
यस्येषुश्शार्ङ्गधन्वा समज-
नि जगतां रक्षणे जागरूकः ।
मौर्वी दर्वीकराणामपि च परि-
बृढः पूजयी सा च लक्ष्यं
सोऽव्यादव्याजमस्मानशिव-
भिदनिशं नाकिनां श्रीपिनाकः ॥ २

आवङ्कावेगहारी सकल-
दिविषामङ्घ्रिपद्माश्रयाणां

मातङ्गाद्युग्रदैत्यप्रकर-
तनुगळद्रक्तधारात्तधारः ।
क्रूरः सूरायुतानामपि च
परिभवं स्वीयभासा वितन्वन्
घोराकारः कुठारो दृढत-
रदुरिताख्याटवीं पाटयेन्नः ॥ ३
कालारातेः कराग्रे कृतव-
सतिरुरुशाणशातो रिपूणां
काले काले कुलाद्रिप्रवर-
तनयया कल्पितस्नेहलेपः ।
पायान्नः पावकार्चिःप्रसर-
सखमुखः पापहन्ता नितान्तं
शूलश्रीपादसेवाभजन-
परहृदां पालनैकान्तशीलः ॥ ४
देवस्याङ्काश्रयायाः कुलगि-
रिदुहितुर्नेत्रकोणप्रचार-

प्रस्तारानत्युदारान् पिपठि-
षुरिव यो नित्यमत्यादरेण ।
आधत्ते भङ्गितुङ्गैरनिश-
मवयवैरन्तरङ्गं समोदं
सोमापीडस्य सोऽयं प्रदिश-
तु कुशलं पाणिरङ्गः कुरङ्गः ॥
कण्ठप्रान्तावसज्जत्कनक-
मयमहाघण्टिकाघोरघोषैः
कण्ठारावैरकुण्ठैरपि भरि-
तजगच्चक्रवाळान्तराळः ।
चण्ड प्रोद्दण्डशृङ्गः ककुभ-
कबलितोत्तुङ्गकैलासशृङ्गः
कण्ठे कालस्य वाहः शमय-
तु दुरितं शाश्वतं शाकरेन्द्रः ॥ ६
निर्यद्दानाम्बुधारापरिमळ-
तरळीभूतलोलम्बपाली

झङ्कारैः शङ्कराद्रेः शिखर-
शतदरीः पूरयन् भूरिघोषैः ।
शार्वस्सोवर्णशैलप्रतिम-
पृथुवपुस्सर्वविघ्नोपहर्ता
शर्वाण्याः पूर्वसूनुस्स भव-
तु भवतां स्वस्तिदो हस्तिवक्त्रः ॥ ७
यः पुण्यैर्देवतानां समज-
नि शिवयोरश्लाघ्यवीरैकमत्या
यन्नाम्नि श्रूयमाणे दितिज-
भटघटा भीतिभारं भजन्ते ।
भूयात्सोऽयं विभूत्यै निशित-
शरशिखापाटितक्रौञ्चशैल-
स्संसारागाधकूपोद्धरण-
दितसमुत्तारकस्तारकारिः ॥ ८
आरूढप्रौढवेगप्रविजित-
पवनं तुङ्गतुङ्गं तुरङ्गं

चेलं नीलं वसानः करत-
लविलसत्काण्डकोदण्डदण्डः ।
रागद्वेषादिनानाविधमृगपटलीभीतिकृद्भूतभर्ता
कुर्वन्नाखेटलीलां परिलसतु मनःकानने मामकीने ॥
अम्भोजाभ्यां च रम्भारथच-
रणलताद्वन्द्वकुम्भीन्द्रकुम्भै-
र्विंबेनेन्दोश्च कम्बोरुपरि-
विलसता विद्रुमोत्पलाभ्याम् ।
अम्भोदेनापि सम्पादितमु-
पजनिताडम्बरं शम्बरारेः
शम्भोस्सम्भोगयोग्यं किमपि
धनमिदं सम्भवेत्सम्पदे नः ॥ १०
वेणीसौभाग्यविस्मापितत-
पनसुताचारुवेणीविलासा-
न्वाणीनिर्धूतवाणीकरत-
लविधृतोदारवीणाविराजन् ।

एणीनेत्रान्तभङ्गीनिरस-
नानिपुणापाङ्गकोणानुपासे
शोणान्प्राणानुदूढप्रति-
नवमुषुमाकन्दळानिन्दुमौळेः ॥ ११

नृत्तारम्भेषु हस्ताहतमु-
रजधिमीधिक्कृतैरत्युदारैः
श्चित्तानन्दं विधत्ते सदसि
भगवतस्सन्ततं यस्स नन्दी ।
चण्डीशाद्यास्तथान्ये चतुर-
गुणगणप्राणितस्वामिस-
त्कारोत्कर्षोद्यत्प्रतापाः प्रमथ-
परिवृढास्सन्तु सन्तोषिणो नः ॥ १२

मुक्तामाणिक्यजालैः परिकलि-
तमहासालमालोकनीयं
प्रत्युप्तानर्घरत्नैर्दिशि भ-
वनैः कल्पितैर्दिक्पतीनाम्

उद्यानैरद्रिकन्यापरिजन-
वनितामाननीयैः परीतं
हृद्यं स्तुत्यं सुराणां मम भुव-
नपतेर्धाम सोमार्धमौलेः ॥ ११

स्तम्भैर्जम्भारिरत्नप्रवर-
विरचितैरसम्भृतोपान्तभागं
शुम्भत्सोपानमार्गं शुचिम-
णिनिचयैर्गुम्भितानल्पशिल्पम् ।
कुम्भैस्सम्पूर्णशोभं शिरसि
सुघटितैः शातकुम्भैरपङ्कै-
रशम्भोरसम्भावनीयं सकल-
मुनिजनैस्सर्वदा सुप्रसन्नः ॥ १४

न्यस्तो मध्ये सभायाः परिस-
रविलसत्पादपीठाभिरामो
हृद्यः पादैश्चतुर्भिः कनक-
मणिमयैरुच्चकैरुज्ज्वलात्मा ।

वासोरत्नेन केनाप्यधिक-
मृदुकेरणास्रतो विस्मृतश्री-
पीठः पीडाधरं नः शमय-
तु शिवयोस्स्वैरसंवासयोग्यः ॥ १५

आसीनस्याधिपीठं त्रिजग-
दधिपतेरङ्घ्रिपीठानुषक्तौ
पाथोजाभोगभाजौ परिमृदु-
छतलोल्लासिपद्माभिलेखौ ।
पातां पादावुभौ तौ नमद-
मरकिरीटोल्लसच्चारुहीर-
श्रेणीशोणायमानोन्नतन-
खदशकोद्भासमानौ समानौ ॥ १६

यन्नादो वेदवाचां निगदति
निखिलं लक्षणं पक्षिकेतु-
र्लक्ष्मीसम्भोगसौख्यं विरचय-
ति ययोश्चापदे रूपभेदे ।

शम्भोरस्सम्भावनीये पदक-
मलसमासङ्गतस्तुङ्गशोभे
माङ्गल्यं नस्समग्रं सकल-
सुखकरे नूपुरे पूरयेताम् ॥ १७

अङ्गे शृङ्गारयोनेस्सपदि
शलभतां नेत्रवह्नौ प्रयाते
शत्रोरुद्धृत्य तस्मादिषुधि-
युगमथ न्यस्तमग्रे किमेतत् ।
शङ्कामित्थं नतानाममर-
परिषदामन्तरं क्रूरय-
त्तत्सङ्घातं चारुजङ्घायुग-
मखिलपते रंहसां संहरेन्नः ॥ १८

जानुद्वन्द्वेन मीनध्वज नृप-
रसमुद्रोपमानेन साकं
राजन्तौ राजरम्भाकरिक-
रकनकस्तम्भसम्भावनीयौ

ऊरू गौरीकराम्भोरुहसर-
सममामर्दनानन्दभाजा-
वूरू दूरीक्रियेतां दुरित-
मुपचितं जन्मजन्मान्तरे नः ॥ १९

आमुक्तानर्घरत्नप्रकर-
करपरिष्वक्तकल्याणकाञ्ची-
दाम्ना बद्धेन दुग्धद्युति-
निचयमुषा चीनपट्टाम्बरेण ।
संवीते शैलकन्यामुचरि-
तपरिपाकायमाने नितम्बे
नित्यं नानर्तु चित्तं मम निखि-
लजगत्स्वामिनस्सोममौलेः ॥ २०

सन्ध्याकालानुरञ्जद्दिनक-
रसरुचा कालधौतेन गाढं
व्याबद्धस्निग्धवर्णस्सरस-
मुदरबन्धेन पीतोपमेन ।

उदीर्णैस्स्वप्रकाशैरुपचित-
महिमा मन्मथारेरुदारो
मय्या मिथ्यार्थसंधष्षड् दिशतु
मम सदा सङ्गतिं मङ्गळानाम् ॥ २१

नाभीचक्रालवालान्नवनव-
सुषमादोहळश्रीपरीता-
दुद्गच्छन्ती पुरस्तादुदर-
पथमतिक्रम्य वक्षः प्रयान्ती ।
श्यामा कामागमार्थप्रकथ-
नलिपिवद्भासते या निकामं
सा मा सोमार्धमौळेस्सुखय-
तु सततं रोमवल्ली मतल्ली ॥ २२

आश्लेषेष्वद्रिजायाः कठिन-
कुचतटीलिप्तकाश्मीरपङ्क-
व्यासङ्गादुच्चदर्कद्युतिभिरुपचितस्पर्धमुद्दामहृद्यम् ।
वक्षारातेरुदूढप्रतिनवमणिमालावलीभासमानं

वक्षो विक्षोभिताघं सतत-
नतिजुषां रक्षतादक्षतं नः ॥ २३
वामाङ्के विष्फुरन्त्याः करत-
लविलसच्चारु रक्तोत्पलायाः
कान्तायाः वामवक्षोरुहभरशिखरोन्मर्दनव्यग्रमेकम् ।
अन्यांश्लीनत्युदारान्वरपरशुमृगालङ्कृतानिसन्धुनौळे-
र्बाहूनाबद्धहेमाङ्गदम-
णिकटकानन्तरालोकयामः ॥ २४
सन्भ्रान्तायाद्रिशत्रोः पतिवि-
लयभयात्सर्वलोकोपतापा-
त्संविग्नस्यापि विष्णोः सरभ-
समुभयोर्वारणप्रेरणाभ्याम् ।
मध्ये त्रैशङ्कवीयामनुभवति
दशां यत्र हालाहलोष्मा
सोऽयं सर्वापदां नः शमय-
तु निचयं नीलकण्ठस्य कण्ठः ॥ २५

हृद्यैरद्रीन्द्रकन्यामृदुदशनपदैर्मुद्रितो विद्रुमश्री-
रुद्योतन्त्या नितान्तं धवल-
धवलया मिश्रितो दन्तकान्त्या ।
मुक्तामाणिक्यपूरव्यतिकरसदृशा तेजसा भासमान-
स्सद्योजातस्य दद्यादधर-
मणिरसौ सम्पदां सञ्चयं नः ॥ २६

कर्णालङ्कारनानामणिनिकररुचां सञ्चयैरञ्चितायां
वर्ण्यार्धां खर्णपद्मोदरप-
रिविलसत्कर्णिकासन्निभायाम् ।
पद्भ्यां प्राणवायोः प्रणत-
जनहृदम्भोजवानस्य शम्भो-
र्नित्यं नश्चित्तमेतद्विरच-
यतु सुखेनाखिकां नासिकायाम् ॥ २७

अत्यन्तं भासमाने रुचिर-
तररुचां सङ्गमात्सन्मणीना-
मुद्यच्चण्डांशुधामप्रसर-

निरसनस्पष्टदृष्टापदाने ।
भूयास्तां भूतये नः करिवरजयिनः कर्णपाशावलम्बे
भक्ताळीफालसज्जज्जनिमर-
णलिपेः कुण्डले कुण्डले ते ॥ २८

याभ्यां कालव्यवस्था भवति
तनुमतां यो मुखं देवतानां
येषामाहुस्स्वरूपं जगति
मुनिवरा देवतानां त्रयीं ताम् ।
रुद्राणीवक्त्रपङ्केरुहसत-
तविहरोत्सुकेन्दिन्दिरेभ्य-
स्तेभ्यस्त्रिभ्यः प्रणामाञ्जलिमु-
परचये त्रीक्षणस्येक्षणेभ्यः ॥ २९

वामं वामाङ्गाया वदन-
सरसिजे व्यावलद्वल्लभाया
व्यानम्रेष्वन्यदन्यत्पुनर-
लिकभवं पीतनिश्शेषरौक्ष्यम् ।

भूयो भूयोऽपि मोदान्निपत-
दतिदयाशीतलं चूतबाणे
दक्षारेरीक्षणानां त्रयमप-
हरतादाशु तापत्रयं नः ॥ ३०

यस्मिन्नर्धेन्दुमुग्धद्युतितिमि-
रतिरस्कारनिस्तन्द्रकान्तौ
काश्मीरक्षोदसङ्कल्पितमि-
व रुचिरं चित्रकं भाति नेत्रम् ।
तस्मिन्नुल्लीलचिल्लीनटव-
रतरुणीलास्यरङ्गायमाणे
कालारेः फालदेशे विहर-
तु हृदयं वीतचिन्तान्तरं नः ॥ ३१

स्वामिन् गङ्गामिवाङ्गीकुरु त-
व शिरसा मामपीत्यर्थयन्तीं
धन्यां कन्यां खरांशोरिशति
दहति किन्वेष कारुण्यशाली ।

इत्थं शङ्कां जनानां जनय-
दतिघनं कौशिकं कालमेघ-
च्छायं भूयादुदारं त्रिपुर-
विजयिनः श्रेयसे भूयसे नः ॥ ३२

शृङ्गाराकल्पयोग्यैरिशखरिव-
रसुतासत्सखीहस्तलूनै-
स्सूनैराबद्धमालावलिप-
रिविलसत्सौरभाकृष्टभृङ्गम् ।
तुङ्गं माणिक्यकान्त्या परिह-
सितसुरावासशैलेन्द्रशृङ्गं
सङ्गं नः सङ्कटानां विघट-
यतु काङ्कटीकं किरीटम् ॥ ३३

वक्राकारः कळङ्की जडत-
नुरहमप्यङ्घ्रिसेवानुभावा-
दुत्तंसत्वं प्रयातस्सुलभ-
तरघृणास्यन्दिनश्चन्द्रमौळेः ।

तत्सेवन्तां जनौघाश्शिव-
मिति निजयावस्थयापि ब्रुवाणं
वन्दे देवस्य शम्भोर्मुकुट-
सुघटितं मुग्धपीयूषभानुम् ॥ १४

कान्त्या सम्फुल्लमल्लीकुसुम-
धवळया व्याप्य विश्वं विराजन्
वृत्ताकारो वितन्वन्मुहुरपि
च वरां निर्वृतिं पादभाजाम् ।
सानन्दं नन्दिदोष्णा मणिक-
टकवता वाह्यमानः पुरारेः
श्वेतच्छत्राख्यशीतद्युतिर-
पहरतादापदस्तापदा नः ॥ १५

दिव्याकल्पोज्ज्वलानां शिव-
गिरिसुतयोः पार्श्वयोराश्रितानां
रुद्राणीसत्सखीनामतितर-
लकटाक्षाञ्चलैरञ्चितानाम् ।

उद्वेल्लद्बाहुवल्लीविलसन-
समये चामरान्दोलनीना-
मुद्भूतः कङ्कणाळीकलय-
कलकलो वारयेदापदो नः ॥ ३६
खर्गौकस्सुन्दरीणां सुललि-
तवपुषां स्वामिसेवापराणां
वल्गद्भूषाणि वक्त्राम्बुजपरि-
विगळन्मुग्धगीतामृतानि ।
नित्यं नृत्तान्युपासे भुजवि-
धुतिपदन्यासभावावलोक-
प्रत्युद्यत्प्रीतिमाद्यन्प्रथमनट-
नटीदत्तसम्भावनानि ॥ ३७
स्थानप्राप्तया स्वराणां किमपि
विशदतां व्यञ्जयन्मञ्जुवीणा-
स्वानाक्षिप्तन्नताळक्रमम-
मृतमिवास्वाद्यमानं शिवायाम् ।

नानारागादिहृद्यं नवर-
समधुरस्तोत्रजातानुविद्धं
गानं वीणामहर्षेः कलम-
तिललितं कर्णपूरायतान्नः ॥ १८

चेतो जातप्रमोदं सपदि
विदधति प्राणिनां वाणिनीनां
पाणिद्वन्द्वाग्रकूजत्सुललि-
तविलसत्स्वर्णताळानुकूला ।
स्त्रीयारावेण पार्श्वोभरर-
वपटुना नादयन्तीं मयूरीं
मायूरी मन्दभावं मणिमु-
रजभवा मार्जना मार्जयेन्नः ॥ १९

देवेभ्यो दानवेभ्यः पितृमु-
निपरिषत्सिद्धविद्याधरेभ्यः
साध्येभ्यश्चारणेभ्यो मनुज-
पशुलसज्जातिकीटादिकेभ्यः ।

श्रीकैलासप्ररूढास्तृणवि-
टपिमुखाश्चापि ये सन्ति तेभ्य-
स्सर्वेभ्यो निर्विचारं नतिमु-
परचये शर्वपादाश्रयेभ्यः ॥ ४०

इत्थं ध्यायन् प्रभाते प्रतिदि-
वसमिदं स्तोत्ररत्नं पठेयः
किंवा ब्रूमस्तदीयं सुचरि-
तमथवा कीर्तयामस्समासात् ।
सम्पज्ज्ञातं समग्रं सदसि
बहुमतिं सर्वलोकप्रियत्वं
सम्प्राप्यायुश्शतान्ते पद-
मयति परब्रह्मणो मन्मथारेः ॥ ४१

इति श्रीमत्परमहंस परिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
॥ शिवपादादिकेशान्तस्तुतिः सम्पूर्णा ॥

॥ शिवकेशादिपादान्तवर्णनस्तोत्रम् ॥

देयासुर्मूर्ध्नि राजत्सरस-
सुरसरित्पारपर्यन्तनिर्य-
त्प्रांशुस्तम्बाः पिशङ्गा-
स्तुलितपरिणतारक्तशालीलतावः ।
दुर्वारापत्तिगर्तश्रितनिस्त्रि-
लजनोत्तारणे रज्जुभूता
घोराघोर्वीरुहालीदहन-
शिखिशिखाः शर्म शार्वाः कपर्दाः ॥ १
कुर्वन्निर्वाणमार्गप्रगम-
परिलसद्रूप्यसोपानशङ्कां
शक्रारीणाम्पुराणां त्रय-
विजयकृतस्पष्टरेखायमाणम् ।
अव्याद्व्याजमुच्चैरलि-
कहिमधराधित्यकान्तस्थिधोय-

जाहव्याभं मृडानीक-
मितुरुडुपरुक्पाण्डरं वह्निपुण्ड्रम् ॥ २
क्रुध्यद्गौरीप्रसादानतिस-
मयपदाङ्कुषसङ्क्रान्तलाक्षा-
बिन्दुस्पर्धिस्मरारेः स्फटिक-
मणिदृषन्मन्मणिक्यशोभम् ।
मूर्धन्युद्यद्दिव्यसिन्धोः पतित-
शफरिकाकारि वोमास्तकंस्ता-
दस्तोकापत्तिकृत्यै हुतवह-
कणिका मोक्षरूक्षं सदाक्षि ॥ ३
भूत्यै दग्भूतयोः स्याद्यदहिम-
हिमरुग्बिम्बयोः स्निग्धवर्णो
दैत्यौघध्वंसशंसीस्फुटइव
परिवेषावशेषो विभाति ।
सर्गस्थित्यन्तवृत्तिर्मयियसमु-
पगतेऽतीवनिर्वृत्तगर्वं

शार्वाणीभर्तुरुच्चैर्युगल-
मथदधद्विघ्नमंतद्भुवोर्वः ॥ ४
युग्मेरुक्माब्जपिञ्जे प्रहृद्व
पिहिते द्राग्ययोः प्राग्दुहित्रा
शैलस्य ध्वान्तनीलाम्बररचि-
तबृहत्कञ्चुकोऽभूत्प्रपञ्चः ।
ते त्रैनेत्रे पवित्रे त्रिदशवर-
घटामित्रजैत्रोप्रशस्ते
नेत्रेनेत्रे भवेतां द्रुतमिह
भवतामिन्द्रियाश्वान्नियन्तुम् ॥ ५
चण्डीवक्त्रार्पणेच्छोस्तदनु
भगवतः पाण्डुरुक्पाण्डुगण्ड-
प्रोद्यत्कण्डं विनेतुं वितनुत-
इव ये रत्नकोणैर्विघृष्टिम् ।
चण्डार्चिर्मण्डलाभे सतत-
नतजनध्वान्तखण्डातिशौण्डे

चाण्डीशेते श्रिये स्तामधिक-
मवनताखण्डले कुण्डले वः ॥ ६

खट्वाङ्गोदग्रपाणेः स्फुटविक-
टपुटोवक्रन्ध्रप्रवेश-
प्रेप्सूदञ्चत्फणोरुश्वसदति-
धवलाहीन्द्रशङ्कांदधानः ।
युष्माकं कम्रवक्त्राम्बुरुह-
परिलसत्कर्णिकाकारशोभः
शश्वत्त्राणाय भूयादसम-
तिविमलोत्तुङ्गकोणः सघोणः ॥ ७

क्रुध्यत्यद्धा ययोः स्वां तनुमति-
लसतोर्बिम्बतांलक्ष्यन्ती
भर्त्रे स्पर्धातिनिम्नाम्रुहुरित-
रवधूशङ्कया शैलकन्या ।
युष्मांस्तौशश्वदुच्चैरबहुल-
दशमीशर्वरीशान्तिशुभ्रा-

वन्द्यास्तां दिव्यसिन्धोः कमि-
तुरवनमल्लोकपालौकपोलौ ॥ ८
यो भासा भान्त्युपान्तस्थितइव
निभृतं कौस्तुभोद्भ्रष्टुमिच्छ-
न्सोत्थक्लेहाश्रितान्तं गलगत-
गरलं पत्युरच्चैः पशूनाम् ।
प्रोद्यत्प्रेम्णायमार्द्रा पिबति
गिरिसुतासम्पदः सातिरेका
लोकारक्षोणीकृतान्ता यदधर-
महसासोऽधरोवोविधत्ताम् ॥ ९
अत्यर्थं राजते या वदनशश-
धरादुद्गलच्चारुवाणी-
पीयूषाम्भः प्रवाहप्रसरपरि-
लसत्फेनबिन्द्वावलीव ।
देयात्सा दन्तपङ्क्तिश्चिरमिह
दनुदायाददौवारिकस्य

द्युत्या दीप्तेन्दुकुन्दच्छविर-
मलतरप्रोन्नताम्रामुदं वः ॥ १०

न्यक्कुर्वन्नुर्वराभृन्निभघन-
समयोद्भुष्टमेघौघघोषं
स्फूर्जद्वार्घ्युत्थितोरुध्वनित-
मपि परब्रह्मभूतो गभीरः ।
सुव्यक्तो व्यक्तमूर्तेः प्रकटित-
करणः प्राणनाथस्य सत्याः
प्रीत्या वः संविदध्यात्फलविक-
लमलं जन्मनादः सनादः ॥ ११

भासा यस्य त्रिलोकी लसति-
परिलसत्फेनबिन्दुर्णवान्त-
र्व्यामग्ने वाति गौरस्तुलित-
सुरसद्विद्वारिपूरप्रसारः ।
पीनात्मा दन्तभाभिर्भृशमह-
हृहकारातिभीमः सदेष्टां-

पुष्टां तुष्टिं कृषीष्ट स्फुटमिह
भवतामदहामोऽष्टमूर्तेः ॥ ११
सद्यो जाताख्यमाद्यं यदु-
विमलमुदग्वर्ति यद्वामदेवं
नाम्ना हेम्ना सदृक्षं जलदनिभ-
मघोराह्वयं दक्षिणं यत् ।
यद्वालार्कप्रभं तत्पुरुष-
निगदितं पूर्वमीशानसंज्ञं
यद्दिव्यं तानि शम्भोर्भवद-
भिलषितं पञ्चवक्त्रानि ॥ १२
आत्मप्रेम्णो भवान्या स्वय-
मिव रचिताः सादरं सांवनन्या
मध्या तिस्रः सुनीलाञ्जन-
निभगररेखाः समाभान्ति यस्याम् ।
आकल्पानल्पभासा भृशरु-
चिरतरा कम्बुकल्पान्विकायाः

पत्युः सात्यन्तमन्तर्विल-
सतु सततं मन्थराक्रन्धरा वः ॥ १४

वक्रेन्द्रोर्दन्तलक्ष्म्याश्चिरम-
धरमहाकौस्तुभस्यान्तराले
स्रोत्थानां प्रार्थयन् यः स्थिति-
मचलभुवे वारयन्त्यै निवेशम् ।
प्रायुङ्क्ते वाशिषो यः प्रतिपद-
ममृतत्वे स्थितः कालशत्रोः
कालं कुर्वन् गलं वो हृदयमल-
मलं क्षालयेत् कालकूटः ॥ १५

प्रौढप्रेमाकुलायाद्दृढतरप-
रिरम्भेषु पर्वेन्दुमुख्याः
पार्वत्याश्चारुचामीकरवलय-
पदैराङ्कितं कान्तिशालि ।
रङ्गन्नागाङ्गदाढ्यं सततम-
विहितं कर्म निर्मूलयेत्त-

द्रोर्मूलं निर्मलं यद्भृदिदुरि-
तमपास्यार्जितं धूर्जटेर्वः ॥ १६

कण्ठाश्लेषमाप्तादिवद्दिव-
कमितुः स्वर्गसिन्धोः प्रवाहाः
क्रान्त्यै संसारसिन्धोः स्फटि-
कमणिमहासङ्क्रमाकारदीर्घाः ।
तिर्यग्विष्कम्भभूताश्चिभुव-
नवसतेर्भिन्नदैत्येभदेहा
बाहावस्ताहरस्यद्भुतमिह-
निवहानंहसां संहरन्तु ॥ १७

वक्षोदक्षद्विषोऽलं स्मरभर-
विनमद्दक्षजाक्षीण वक्षो-
जान्तर्निक्षिप्तशुम्भन्मलय-
जमिलतोद्भासिभस्मोक्षितंयत् ।
क्षिप्रं तद्रूक्षचक्षुः श्रुतिगण-
फणरत्नौघभाभीक्ष्णशोभं

युष्माकं शश्वदेनः स्फटिक-
मणिशिलामण्डलाभं क्षिणोतु ॥ १८

मुक्तामुक्ते विचित्राकुलवलि-
लहरीजालशालिन्यवाञ्च-
न्नाभ्यावर्ते विलोलद्भुजगवर-
युते कालशत्रोर्विशाले ।
युष्मच्चित्रत्रिधामा प्रतिनव-
रुचिरे मन्दिरे कान्तिलक्ष्म्याः
शीतां शीतांशुगौरे चिरतर-
मुदरक्षीरसिन्धौ सलीलम् ॥

वैयाघ्री यत्र कृत्तिः स्फुरति
हिमगिरेर्विस्तृतोपत्यकान्तः
सान्द्रावश्यायमिश्रापरित-
इववृता नीलजीमूतमाला ।

आम्बद्धाहीन्द्रकाञ्चीगुणमति-
पुथुलं शैलजाक्रीडभूमि-
स्तद्वो निःश्रेयसे स्याज्जघनमति-
घनं बालशीतांशुमौलेः ॥ १०

पुष्टावष्टम्भभूतौ पृथुतरजघ-
नस्यापि नित्यं त्रिलोक्याः
सम्यग्वृत्तौ सुरेन्द्राद्विरद-
वरकरोदारकान्तिं दधानौ ।
सारावूरू पुरारेः प्रसभ-
मरिघटाघस्मरौ भस्मशुभ्रौ
भक्तैरत्यार्द्रचित्तैरधिकम-
वनतौ वाञ्छितं वो विधत्ताम् ॥ ११

आनन्दायेन्दुकान्तोपलरुचि-
रसमुद्गायिते ये मुनीनां
चित्तादर्शे निधातुं विदध-
ति चरणेताण्डवाकुञ्चनानि ।

काञ्ची भोगीन्द्रमूर्ध्ना प्रति-
मुहुरुपधानायमाने क्षणं ते
कान्तेस्तामन्तकारेर्द्युति-
विजितसुधाभानुनी जानुनी वः ॥ २२

मञ्जीरीभूतभोगिप्रवरगण-
फणामण्डलान्तर्निताम्त-
व्यादीर्घानर्घरत्नद्युतिकिस-
लयिते स्तूयमानेद्युसद्भिः ।
बिभ्रत्यौ विभ्रमं वः स्फटिक-
मणिबृहद्दण्डवद्भासिते ये
जङ्घे शङ्खेन्दुशुभ्रे भृशमिह
भवतां मानसे शूलपाणेः ॥ २३

अस्तोकस्तोमशस्तैरपचिति-
ममलांभूरिभावोपहारैः
कुर्वद्भिस्सर्वदोच्चैः सतत-
मभिवृतौ ब्रह्मविद्देवलाद्यैः ।

सम्यक्सम्पूज्यमानाविह
हृदिसरसीवानिशं युष्मदीये
शर्वस्य क्रीडतां वो प्रपदवर-
बृहत्कच्छपावच्छभासौ ॥ २४

याः स्वस्थैकांशपातादति-
बहुलगलद्रक्त वक्रं प्रणुन्न-
प्राणं प्राक्रोशयन् प्राङ्निज-
मचलवरं चालयन्तं दशास्यम् ।
पादाङ्गुल्यो दिशन्तु द्रुतमयु-
गदृशः कल्मषप्लोषकल्याः
कल्याणं फुल्लमाल्यप्रकर-
विलसिता वः प्रणद्धाहिवल्लयः ॥ २५

प्रह्वः प्राचीनबर्हिः प्रमुख-
सुरवरप्रस्फुरन्मौलिसक्त-
ज्यायोरत्नोत्करोल्लैरविरत-
ममला भूरिनीराजिताया ।

प्रोद्यद्भासा प्रदेयात्तरिव
रुचिरातारकाणां नितान्तं
नीलग्रीवस्य पादाम्बुरुह-
विलसितास्थानखालीसुखं वः ॥ २६
सत्याः सत्याननेन्दावपि
सविधगते ये विकासंदधाते
स्वान्ते स्वान्ते लभन्ते श्रिय-
मिहसरसीवामरायेदधानः ।
लोलं लोलम्बकानां कुलमि-
वसुधियां सेवते येसदास्तां
भूत्यै भूत्यैगपाणेर्विमल
तररुचस्तेपदाम्भोरुहे वः ॥ २७
येषां रागादिदोषाश्चतमिति
यतयो यान्ति मुक्तिं प्रसादा-
देवा नम्रात्ममूर्विर्द्युसदुषि-
परिषन्मूर्ध्निशेषायमाणाः ।

श्रीकण्ठस्यारुणोद्यच्चरणसर-
सिजप्रोत्थितास्ते भवाख्या-
त्पारावाराच्चिरं वो दुरित-
हतिकृतस्तारयेयुः परागाः ॥ २८

भूम्ना यस्यास्तसीम्ना भुवन-
मनुसृतं यत्परं धामधाम्नां
साम्नामाम्नायतत्त्वं यदपि च
परमं यद्गुणातीतमाद्यम् ।
यच्चांहोहन्निरीहं गहनमिति-
मुहुः प्राहुरुच्चैर्महान्तो
माहेशं तन्महो मे महित-
महरहर्मोहरोहं निहन्तु ॥ २९

इति श्रीमत्परमहंस परिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
॥ शिवकेशादिपादान्तवर्णनस्तोत्रं सम्पूर्णम् ॥

॥ शिवानन्दलहरी ॥



कलाभ्यां चूडालङ्कृतशशिकलाभ्यां निजतपः-
फलाभ्यां भक्तेषु प्रकटितफलाभ्यां भवतु मे ।
शिवाभ्यामस्तोकत्रिभुवन शिवाभ्यां हृदि पुन-
र्भवाभ्यामानन्दस्फुरदनुभवाभ्यां नतिरियम् ॥ १

गलन्ती शम्भो त्वच्चरितसरितः क्लिल्बषरजो
दलन्ती धीकुल्यासरणिषु पतन्ती विजयताम् ।
दिशन्ती संसारभ्रमणपरितापोपशमनं
वसन्ती मच्चेतोहृदभुवि शिवानन्दलहरी ॥ २

त्रयीवेद्यं हृद्यं त्रिपुरहरमाद्यं त्रिनयनं
जटाभारोदारं चलदुरगहारं मृगधरम् ।
महादेवं देवं मयि सदयभावं पशुपतिं
दालम्बं साम्बं शिवमतिविडम्बं हृदि भजे ॥ ३

हृदं वर्तन्ते जगति विबुधाः क्षुद्रफलदाः

न मध्ये स्वप्ने वा तदनुसरणं तत्कृतफलम् ।
हरिब्रह्मादीनामपि निकटभाजामसुलभं
चिरं याचे शम्भो शिव शिव तवाम्भोजभजनम् ॥
स्मृतौ शास्त्रे वैद्ये शकुनकवितागानफणितौ
पुराणे मन्त्रे वा स्तुतिनटनहास्येष्वचतुरः ।
कथं राज्ञां प्रीतिर्भवति मयि कोऽहं पशुपते
पशुं मां सर्वज्ञ प्रथितकृपया पालय विभो ॥ ५
घटो वा मृत्पिण्डोऽप्यणुरपि च धूमोऽग्निरचलः
पटो वा तन्तुर्वा परिहरति किं घोरशमनम् ।
वृथा कण्ठक्षोभं वहसि तरसा तर्कवचसा
पदाम्भोजं शम्भोर्भज परमसौख्यं व्रज सुधीः ॥ ६
मनस्ते पादाब्जे निवसतु वचः स्तोत्रफणितौ
करौ चाभ्यर्चायां श्रुतिरपि कथाकर्णनविधौ ।
तव ध्याने बुद्धिर्नयनयुगलं मूर्तिविभवे
परग्रन्थान्कैर्वा परमशिव जाने परमतः ॥ ७

यथा बुद्धिः शुक्तौ रजतमिति काचाश्मनि मणि-
र्जले पैष्टे क्षीरं भवति मृगतृष्णासु सलिलम् ।
तथादेवभ्रान्त्या भजति भवदन्यं जडजनो
महादेवेशं त्वां मनसि च न मत्वा पशुपते ॥ ८
गभीरे कासारे विशति विजने घोरविपिने
विशाले शैले च भ्रमति कुसुमार्थं जडमतिः ।
समर्प्यैकं चेतः सरसिजमुमानाथ भवते
सुखेनावस्थातुं जन इह न जानाति किमहो ॥ ९
नरत्वं देवत्वं नगवनमृगत्वं मशकता
पशुत्वं कीटत्वं भवतु विहगत्वादिजननम् ।
सदा त्वत्पादाब्जस्मरणपरमानन्दलहरी-
विहारासक्तं चेद्धृदयमिह किं तेन वपुषा ॥ १०
वटुर्वा गेही वा यतिरपि जटी वा तदितरो
नरो वा यः कश्चिद्भवतु भव किं तेन भवति ।
यदीयं हृत्पद्मं यदि भवदधीनं पशुपते
तदीयस्त्वं शम्भो भवसि भवभारं च वहसि ॥ ११

गुहायां गेहे वा बहिरपि वने वाऽद्रिशिखरे
जले वा वह्नौ वा वसतु वसतेः किं वद फलम् ।
सदा यस्यैवान्तःकरणमपि शम्भो तव पदे
स्थितं चेद्योगोऽसौ स च परमयोगी स च सुखी ॥
असारे संसारे निजभजनदूरे जडधिया
भ्रमन्तं मामन्धं परमकृतया पातुमुचितम् ।
मदन्यः को दीनस्तव कृपणरक्षातिनिपुण-
स्त्वदन्यः को वा मे त्रिजगति शरण्यः पशुपते ? ॥
प्रभुस्त्वं दीनानां खलु परमबन्धुः पशुपते
प्रमुख्योऽहं तेषामपि किमुत बन्धुत्वमनयोः ।
त्वयैव क्षन्तव्याः शिव मदपराधाश्च सकलाः
प्रयत्नात्कर्तव्यं मदवनमियं बन्धुसरणिः ॥ १४
उपेक्षा नो चेत्किं न हरसि भवज्ज्ञानविमुखां
दुराशाभूयिष्ठां विधिलिपिमशक्तो यदि भवान् ।
शिरस्तद्वैधात्रं न न खलु सुवृत्तं पशुपते
कथं वा निर्यत्नं करनखमुखेनैव लुलितम् ? ॥ १५

विरिञ्चिर्दीर्घायुर्भवतु भवता तत्परशिर-
श्चतुष्कं संरक्ष्यं स खलु भुवि दैन्यं लिखितवान् ।
विचारः को वा मां विशदकृपया पाति शिव ते
कटाक्षव्यापारः स्वयमपि च दीनावनपरः ॥ १६
फलाद्वा पुण्यानां मयि करुणया वा त्वयि विभो
प्रसन्नेऽपि स्वामिन् भवदमलपादाब्जयुगलम् ।
कथं पश्येयं मां स्थगयति नमः सम्भ्रमजुषां
निलिम्पानां श्रेणिर्निजकनकमाणिक्यमकुटैः ॥ १७
त्वमेको लोकानां परमफलदो दिव्यपदवीं
वहन्तस्त्वन्मूलां पुनरपि भजन्ते हरिमुखाः ।
कियद्वा दाक्षिण्यं तव शिव मदाशा च कियती
कदा वा मद्रक्षां वहसि करुणापूरितदृशा ? १८
दुराशाभूयिष्ठे दुरधिपगृहद्वारघटके
दुरन्ते संसारे दुरितनिलये दुःखजनके ।
मदायासं किं न व्यपनयसि कस्योपकृतये
वदेयं प्रीतिश्चेत्तव शिव कृतार्थाः खलु वयम् ॥ १९

सदा मोहाटव्यां चरति युवतीनां कुचगिरौ
नटत्याशाशाखाखटति झटिति स्वैरमभितः।
कपालिन् भिक्षो मे हृदयकपिमत्यन्तचपलं
दृढं भक्त्या बद्ध्वा शिव भवदधीनं कुरु विभो ॥ २०

धृतिस्तम्भाधारां दृढगुणनिबद्धां सगमनां
विचित्रां पद्माढ्यां प्रतिदिवससन्मार्गघटिताम्।
स्मरारे मच्चेतः स्फुटपटकुटीं प्राप्य विशदां
जय स्वामिन् शक्त्या सह शिव गणैः सेवित विभो॥

प्रलोभाद्यैरर्थाहरणपरतन्त्रो धनिगृहे
प्रवेशोद्युक्तः सन्भ्रमति बहुधा तस्करपते।
इमं चेतश्चोरं कथमिह सहे शङ्कर विभो
नवाधीनं कृत्वा मयि निरपराधे कुरु कृपाम् ॥ २२

करोमि त्वत्पूजां सपदि सुखदो मे भव विभो
विधित्वं विष्णुत्वं दिशसि खलु तस्याः फलमिति।
पुनश्च त्वां द्रष्टुं दिवि भुवि वहन्पक्षिमृगता-
मदह्वा तत्खेदं कथमिह सहे शङ्कर विभो ॥ २३

कदा वा कैलासे कनकमणिसौधे सह गणै-
र्वसञ्छम्भोरग्रे स्फुटघटितमूर्धाञ्जलिपुटः ।
विभो साम्ब स्वामिन्परमशिव पाहीति निगद-
न्विधातॄणां कल्पान्क्षणमिव विनेष्यामि सुखतः ॥
स्तवैर्ब्रह्मादीनां जयजयवचोभिर्नियमनां
गणानां केलीभिर्मदकलमहोक्षस्य ककुदि ।
स्थितं नीलग्रीवं त्रिनयनमुमाश्लिष्टवपुषं
कदा त्वां पश्येयं करधृतमृगं खण्डपरशुम् ? ॥ २५
कदा वा त्वां दृष्ट्वा गिरिश तव भव्याङ्घ्रियुगलं
गृहीत्वा हस्ताभ्यां शिरसि नयने वक्षसि वहन् ।
समाश्लिष्याघ्राय स्फुटजलजगन्धान्परिमला-
नलाभ्यां ब्रह्माद्यैर्मुदमनुभविष्यामि हृदये ? ॥ २६
करस्थे हेमाद्रौ गिरिश निकटस्थे धनपतौ
गृहस्थे स्वर्भूजामरसुरभिचिन्तामणिगणे ।
शिरःस्थे शीतांशौ चरणयुगलस्थेऽखिलशुभे
कमर्थं दास्येऽहं भवतु भवदर्थं मम मनः ? ॥

सारूप्यं तव पूजने शिव महादेवेति सङ्कीर्तने
सामीप्यं शिवभक्तिधुर्यजनतासान्निध्यसम्भाषणे ।
सालोक्यं च चराचरात्मकतनुध्याने भवानीपते
सायुज्यं मम सिद्धमत्र भवति स्वामिन्कृतार्थोऽस्म्य-
हम् ॥ २८

त्वत्पादाम्बुजमर्चयामि परमं त्वां चिन्तयाम्यन्वहं
त्वामीशं शरणं व्रजामि वचसा त्वामेव याचे विभो ।
वीक्षां मे दिश चाक्षुषीं सकरुणां दिव्यैश्चिरं प्रार्थितां
शम्भो लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥

वस्त्रोद्धूतविधौ सहस्रकरता पुष्पार्चने विष्णु ।
गन्धे गन्धवहात्मताऽन्नपचने बर्हिर्मुखाध्यक्षता ।
पात्रे काञ्चनगर्भताऽस्ति मयि चेद्बालेन्दुचूडामणे
शुश्रूषां करवाणि ते पशुपते स्वामिंस्त्रिलोकीगुरो ॥

नालं वा परमोपकारकमिदं त्वेकं पशूनां पते
पश्यन्कुक्षिगतांश्चराचरगणान्बाह्यस्थितान्रक्षितुम् ।

सर्वामर्त्यपलायनौषधमतिज्वालाकरं भीकरं
निक्षिप्तं गरलं गलेन गिलितं नोद्गीर्णमेव त्वया ॥
ज्वालोग्रः सकलामरातिभयदः क्ष्वेलः कथं वा त्वया
दुष्टः किं च करे धृतः करतले किं पक्वजम्बूफलम् ।
जिह्वायां निहितश्च सिद्धगुटिका वा कण्ठदेशे भृतः
किं ते नीलमणिर्विभूषणमयं शम्भो महात्मन्वद ॥
नालं वा सकृदेव देव भवतः सेवा नतिर्वा नुतिः
पूजा वा स्मरणं कथाश्रवणमप्यालोकनं मादृशाम् ।
स्वामिन्नस्थिरदेवतानुसरणायासेन किं लभ्यते
का वा मुक्तिरितः कुतो भवति चेत्किं प्रार्थनीयं तदा ॥
किं ब्रूमस्तव साहसं पशुपते कस्यास्ति शम्भो भव-
द्धैर्यं चेदृशमात्मनः स्थितिरियं चान्यैः कथं लभ्यते ।
भ्रश्यद्देवगणं त्रसन्मुनिगणं नश्यत्प्रपञ्चं लयं
पश्यन्निर्भय एक एव विहरत्यानन्दसान्द्रो भवान् ॥
योगक्षेमधुरन्धरस्य सकलश्रेयःप्रदोद्योगिनो
दृष्टादृष्टमतोपदेशकृतिनो बाह्यान्तरव्यापिनः ।

सर्वज्ञस्य दयाकरस्य भवतः किं वेदितव्यं मया
शम्भो त्वं परमान्तरङ्ग इति मे चित्तेस्मराम्यन्वहम्॥
भक्तो भक्तिगुणावृते मुदमृतापूर्णे प्रसन्ने मनः
कुम्भे साम्ब तवाङ्घ्रिपल्लवयुगं संस्थाप्य संवित्फलम्।
सत्त्वं मन्त्रमुदीरयन्निजशरीरागारशुद्धिं वह-
न्पुण्याहं प्रकटीकरोमि रुचिरं कल्याणमापादयन्॥
आम्नायाम्बुधिमादरेण सुमनःसङ्घाः समुद्यन्मनो-
मन्थानं दृढभक्तिरज्जुसहितं कृत्वा मथित्वा ततः।
सोमं कल्पतरुं सुपर्वसुरभिं चिन्तामणिं धीमतां
नित्यानन्दसुधां निरन्तररमासौभाग्यमातन्वते॥ ३७
प्राक्पुण्याचलमार्गदर्शितसुधामूर्तिः प्रसन्नःशिवः
सोमः सद्गणसेवितो मृगधरः पूर्णस्तमोमोचकः।
चेतः पुष्करलक्षितो भवति चेदानन्दपाथोनिधिः
प्राकल्भ्येन विजृम्भते सुमनसां वृत्तिस्तदा जायते॥
धर्मो मे चतुरङ्घ्रिकः सुचरितः पापं विनाशं गतं
कामक्रोधमदादयो विगलिताः कालाः सुखाविष्कृताः॥

ज्ञानानन्दमहौषधिः सुफलिता कैवल्यनाथे सदा
मान्ये मानसपुण्डरीकनगरे राजावतंसे स्थिते ॥ ३९
धीयन्त्रेण वचोघटेन कविताकुल्योपकुल्याक्रमै
रानीतश्च सदाशिवस्य चरिताम्भोराशिदिव्यामृतैः ।
हृत्केदारयुताश्च भक्तिकलमाः साफल्यमातन्वते
दुर्भिक्षान्मम सेवकस्य भगवन्विश्वेश भीतिः कुतः ॥
पापोत्पातविमोचनाय रुचिरैश्वर्याय मृत्युञ्जय-
स्तोत्रध्याननतिप्रदक्षिणसपर्यालोकनाकर्णने ।
जिह्वाचित्तशिरोङ्घ्रिहस्तनयनश्रोत्रैरहं प्रार्थितो
मामाज्ञापय तन्निरूपय मुहुर्मामेव मा मेऽवचः ॥
गाम्भीर्यं परिखापदं घनधृतिः प्राकार उद्यद्गुण-
स्तोमश्चाप्तबलं घनेन्द्रियचयो द्वाराणि देहे स्थितः ।
विद्या वस्तुसमृद्धिरित्यखिलसामग्रीसमेते सदा
दुर्गातिप्रियदेव मामकमनोदुर्गे निवासं कुरु ॥ ४२
मा गच्छ त्वमितस्ततो गिरिश भो मय्येव वासं कुरु
स्वामिन्नादिकिरात मामकमनःकान्तारसीमान्तरे ।

वर्तन्ते बहुशो मृगा मदजुषो मात्सर्यमोहादय-
स्तान्हत्वा मृगयाविनोदरुचितालाभं च सम्प्राप्स्यसि॥
करलग्नमृगः करीन्द्रभङ्गो
घनशार्दूलविखण्डनोत्त जन्तुः।
गिरिशो विशदाकृतिश्च चेतः-
कुहरे पञ्चमुखोऽन्तिमे कुतो भीः ॥ ४४
छन्दःशाखिशिखान्वितैर्द्विजवरैः संसेविते शाश्वते
सौख्यापादिनि खेदभेदिनि सुधासारैः फलैर्दीपिते।
चेतःपक्षिशिखामणे त्यज वृथासञ्चारमन्यैरलं
नित्यं शङ्करपादपद्मयुगलीनीडे विहारं कुरु ॥ ४५
आकीर्णे नखराजिकान्तिविभवैरुद्यत्सुधावैभवै-
राधौतेऽपि च पद्मरागललिते हंसव्रजैराश्रिते।
नित्यं भक्तिवधूगणैश्च रहसि स्वेच्छाविहारं कुरु
स्थित्वा मानसराजहंस गिरिजानाथाङ्घ्रिसौधान्तरे ॥
शम्भुध्यानवसन्तसङ्गिनि हृदारामेऽघजीर्णच्छदाः
स्रस्ता भक्तिलताच्छटाविलसिताः पुण्यप्रवालश्रिताः।

दीप्यन्ते गुणकोरका जपवचःपुष्पाणि सद्वासना
ज्ञानानन्दसुधामरन्दलहरी संवित्फलाभ्युन्नतिः ॥४७
नित्यानन्दरसालयं सुरमुनिस्वान्ताम्बुजाताश्रयं
स्वच्छं सद्द्विजसेवितं कलुषहृत्सद्वासनाविष्कृतम् ।
शम्भुध्यानसरोवरं व्रज मनोहंसावतंस स्थिरं
किं क्षुद्राश्रयपल्वलभ्रमणसञ्जातश्रमं प्राप्स्यसि ॥४८
आनन्दामृतपूरिता हरपदाम्भोजालवालोद्यता
स्थैर्योपन्नमुपेत्य भक्तिलतिका शाखोपशाखान्विता ।
उच्चैर्मानसकायमानपटलीमाक्रम्य निष्कल्मषा
नित्याभीष्टफलप्रदा भवतु मे सत्कर्मसंवर्धिता ॥ ४९
सन्ध्यारम्भविजृम्भितं श्रुतिशिरःस्थानान्तराधिष्ठितं
सप्रेमभ्रमराभिराममसकृत्सद्वासनाशोभितम् ।
भोगीन्द्राभरणं समस्तसुमनः पूज्यं गुणाविष्कृतं
सेवे श्रीगिरिमल्लिकार्जुनमहालिङ्गं शिवालिङ्गितम् ॥
भृङ्गीच्छानटनोत्कटः करिमदग्राही स्फुरन्माधवा-
ह्लादो नादयुतो महाद्भुतवपुः पञ्चेषुणा चाहृतः ।

सत्पक्षः सुमनोवनेषु स पुनः साळान्मदीये मनो-
राजीवे भ्रमराधिपो विहरतां श्रीशैलवासी विभुः ॥
कारुण्यामृतवर्षिणं घनविपद्ग्रीष्मच्छिदाकर्मठं
विद्यासस्यफलोदयाय सुमनःसंसेव्यमिच्छाकृतिम् ।
नृत्यद्भक्तमयूरमद्रिनिलयं चञ्चज्जटामण्डलं
शम्भो वाञ्छति नीलकन्धर सदा त्वां मे मनश्चातकः॥
आकाशेन शिखी समस्तफणिनां नेत्रा कलापी नता-
नुग्राहिप्रणवोपदेशनिनदैः केकीति यो गीयते ।
श्यामां शैलसमुद्भवां घनरुचिं दृष्ट्वा नटन्तं मुदा
वेदान्तोपवने विहाररसिके तं नीलकण्ठं भजे ॥ ५३
सन्ध्याघर्मदिनात्ययो हरिकराघातप्रभूतानक-
ध्वानो वारिदगर्जितं दिविषदां दृष्टिश्छटा चञ्चला ।
भक्तानां परितोषबाष्पविततिर्वृष्टिर्मयूरी शिवा
यस्मिन्नुज्ज्वलताण्डवं विजयते तं नीलमण्ठं भजे ॥
आद्यायामिततेजसे श्रुतिपदैर्वेद्याय साध्याय ते
विद्यानन्दमयात्मने त्रिजगतः संरक्षणोद्योगिने ।

ध्येयायाखिलयोगिभिः सुरगणैर्गेयाय मायाविने
सम्यक्ताण्डवसम्भ्रमाय जटिने सेयं नतिः शम्भवे ॥
नित्याय त्रिगुणात्मने पुरजिते कात्यायनीश्रेयसे
सत्यादिकुटुम्बिने मुनिमनःप्रत्यक्षचिन्मूर्तये ।
मायासृष्टजगत्त्रयाय सकलाम्नायान्तसञ्चारिणे
सायंताण्डवसम्भ्रमाय जटिने सेयं न शम्भवे ॥५६
नित्यं स्वोदरपूरणाय सकलानुद्दिश्य वित्ताशया
व्यर्थं पर्यटनं करोमि भवतः सेवां न जाने विभो ।
मज्जन्मान्तरपुण्यपाकबलतस्त्वं शर्व सर्वान्तर-
स्तिष्ठस्येव हि तेन वा पशुपते ते रक्षणीयोऽस्म्यहम् ॥
एको वारिजबान्धवः क्षितिनभोव्याप्तं तमोमण्डलं
भित्त्वा लोचनगोचरोऽपि भवति त्वं कोटिसूर्यप्रभः ।
वेद्यः किं न भवस्यहो घनतरं कीदृग्भवेन्मत्तम-
स्तत्सर्वं व्यपनीय मे पशुपते साक्षात्प्रसन्नो भव ॥
हंसः पद्मवनं समिच्छति यदा नीलाम्बुदं चातकः
कोकः कोकनदप्रियं प्रतिदिनं चन्द्रं चकोरस्तथा ।

चेतो वाञ्छति मामकं पशुपते चिन्मार्गमृग्यं विभो
गौरीनाथ भवत्पदाब्जयुगलं कैवल्यसौख्यप्रदम् ॥
रोधस्तोयहृतः श्रमेण पथिकश्छायां तरोर्वृष्टितो
भीतः स्वस्थगृहं गृहस्थमतिथिर्दीनः प्रभुं धार्मिकम् ।
दीपं सन्तमसाकुलश्च शिखिनं शीतावृतस्त्वं तथा
चेतः सर्वभयापहं व्रज सुखं शम्भोः पदाम्भोरुहम् ॥
अक्कोलं निजबीजसन्ततिरयस्कान्तोपलं सूचिका
साध्वी नैजविभुं लता क्षितिरुहं सिन्धुः सरिद्वल्लभम् ।
प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं
चेतोवृत्तिरुपेत्य तिष्ठति सदा सा भक्तिरित्युच्यते ॥
आनन्दाश्रुभिरातनोति पुलकं नैर्मल्यतश्छादनं
वाचाशङ्खमुखे स्थितेश्च जठरापूर्तिं चरित्रामृतैः ।
रुद्राक्षैर्भसितेन देव वपुषो रक्षां भवद्भावना
पर्यङ्के विनिवेश्य भक्तिजननी भक्तार्भकं रक्षति ॥
मार्गावर्तितपादुका पशुपतेरङ्गस्य कूर्वायते
गण्डूषाम्बुनिषेचनं पुररिपोर्दिव्याभिषेकायते ।

किंचिद्भक्षितमांसशेषकबलं नव्योपहारायते
भक्तिः किं न करोत्यहो वनचरो भक्तावतंसायते ॥
वक्षस्ताडनमन्तकस्य कठिनापस्मारसम्मर्दनं
भूभृत्पर्यटनं नमत्सुरशिरःकोटीरसङ्घर्षणम् ।
कर्मेदं मृदुलस्य तावकपदद्वन्द्वस्य किं वोचितं
मच्चेतोमणिपादुकाविहरणं शम्भो सदाङ्गी कुरु ॥
वक्षस्ताडनशङ्कया विचलितो वैवस्वतो निर्जराः
कोटीरोज्ज्वलरत्नदीपकलिकानीराजनं कुर्वते ।
दृष्ट्वा मुक्तिवधूस्तनोति निभृताश्लेषं भवानीपते
यच्चेतस्तव पादपद्मभजनं तस्येह किं दुर्लभम् ॥ ६५
क्रीडार्थं सृजति प्रपञ्चमखिलं क्रीडामृगास्ते जनाः
मत्कर्माचरितं मया च भवतः प्रीत्यै भवत्येव तत् ।
शम्भो स्वस्य कुतूहलस्य करणं मच्चेष्टितं निश्चितं
तस्मान्मामकरक्षणं पशुपते कर्तव्यमेव त्वया ॥ ६६

बहुविधपरितोषबाष्पपूरस्फुट-
पुलकाङ्कितचारुभोगभूमिम् ।

चिरपदफलकाङ्क्षिसेव्यमानां
परमसदाशिवभावनां प्रपद्ये ॥ ६७
अमितमुदमृतं मुहुर्दुहन्तीं
विमलभवत्पदगोष्ठमावसन्तीम् ।
सदय पशुपते सुपुण्यपाकां
मम परिपालय भक्तिधेनुमेकाम् ॥ ६८
जडता पशुता कलङ्किता कुटि-
लचरत्वं च नास्ति मयि देव ।
अस्ति यदि राजमौले भवदा-
भरणस्य नास्मि किं पात्रम् ? ६९
अरहसि रहसि स्वतन्त्रबुद्ध्या
वरिवसितुं सुलभः प्रसन्नमूर्तिः ।
अगणितफलदायकः प्रभुर्मे
जगदधिको हृदि राजशेखरोऽस्ति ॥ ७०
आरूढभक्तिगुणकुञ्चितभावचाप-
युक्तैः शिवस्मरणबाणगणैरमोघैः ।

निर्जित्य किल्बिषरिपून्विजयी सुधीन्द्रः
सानन्दमावहति सुस्थिरराजलक्ष्मीम् ॥ ७१
ध्यानाञ्जनेन समवेक्ष्य तमःप्रदेशं
भित्त्वा महाबलिभिरीश्वरनाममन्त्रैः ।
दिव्याश्रितं भुजगभूषणमुद्वहन्ति
ये पादपद्ममिह ते शिव ते कृतार्थाः ॥ ७२
भूदारतामुदवहद्यदपेक्षया श्री-
भूदार एव किमतः सुमते लभस्व ।
केदारमाकलितशुक्तिमहौषधीनां
पादारविन्दभजनं परमेश्वरस्य ॥ ७३
आशापाशक्लेशदुर्वासनादि-
भेदोद्युक्तैर्दिव्यगन्धैरमन्दैः ।
आशाशाटीकस्य पादारविन्दं
चेतःपेटीं वासितां मे तनोतु ॥ ७४
कल्याणिनं सरसचित्रगतिं सवेगं
सर्वेङ्गितज्ञमनघं ध्रुवलक्षणाढ्यम् ।

चेतस्तुरङ्गमधिरुह्य चर स्मरारे
नेतः समस्तजगतां वृषभाधिरूढ ॥ ७

भक्तिर्महेशपदपुष्करमावसन्ती
कादम्बिनीव कुरुते परितोषवर्षम् ।
सम्पूरितो भवति यस्य मनस्तटाक-
स्तज्जन्मसस्यमखिलं सफलं च नान्यत् ॥ ७

बुद्धिः स्थिरा भवितुमीश्वरनादपद्म-
सक्ता वधूर्विरहणीव सदा स्मरन्ती ।
सद्भावनास्मरणदर्शनकीर्तनादि-
सम्मोहितेव शिवमन्त्रजपेन विन्ते ॥ ७

सदुपचारविधिष्वनुबोधितां
सविनयां सुहृदं समुपाश्रिताम् ।
मम समुद्धर बुद्धिमिमां प्रभो
वरगुणेन नवोढवधूमिव ॥ ७

नित्यं योगिमनः सरोजदलसञ्चारक्षमस्त्वत्क्रमः
शम्भो तेन कथं कठोरयमराड्वृक्षः कवाटक्षतिः ।

अत्यन्तं मृदुलं त्वदङ्घ्रियुगलं हा मे मनश्चिन्तय-
त्येतल्लोचनगोचरं कुरु विभो हस्तेन संवाहये ॥ ७९
एष त्वेष जनिं मनोऽस्य कठिनं तस्मिन्नटानीति म-
द्वक्षायै गिरिसीम्नि कोमलपदन्यासः पुराभ्यासितः।
नो चेद्दिव्यगृहान्तरेषु सुमनस्तल्पेषु वेद्यादिषु
प्रायः सत्सु शिलातलेषु नटनं शम्भो किमर्थं तव ?॥
कश्चित्कालमुमामहेश भवतः पादारविन्दार्चनैः
कश्चिज्ज्ञानसमाधिभिश्च नतिभिः कश्चित्कथाकर्णनैः।
कश्चित्कश्चिदवेक्षणैश्च नुतिभिः कश्चिद्दशामीदृशीं
यः प्राप्नोति मुदा त्वदर्पितमनाः जीवन्समुक्तःखलु ॥
बाणत्वं वृषभत्वमर्धवपुषा भार्यात्वमार्यापते
घोणित्वं सखिता मृदङ्गवहता चेत्यादि रूपं दधौ।
त्वत्पादे नयनार्पणं च कृतवांस्त्वद्देहभागो हरिः
पूज्यात्पूज्यतरः स एव हि न चेत्को वा तदन्यो-
ऽधिकः ॥ ८२
जननमृतियुतानां सेवया देवतानां

न भवति सुखलेशः संशयो नास्ति तत्र ।
अजनिममृतरूपं साम्बमीशं भजन्ते
य इह परमसौख्यं ते हि धन्या लभन्ते ॥ ८३
शिव तव परिचर्यासन्निधानाय गौर्या
भव मम गुणधुर्यां बुद्धिकन्यां प्रदास्ये ।
सकलभुवनबन्धो सच्चिदानन्दसिन्धो
सदय हृदयगेहे सर्वदा संवस त्वम् ॥ ८४
जलधिमथनदक्षो नैव पातालभेदी
न च वनमृगयायां नैव लुब्धः प्रवीणः ।
अशनकुसुमभूषावस्त्रमुख्यां सपर्यां
कथय कथमहं ते कल्पयामीन्दुमौले ? ॥ ८५
पूजाद्रव्यसमृद्धयो विरचिताः पूजां कथं कुर्महे
पक्षित्वं न च वा कितित्वमपि न प्राप्तं मया दुर्लभम् ।
जाने मस्तकमाङ्घ्रिपल्लवमुमाजाने न तेऽहं विभो
न ज्ञातं हि पितामहेन हरिणा तत्त्वेन तद्रूपिणा ॥

अशनं गरलं फणी कलापो
वसनं चर्म च वाहनं महोक्षः ।
मम दास्यसि किं किमस्ति शम्भो
तव पादाम्बुजभक्तिमेव देहि ॥ ८७

यदा कृताम्भोनिधिसेतुबन्धनः
करस्थलाधः कृतपर्वताधिपः ।
भवानि ते लङ्घितपद्मसम्भव-
स्तदा शिवार्चास्तवभावनाक्षमः ॥ ८८

नतिभिर्नुतिभिस्त्वमीश पूजा-
विधिभिर्ध्यानसमाधिभिर्न तुष्टः ।
धनुषा मुसलेन चाश्मभिर्वा
वद ते प्रीतिकरं तथा करोषि ॥ ८९

वचसा चरितं वदामि शम्भो-
रहमुद्योगविधासु तेऽप्रसक्तः ।
मनसाऽऽकृतिमीश्वरस्य सेवे
शिरसा चैव सदाशिवं नमामि ॥ ९०

आद्याविद्या हृद्गता निर्गतासी-
द्विद्या हृद्या हृद्गता त्वत्प्रसादात् ।
सेवे नित्यं श्रीकरं त्वत्पदाब्जं
भावे मुक्तेर्भाजनं राजमौले ॥ ९१

दूरीकृतानि दुरितानि दुरक्षराणि
दौर्भाग्यदुःखदुरहङ्कृतिदुर्वचांसि ।
सारं त्वदीयचरितं नितरां पिबन्तं
गौरीश मामिह समुद्धर सत्कटाक्षैः ॥ ९२

सोमकलाधरमौलौ
कोमलघनकन्धरे महामहसि
स्वामिनि गिरिजानाथे
मामकहृदयं निरन्तरं रमताम् ॥ ९३

सा रसना ते नयने तावेव करौ स एव कृतकृत्यः
या ये यौ योभर्गं वदतीक्षेते सदार्चतः स्मरति ॥
अतिमृदुलौ मम चरणा-
वतिकठिनं ते मनो भवानीश ।

इति विचिकित्सां सन्त्यज
शिवकथमासीद्विरौ तथा वेदम ॥ ९५
धैर्याङ्कुशेन निभृतं रभसादाकृष्य भक्तिशृङ्खलया ।
पुरहर चरणालाने हृदयमदेभं बधान चिद्यन्त्रैः ॥
प्रचरत्यभितः प्रगल्भवृत्त्या
मदवानेष मनः करी गरीयान् ।
परिगृह्य नयेन भक्तिरज्ज्वा
परमं स्थाणुपदं दृढं नयामुम् ॥ ९७
सर्वालङ्कारयुक्तां सरल-
पदयुतां साधुवृत्तां सुवर्णां
सद्भिः संस्तूयमानां सरस-
गुणयुतां लक्षितां लक्षणाढ्याम् ।
उद्यद्भूषाविशेषामुपगतविनयां द्योतमानार्थरेखां
कल्याणीं देव गौरीप्रिय कविताकन्यकां त्वं गृहाण ॥
इदं ते युक्तं वा परमशिव कारुण्यजलधे
गतौ तिर्यग्रूपं तव पदशिरोदर्शनधिया ।

हरिब्रह्माणौ तौ दिवि भुवि चरन्तौ श्रमयुतौ
कथं शम्भो स्वामिन्कथय मम वेद्योऽसि पुरतः ॥
स्तोत्रेणालमहं प्रवक्मि न मृषा देवा विरिञ्चादयः
स्तुत्यानां गणनाप्रसङ्गसमये त्वामग्रगण्यं विदुः ।
माहात्म्याप्रविचारणप्रकरणे धानातुषस्तोमव-
द्भूतास्त्वां विदुरुत्तमोत्तमफलं शम्भो भवत्सेवकाः ॥

॥ इति श्रीशङ्करभगवत्पादकृतिषु शिवानन्दलहरी सम्पूर्णा ॥

॥ अर्धनारीश्वरस्तोत्रम् ॥

चाम्पेयगौरार्धशरीरकायै
कर्पूरगौरार्धशरीरकाय ।
धम्मिल्लकायैच जटाधराय
नमः शिवायै च नमः शिवाय ॥ १

कस्तूरिकाकुङ्कुमचर्चितायै
चितारजःपुञ्जविचर्चिताय ।
कृतस्मरायै विकृतस्मराय नमः ... ॥ २

झणत्क्वणत्कङ्कणनूपुरायै
पादाब्जराजत्फणिनूपुराय ।
हेमाङ्गदायै भुजगाङ्गदाय नमः ... ॥ ३

विशालनीलोत्पललोचनायै
विकासिपङ्केरुहलोचनाय ।
समेक्षणायै विषमेक्षणाय नमः ... ॥ ४

मन्दारमालाकलितालकायै
कपालमालाङ्कितकन्धराय ।
दिव्याम्बरायै च दिगम्बराय नमः ... ॥ ५

अम्भोधरश्यामलकुन्तलायै
तटित्प्रभाताम्रजटाधराय ।
निरीश्वरायै निखिलेश्वराय नमः ... ॥ ६

प्रपञ्चसृष्टुन्मुखलास्यकायै
समस्तसंहारकताण्डवाय ।
जगज्जनन्यै जगदेकपित्रे नमः ... ॥ ७

प्रदीप्तरत्नोज्ज्वलकुण्डलायै
स्फुरन्महापन्नगभूषणाय ।
शिवान्वितायै च शिवान्विताय नमः ... ॥ ८

एतत्पठेदष्टकमिष्टदं यो
भक्त्या स मान्यो भुवि दीर्घजीवी ।
प्राप्नोति सौभाग्यमनन्तकालं
भूयात्सदा तस्य समस्तसिद्धिः ॥ ९

॥ इति श्रीमच्छङ्कराचार्यविरचितं अर्धनारीश्वरस्तोत्रं सम्पूर्णम् ॥

॥ शिवनामावल्यष्टकम् ॥

हे चन्द्रचूड मदनान्तक शूलपाणे
स्थाणो गिरीश गिरिजेश महेशशम्भो ।
भूतेशभीतभयसूदनमामनाथं
संसारदुःखगहनाज्जगदीश रक्ष ॥ १

हे पार्वतीहृदयवल्लभ चन्द्रमौले
भूताधिप प्रमथनाथ गिरीश चाप ।
हे वामदेव भव रुद्र पिनाकपाणे संसार...॥ २

हे नीलकण्ठ वृषभध्वज पञ्चवक्त्र
लोकेश शेषवलय प्रमथेश शर्व ।
हे धूर्जटे पशुपते गिरिजापते मां संसार...॥ ३

हे विश्वनाथ शिवशङ्कर देवदेव
गङ्गाधर प्रमथनायक नन्दिकेश ।
बाणेश्वरान्धकरिपो हर लोकनाथ संसार...॥ ४

वाराणसीपुरपते मणिकर्णिकेश
वीरेश दक्षमखकाल विभो गणेश ।
सर्वज्ञ सर्वहृदयैकनिवास संसार ... ॥ ५

श्रीमन्महेश्वर कृपामय हे दयालो
हे व्योमकेश शितिकण्ठ गणाधिनाथ ।
भस्माङ्गराग नृकपालकलापमाल संसार ... ॥
कैलासशैलविनिवास वृषाकपे हे
मृत्युञ्जय त्रिनयन त्रिजगन्निवास ।
नारायणप्रियमदापह शक्तिनाथ संसार ... ॥७
विश्वेश विश्वभवनाशक विश्वरूप
विश्वात्मक त्रिभुवनैकगुणाधिकेश ।
हे विश्वनाथ करुणामय दीनबन्धो संसार ... ॥
गौरीविलासभवनाय महेश्वराय
पञ्चाननाय शरणागतकल्पकाय ।
शर्वाय सर्वजगतामधिपाय तस्मै
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ९

इति श्रीमत्परमहंस परिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
॥ शिवनामावल्यष्टकं सम्पूर्णम् ॥

॥ दशश्लोकी ॥

न भूमिर्न तोयं न तेजो न वायु-
र्न खं नेन्द्रियं वा न तेषां समूहः ।
अनैकान्तिकत्वात्सुषुप्त्येकसिद्ध-
स्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ १

न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणा ध्यानयोगादयोऽपि ।
अनात्माश्रयोऽहं ममाध्यासहाना-
त्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ २

न माता पिता वा न देवा न लोका
न वेदा न यज्ञा न तीर्थं ब्रुवन्ति ।
सुषुप्तौ निरस्तातिशून्यात्मकत्वा-
त्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ३

न साङ्ख्यं न शैवं न तत्पाञ्चरात्रं
न जैनं न मीमांसकादेर्मतं वा ।

विशिष्टानुभूत्या विशुद्धात्मकत्वा-
त्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ४
न चोर्ध्वं न चाधो न चान्तर्न बाह्यं
न मध्यं न तिर्यङ् न पूर्वापरा दिक् ।
वियद्व्यापकत्वादखण्डैकरूप-
त्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ५
न शुक्लं न कृष्णं न रक्तं न पीतं
न कुब्जं न पीनं न ह्रस्वं न दीर्घम् ।
अरूपं तथा ज्योतिराकारकत्वा-
त्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ६
न शास्ता न शास्त्रं न शिष्यो न शिक्षा
न च त्वं न चाहं नचायं प्रपञ्चः ।
स्वरूपावबोधो विकल्पासहिष्णु-
त्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ७
न जाग्रन्न मे स्वप्नको वा सुषुप्ति-
र्न विश्वो न वा तैजसः प्राज्ञको वा ।

अविद्यात्मकत्वात्त्रयाणां तुरीय-
स्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ८

अपि व्यापकत्वाद्धि तत्त्वप्रयोगा-
त्स्वतस्सिद्धभावादनन्याश्रयत्वात् ।
जगत्तुच्छमेतत्समस्तं तदुत्था-
त्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ९

न चैकं तदन्यद्द्वितीयं उत स्या-
न्न वा केवलत्वं न चाकेवलत्वम् ।
न शून्यं न चाशून्यमद्वैतकत्वात्-
कथं सर्ववेदान्तसिद्धिं ब्रवीमि ॥ १०

दशश्लोकवर्यां इमे सम्यगुक्ता
अहो शङ्कराचार्यवक्त्रारविन्दात् ।
अजस्रं पठन्तीह सन्तोषबुद्ध्या
प्रयान्त्येव ते सच्चिदानन्दरूपम् ॥ ११

॥ इति श्रीमच्छङ्कराचार्यविरचिता दशश्लोकी सम्पूर्णा ॥

॥ दशश्लोकीस्तुतिः ॥

साम्बो नः कुलदैवतं पशुपते साम्ब त्वदीया वयं
साम्बं स्तौमि सुरासुरोरगगणास्साम्बेन सन्तारिताः ।
साम्बायास्तु नमो मया विरचितं साम्बात्परं नो भजे
साम्बस्यानुचरोऽस्म्यहं मम रतिस्साम्बे परब्रह्मणि ॥
विष्ण्वाद्याश्च पुरत्रयं सुरगणा जेतुं न शक्तास्स्वयं
यं शम्भुं भगवन्वयं तु पशवोऽस्माकं त्वमेवेश्वरः ।
~~तत्तत्स्थाननियोजितास्सुमनसस्त्वत्था बभूवुस्तत-~~
स्तस्मिन्मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ २
क्षोणी यस्य रथो रथाङ्गयुगळं चन्द्रार्कबिम्बद्वयं
कोदण्डः कनकाचलो हरिरभूद्बाणो विधिस्सारथिः ।
तूणीरो जलधिर्हयाश्श्रुतिचयो
मौर्वी भुजङ्गाधिपस्तस्मिन्मे... ॥ ३
येनापादितमङ्गजाङ्गभसितं दिव्याङ्गरागैस्समं
येन स्वीकृतमङ्गजस्य शिरस्सौवर्णपात्रैस्समं ।

येनाङ्गीकृतमच्युतस्य नयनं पूजारविंदस्समं
तस्मिन्मे ... ॥

गोविन्दादधिकं न दैवतमिति प्रोच्चार्य हस्तावुभा-
वुद्धृत्याथ शिवस्य सन्निधिगतो व्यासो मुनीनां पुरः।
यस्य स्तम्भितपाणिरानविकृता
नन्दीश्वरेणाभवत्तस्मिन्मे ... ॥ ५

आकाशश्च कुठायते दश दिशाभोगो दुकूलायते
शीतांशुः प्रसवायते स्थिरतरानन्दः स्वरूपायते।
वेदान्तो निलयायते सुविनयो
यस्य स्वभावायते तस्मिन्मे ... ॥ ६

विष्णुर्यस्य सहस्रनामनियमादम्भोरुहाण्यर्चय-
न्नेकोनोपचितेषु नेत्रकमलं नैजं पदाऽजद्वयम्।
सम्पूज्यासुरसंहतिं विदलयं-
स्त्रैलोक्यपालोऽभवत्तस्मिन्मे ... ॥ ७

शौरिं सत्यगिरं वराहवपुषं पादाम्बुजादर्शने
चक्रे यो दयया समस्तजगतां नाथं शिरोदर्शने।

मिथ्यावाचमपूज्यमेव सततं
हंसस्वरूपं विधिं तस्मिन्मे ... ॥ ८

यस्यासन्धरणीजलाग्निपवनव्योमार्कचन्द्रादयो
विख्यातास्तनवोऽष्टधा परिणता नान्यत्ततो वर्तते ।
ओंकारार्थविवेकिनी श्रुतिरियं
चाचष्ट तुर्यं शिवं तस्मिन्मे ... ॥ ९

विष्णुब्रह्मसुराधिपप्रभृतयस्सर्वेऽपि देवासुरा-
स्सम्भूताज्जलधेर्विषात्परिभवं प्राप्ता यमेत्येश्वरम् ।
यानार्ताश्छरणागतानिति सुरा
न्योऽरक्षदर्घक्षणात्तस्मिन्मे ... ॥ १०

॥ इति श्रीमच्छङ्कराचार्यविरचिता दशश्लोकीस्तुतिः सम्पूर्णा ॥

॥ श्रीदक्षिणामूर्त्यष्टकम् ॥

मन्दस्मितं स्फुरितमुग्धमुखारविन्दं
कन्दर्पकोटिशतसुन्दरदिव्यमूर्तिम् ।
आताम्रकोमलजटाघटितेन्दुरेख-
मालोकये वटतटीनिलयं दयालुम् ॥ १

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यस्साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ २

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं शनै-
र्मायाकल्पितदेशकालकलना वैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि
महायोगीव यस्स्वेच्छया तस्मै ... ॥ ३

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।

यस्मात्साक्षात्करणाद्भवेन्न पुन-
रावृत्तिर्भवाम्भोनिधौ तस्मै ... ॥ ४

नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।
जानामीति तमेव मान्तमनुभा-
त्येतत्समस्तं जगत्तस्मै ... ॥ ५

देहं प्राणमपीन्द्रियाण्यपि चलां
बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति
भ्रान्ता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहा-
व्यामोहसंहारिणे तस्मै ... ॥ ६

राहुग्रस्तदिवाकरेन्दुसदृशो
मायासमाच्छादना-
त्सन्मात्रः करणोपसंहरणतो
योऽभूत्सुषुप्तः पुमान् ।

प्रागस्वाप्समिति प्रबोधसमये
यः प्रत्यभिज्ञायते तस्मै .... ॥ ७
बाल्यादिष्वपि जाग्रदादिषु
तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमि-
त्यन्तं स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजता
यो मुद्रया भद्रया तस्मै ... ॥ ८
विश्वं पश्यति कार्यकारणतया
स्वस्वामिसम्बन्धत-
श्शिष्याचार्यतया तथैव पितृ-
पुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो
मायापरिभ्रामितस्तस्मै ... ॥ ९
भूरम्भांस्यनलोऽनिलोऽम्बरमह-
र्नाथो हिमांशुः पुमा-

नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम्।
नान्यत्किञ्चन विद्यते विमृशतां
यस्मात्परस्माद्विभोस्तस्मै ··· ॥ १०

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात्।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ ११

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात्।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥ १२

चित्रं वटतरोर्मूले वृद्धाश्शिष्या गुरुर्युवा।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥
मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥ १४

मुनिर्मलज्ञानसुखैकरूपं
प्रज्ञानहेतुं परमार्थदायिनम् ।
चिदम्बुधौ तं विहरन्तमाद्य-
मानन्दमूर्तिं गुरुराजमीडे ॥ १५

यस्यान्तनादिमध्यं न हि
करचरणं नाम गोत्रं न सूत्रं
नो जातिर्नैव वर्णा न भवति
पुरुषो ना नपुंसं न च स्त्री ।
नाकारं नैवकारं न हि जनि
मरणं नास्ति पुण्यं न पापं
तत्त्वं नो तत्त्वमेकं सहज-
समरसं सद्गुरुं तं नमामि ॥ १६

अलं विकल्पैरहमेव केवलं
मयि स्थितं विश्वमिदं चराचरम् ।
इदं रहस्यं मम येन दर्शितं
स वन्दनीयो गुरुरेव केवलम् ॥ १७

॥ इति श्रीमच्छङ्कराचार्यविरचितं दक्षिणामूर्त्यष्टकं सम्पूर्णम् ॥

॥ श्रीदक्षिणामूर्तिचतुर्विंशतिवर्णमालास्तोत्रम् ॥

ओमित्येतदस्य बुधैर्नाम गृहीतं
यद्ब्रह्मैवेदं भाति समस्तं वियदादि ।
यस्याज्ञातः स्वस्वपदस्था विधिमुख्या-
स्तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥ १

नम्राज्ञानां भक्तिमतां यः पुरुषार्थं
दत्ते क्षिप्रं हन्ति च तत्सर्वविपत्तीः ।
पादाम्भोजाधस्तनितापस्मृतिमीशं तं ... ॥ २

मोहध्वंत्यै वैणिकवैयासिकमुख्या-
स्संविन्मुद्रापुस्तकवीणाक्षगुणान्यम् ।
हस्ताम्भोजैर्बिभ्रतमाराधितवंतस्तं ... ॥ ३

भद्रारूढं भद्रदमाराधयितॄणां
भक्तिश्रद्धापूर्वकमीशं प्रणमन्ति ।
आदित्या यं वाञ्छितसिद्ध्यै करुणाब्धिं तं ... ॥

गर्भान्तस्थाः प्राणिन एते भव-
पाशच्छेदे दक्षं निश्चितवन्तः शरणं यम् ।
आराध्याङ्घ्रिं प्रस्फुरदम्भोरुहयुग्मं तं ... ॥ ५

वक्त्रं धन्यास्संसृतिवार्धेरतिमात्रा-
द्भीतास्सन्तः पूर्णशशाङ्कद्युति यस्य ।
सेवन्तेऽध्यासीनमनन्तं वटमूलं तं ... ॥ ६

तेजस्तोमैरङ्गदसङ्घट्टितभास्व-
न्माणिक्योत्थैर्भासितविश्वो रुचिरैर्यः ।
तेजोमूर्तिं खानिलतेजःप्रमुखाढ्यं तं ... ॥ ७

दृश्याद्यादिद्रव्यककर्माण्यखिलानि
त्यक्त्वा काङ्क्षां कर्मफलेष्वत्र करोति ।
यज्जिज्ञासारूपफलार्थी क्षितिदेवस्तं ... ॥ ८

क्षिप्रं लोके यं भजमानः पृथुपुण्यः
प्रध्वस्ताधिः प्रोज्झितसंसृत्यखिलार्तिः ।
प्रत्यग्भूतं ब्रह्म परं सन्नमते यस्तं ... ॥ ९

णानेत्येवं यन्मनुमध्यस्थितवर्ण-
भक्ताः काले वर्णगृहीतेः प्रजपन्तः ।
मोदंते सम्प्राप्तसमस्तश्रुतितन्त्रास्तं ... ॥ १०
मूर्तिच्छायानिर्जितमन्दाकिनिकुन्द-
प्रालेयाम्भोराशिसुधाभूतिसुरेभा ।
यस्याभ्राभा हासविधौ दक्षशिरोधिस्तं ... ॥
तप्तस्वर्णच्छायजटाजूटकटाह प्रोद्य-
द्वीचीवल्लिविराजन्सुरसिन्धुम् ।
नित्यं सूक्ष्मं नित्यनिरस्ताखिलदोषं तं ... ॥
येन ज्ञातेनैव समस्तं विदितं
स्याद्यस्मादन्यद्वस्तु जगत्यां शशशृङ्गम् ।
यं प्राप्तानां नास्ति परं प्राप्यमनादिं तं ... ॥
मत्तो मारो यस्य ललाटाक्षिभवाग्नि-
स्फूर्जत्कीलप्रोषितभस्मीकृतदेहः
तद्भस्मासीद्यस्य सुजातः पटवासस्तं ... ॥ १४
अम्भोराशौ संसृतिरूपे लुठतां
तत्पारं गन्तुं यत्पदभक्तिर्दृढनौका ।

सर्वाराध्यं सर्वगमानन्दपयोधिं तं ... ॥ १५
मेधावी स्यादिंदुवतंसं धृतवीणं
कर्पूराभं पुस्तकहस्तं कमलाक्षम् ।
चित्ते ध्यायन्यस्य वपुर्द्राङ्निमिषार्धं तं ... ॥
धाम्नां धाम प्रौढरुचीनां परमं
यत्सूर्यादीनां यस्य स हेतुर्जगदादेः ।
एतावन्ये यस्य स सर्वैश्वर्यमीड्यं तं ... ॥ १७
प्रत्याहारप्राणनिरोधादिसमर्थै-
र्भक्तैर्दान्तैस्संयतचित्तैर्यतमानैः ।
स्वात्मत्वेन ज्ञायत एव त्वरया यस्तं ... ॥ १८
ज्ञांशीभूतान्प्राणिन एतान्फलदाता
चित्तान्तस्थः प्रेरयति स्वे सकलेऽपि ।
कृत्ये देवः प्राक्तनकर्मानुसरस्सन् तं ... ॥ १९
प्रज्ञामात्रं प्रापितसंविन्निजभक्तं
प्राणाक्षादेः प्रेरयितारं प्रणवार्थम् ।
प्राहुः प्राज्ञा यं विदितानुश्रवतत्त्वास्तं ...॥ २०

यस्य ज्ञानादेव नृणां संसृतिबोधो
यस्य ज्ञानादेव विमोक्षो भवतीति ।
स्पष्टं ब्रूते वेदशिरोदेशिकमाद्यं तं ... ॥२१

छिन्नेऽविद्यारूपवटे नैव च विश्वं
यत्राध्यस्तं जीवपरेशत्वमपीदम् ।
भानोर्भानुष्वम्बुवदस्ताखिलभेदं तं ... ॥ २२

स्वापस्वप्नौ जाग्रदवस्थापि न तत्र
प्राणश्चेतस्सर्वगतो यस्सकलात्मा ।
कूटस्थो यः केवलसच्चित्सुखरूपस्तं ... ॥

हाहेत्येवं विस्मयमीयुर्मुनिमुख्याः
ज्ञाते यस्मिन्स्वात्मतया नात्मविमोहः ।
प्रत्यग्भूते ब्रह्मणि यातः कथमित्थं तं ... ॥

यैषा रम्यैर्मन्त्रमयूराभिधवृत्तै-
रादौ कृत्वा यन्मनुवर्णैर्नुतिभङ्गी ।
तामेवैतां दक्षिणवक्त्रः कृपयासा
वूरीकुर्यादेशिकसम्राट्परमात्मा ॥ २५

॥ इति श्रीमच्छङ्कराचार्यविरचितं
दक्षिणामूर्तिवर्णमालास्तोत्रं सम्पूर्णम् ॥

॥ श्रीमृत्युञ्जयमानसिकपूजास्तोत्रम् ॥

कैलासे कमनीयरत्नखचितेकल्पद्रुमूले स्थितं
कर्पूरस्फटिकेन्दुसुन्दरतनुं कात्यायनीसेवितम् ।
गङ्गातुङ्गतरङ्गरञ्जितजटाभारं कृपासागरं
कण्ठालङ्कृतशेषभूषणममुं मृत्युञ्जयं भावये ॥ १

आगत्य मृत्युञ्जयचन्द्रमौले
व्याघ्राजिनालङ्कृत शूलपाणे ।
स्वभक्तसंरक्षणकामधेनो
प्रसीद विश्वेश्वरपार्वतीश ॥ २

भास्वन्मौक्तिकतोरणे मरकतस्तम्भायुतालङ्कृते
सौधे धूपसुवासिते मणिमये माणिक्यदीपाञ्चिते ।
ब्रह्मेन्द्रामरयोगिपुङ्गवगणैर्युक्ते च कल्पद्रुमैः
श्रीमृत्युञ्जयसुस्थिरो भव विभो माणिक्यसिंहासने॥

मन्दारमल्लीकरवीरमाधवी-
पुन्नागनीलोत्पल चम्पकान्वितैः ।

कर्पूरपाटीरसुवासितैर्जलै-
राधत्स्व मृत्युञ्जयपाद्यमुत्तमम् ॥ ४
सुगन्धपुष्पप्रकरैः सुवासितै-
र्विचन्नदीशीतलवारिभिः शुभैः ।
त्रिलोकनाथार्तिहरार्घ्यमादरा-
द्गृहाण मृत्युञ्जय सर्ववन्दित ॥ ५
हिमाम्बुवासितैस्तोयैः शीतलैरतिपावनैः ।
मृत्युञ्जय महादेव शुद्धाचमनमाचर ॥ ६
गुडदधिसहितं मधुप्रकीर्णं
सुघृतसमन्वित धेनुदुग्धयुक्तम् ।
शुभकर मधुपर्कमाहर त्वं
त्रिनयन मृत्युहर त्रिलोकवन्द्य ॥ ७
पञ्चास्यशान्तपञ्चास्य पञ्चपातकसंहर ।
पञ्चामृतस्नानमिदं कुरु मृत्युञ्जय प्रभो ॥ ८
जगत्त्रयीख्यात समस्ततीर्थ-
समाहृतैः कल्मषहारिभिश्च ।

स्नानं सुतोयैः समुदाचर त्वं
मृत्युञ्जयानन्तगुणाभिराम ॥ ९
आनीतेनातिशुभ्रेण कौशेयेनामरद्रुमात् ।
मार्जयामि जटाभारं शिव मृत्युञ्जय प्रभो ॥ १०
नानाहेमविचित्राणि चीरचीनाम्बराणि च ।
विविधानि च दिव्यानि मृत्युञ्जय सुधारय ॥ ११
विशुद्धमुक्ताफलजालरम्यं
मनोहरं काञ्चन हेमसूत्रम् ।
यज्ञोपवीतं परमं पवित्र-
माधत्स्व मृत्युञ्जय भक्तिगम्य ॥ १२
श्रीगन्धं घनसारकुङ्कुमयुतं कस्तूरिकापूरितं
कालेयेन हिमाम्बुना विरचितं मन्दारसंवासितं ।
दिव्यं देवमनोहरं मणिमये पात्रे समारोपितं
सर्वाङ्गेषु विलेपयामि सततं मृत्युञ्जय श्रीविभो ॥
अक्षतैर्धवलैर्दिव्यैः सम्यक्तिलसमन्वितैः ।
मृत्युञ्जय महादेव पूजयामि वृषध्वज ॥ १४

चम्पकपङ्कजकुरवक कुन्दैः करवीरमल्लिकाकुसुमैः ।
विस्तारय निजमकुटं मृत्युञ्जय पुण्डरीकनयनाप्त ॥
माणिक्यपादुकाद्वन्द्वे मौनिहृत्पद्ममन्दिरे ।
पादौ सत्पद्मसदृशौ मृत्युञ्जय निवेशय ॥ १६

माणिक्यकेयूरकिरीटहारैः
काञ्चीमणिस्थापितकुण्डलैश्च ।
मञ्जीरमुख्याभरणैर्मनोज्ञै-
रङ्गानि मृत्युञ्जय भूषयामि ॥ १७

गजवदनस्कन्दधृतेनातिस्वच्छेन चामरयुगेन ।
गलदलकाननपद्मं मृत्युञ्जय भावयामि हृत्पद्मे ॥

मुक्तातपत्रं शशिकोटिशुभ्रं
शुभप्रदं काञ्चनदण्डयुक्तम् ।
माणिक्यसंस्थापितहेमकुम्भं
सुरेश मृत्युञ्जय तेऽर्पयामि ॥ १९

मणिमुकुरे निष्पटले त्रिजगद्गाढान्धकारसत्पार्श्वे ।
कन्दर्पकोटिसदृशं मृत्युञ्जय पश्य वदनमात्मीयम् ॥

कर्पूरचूर्णं कपिलाज्यपूतं दास्यामि कालेयसमन्वितैश्च।
समुद्भवं पावनगन्धधूपितं मृत्युञ्जयाङ्गं
परिकल्पयामि ॥ २१
वर्तित्रयोपेतमखण्डदीप्त्या तमोहरं बाह्यमथान्तरं च।
साज्यं समस्तामरवर्गहृद्यं सुरेश मृत्युञ्जय वंशदीपम् ॥
राजान्नं मधुरान्वितं च मृदुलं माणिक्यपात्रे स्थितं
हिङ्गूजीरकसन्मरीचिमिलितैः शाकैरनेकैः शुभैः।
शाकं सम्यगपूपसूपसहितं सद्योघृतेनाप्लुतं
श्रीमृत्युञ्जय पार्वतीप्रिय विभो सापोशनंभुज्यताम् ॥
कूश्माण्डवार्ताकपटोलिकानां
फलानि रम्याणि च कारवल्या।
सुपाकयुक्तानि सशौरमाणि श्रीकण्ठ मृत्युञ्जय
भक्षयेश ॥ २४
शीतलं मधुरं स्वच्छं पावनं वाञ्छितं लघु।
मध्ये स्वीकुरु पानीयं शिव मृत्युञ्जय प्रभो ॥ २५
शर्करामिलितं स्निग्धं दुग्धान्नं गोघृतान्वितम्।

कदलीफलसम्मिश्रं भुज्यतां मृत्युसंहर ॥ २६
केवलमतिमाधुर्यं दुग्धैः स्निग्धैश्च शर्करामिलितैः ।
एलामरीचिमिलितं मृत्युञ्जय देव भुङ्क्ष्व परमान्नम् ॥
रम्भाचूतकपित्थकण्टकफलैर्द्राक्षारसस्वादुम-
त्खर्जूरैर्मधुरेक्षुखण्डशकलैः सन्नारिकेलाम्बुभिः ।
कर्पूरेण सुवासितैर्गुडजलैर्माधुर्ययुक्तैर्विभो
श्रीमृत्युञ्जय पूरय त्रिभुवनाधारं विशालोदरम् ॥ २८
मनोज्ञरम्भावनखण्डखण्डिता-
न्रुचिप्रदान् सर्षपजीरकांश्च ।
ससौरभान् सैन्धवसेवितांश्च
गृहाण मृत्युञ्जय लोकवन्द्य ॥ २९
हिङ्गूजीरकसहितं विमलामलकं कपित्थमतिमधुरम् ।
बिसखण्डाँल्लवणयुतान्मृत्युञ्जय तेऽर्पयामि
जगदीश ॥ ३०
एलाशुण्ठीसहितं दध्यन्नं चारुहेमपात्रस्थम् ।
अमृतप्रतिनिधिमाद्यं मृत्युञ्जय भुज्यतां त्रिलोकेश ॥

जम्बीरनीराञ्चितशृङ्गबेरं
मनोहरानम्लशलाटुखण्डान् ।
मृदूपदंशान्सहसोपभुङ्क्ष्व
मृत्युञ्जय श्रीकरुणासमुद्र ॥ ११

नागररामठयुक्तं सुललित
जम्बीरनीरसम्पूर्णम् ।
मथितं सैन्धवसहितं पिब
हर मृत्युञ्जय क्रतुध्वंसिन् ॥ १२

मन्दारहेमाम्बुजगन्धयुक्तै-
र्मन्दाकिनीनिर्मलपुण्यतोयैः ।
गृहाण मृत्युञ्जय पूर्णकाम
श्रीमत्परापोशनमभ्रकेश ॥ १३

गगनधुनीविमलजलैः मृत्युञ्जय पद्मरागपात्रगतैः ।
मृगमदचन्दनपूर्णं प्रक्षालय चारुहस्तपादयुग्मम् ॥
पुन्नागमल्लिकाकुन्दवासितैर्जाह्नवीजलैः ।
मृत्युञ्जय महादेव पुनराचमनं कुरु ॥ १४

मौक्तिकचूर्णसमेतैर्मृगमदघनसारवासितैः पूगैः ।
पर्णैस्वर्णसमानैर्मृत्युञ्जय तेऽर्पयामि ताम्बूलम् ॥ १७

नीराजनं निर्मलदीप्तिमद्भि-
दीपाङ्कुरैरुज्वलमुच्छ्रितैश्च ।
घण्टानिनादेन समर्पयामि
मृत्युञ्जयाय त्रिपुरान्तकाय ॥ १८

विरिञ्चिमुख्यामरवृन्दवन्दिते
सरोजमत्स्याङ्कितचक्रचिह्निते ।
ददामि मृत्युञ्जय पादपङ्कजे
फणीन्द्रभूषे पुनरर्घमीश्वर ॥ १९

पुन्नागनीलोत्पलकुन्दजाजी
मन्दारवल्ली करवीरपङ्कजैः ।
पुष्पाञ्जलिं बिल्वदलैस्तुलस्या
मृत्युञ्जयाङ्घ्रौ विनिवेशयामि ॥ २०

पदे पदे सर्वतमोनिकृन्तनं
पदे पदे सर्वशुभप्रदायकम् ।

प्रदक्षिणं भक्तियुतेन चेतसा
करोमि मृत्युञ्जय रक्ष रक्ष माम् ॥ ४१
नमो गौरीशाय स्फटिकधवलाङ्गाय च नमो
नमो लोकेशाय स्तुतविबुधलोकाय च नमः ।
नमः श्रीकण्ठाय क्षपितपुरदैत्याय च नमो
नमः फालाक्षाय स्मरमदविनाशाय च नमः ॥ ४२
संसारे जनितापरोगसहिते तापत्रयाक्रन्दिते
नित्यं पुत्रकलत्रवित्तविलसत्पाशैर्निबद्धं दृढम् ।
गर्वान्धं बहुपापवर्गसहितं कारुण्यदृष्ट्या विभो
श्रीमृत्युञ्जय पार्वतीप्रिय सदा मां पाहि सर्वेश्वर ॥
सौधे रत्नमये नवोत्पलदलाकीर्णे च तल्पान्तरे
कौशेयेन मनोहरेण धवलेनाच्छादितं सर्वशः ।
कर्पूराञ्चितदीपदीप्तिमिलिते रम्योपधानद्वये
पार्वत्याः करपद्मलालितपदं मृत्युञ्जयं भावये ॥ ४४
वपुश्चत्वारिंशद्विलसदुपचारैरभिमतै-
र्मनः पद्मे भक्त्या बहिरपि च पूजां शुभकरीम् ।

करोषि प्रत्यूषे निशि दिवसमध्येऽपि च पुमा-
न्प्रयाति श्रीमृत्युञ्जय पदमनेकाद्भुतपदम् ॥ ४५

प्रातर्लिङ्गमुमापतेरहरहः सन्दर्शनात्स्वर्गदं
मध्याह्ने हयमेधतुल्यफलदं सायन्तने मोक्षदं ।
भानोरस्तमये प्रदोषसमये पञ्चाक्षराराधनं
तत्कालत्रयतुल्यमिष्टफलदं सद्योऽनवद्यं दृढम् ॥ ४६

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
॥ मृत्युञ्जयमानसिकपूजास्तोत्रं सम्पूर्णम् ॥

दारिद्र्यदहनशिवस्तोत्रम्



विश्वेश्वराय नरकार्णवतारणाय
कर्णामृताय शशिशेखरधारणाय ।
कर्पूरकान्तिधवलाय जटाधराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ १

गौरीप्रियाय रजनीशकलाधराय
कालान्तकाय भुजगाधिपकङ्कणाय ।
गङ्गाधराय गजराजविमर्दनाय दारिद्र्य ... ॥

भक्तिप्रियाय भवरोगभयापहाय
उग्राय दुर्गभवसागरतारणाय ।
ज्योतिर्मयाय गुणनामसुनृत्यकाय दारिद्र्य ... ॥

चर्माम्बराय शवभस्मविलेपनाय
भालेक्षणाय मणिकुण्डलमण्डिताय ।
मञ्जीरपादयुगलाय जटाधराय दारिद्र्य ... ॥

पञ्चाननाय फणिराजविभूषणाय

हेमांशुकाय भुवनत्रयमण्डिताय ।
आनन्दभूमिवरदाय तमोमयाय दारिद्र्य ... ॥
भानुप्रियाय भवसागरतारणाय
कालान्तकाय कमलासनपूजिताय ।
नेत्रत्रयाय शुभलक्षणलक्षिताय दारिद्र्य ... ॥
रामप्रियाय रघुनाथवरप्रदाय
नागप्रियाय नरकार्णवतारणाय ।
पुण्येषु पुण्यभरिताय सुरार्चिताय दारिद्र्य ... ॥
मुक्तेश्वराय फलदाय गणेश्वराय
गीतप्रियाय वृषभेश्वरवाहनाय ।
मातङ्गचर्मवसनाय महेश्वराय दारिद्र्य ... ॥ ८
वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणम् ।
सर्वसंपत्करं शीघ्रं पुत्रपौत्राभिवर्धनम् ।
त्रिसन्ध्यं यः पठेन्नित्यं स हि स्वर्गमवाप्नुयात् ॥

॥ इति श्रीवसिष्ठविरचितं दारिद्र्यदहनस्तोत्रं सम्पूर्णम् ॥

॥ शङ्कराष्टकम् ॥

शीर्षजटागणभारं गरलाहारं समस्तसंहारम् ।
कैलासाद्रिविहारं पारं भववारिधेरहं वन्दे ॥ १
चन्द्रकलोज्ज्वलफालं कण्ठव्यालं जगत्त्रयीफालम् ।
कृतनरमस्तकमालं कालं कालस्य कोमलं वन्दे ॥ २
कोपेक्षणहतकामं स्वात्मारामं नगेन्द्रजावामम् ।
संसृतिशोकविरामं श्यामं कण्ठेन कारणं वन्दे ॥ ३
कटितटविलसितनागं खण्डितयागं महाद्भुतत्यागम् ।
विगतविषयरसरागं भागं यज्ञेषु बिभ्रतं वन्दे ॥ ४
त्रिपुरादिकदनुजांतं गिरिजाकान्तं सदैव संशान्तम् ।
लीलाविजितकृतान्तं भान्तं स्वान्तेषु देहिनां वन्दे ॥ ५
सुरसरिदापूतकेशं त्रिदशकुलेशं हृदालयावेशम् ।
विगताशेषक्लेशं देशं सर्वेष्टसम्पदां वन्दे ॥ ६
करतलकलितपिनाकं विगतजराकं सुकर्मणां पाकम् ।
परपदवीतवराकं नाकक्रमपूगवन्दितं वन्दे ॥ ७

भूतिविभूषितकायं दुस्तरमायं विवर्जितापायम् ।
प्रमथसमूहसहायं सायं प्रातर्निरन्तरं वन्दे ॥ ८

यस्तु पदाष्टकमेतद्ब्रह्मानन्देन निर्मितं नित्यम् ।
पठति समाहितचेताः प्राप्नोत्यन्ते स शैवमेव पदम् ॥

इति श्रीमत्परमहंसस्वामिब्रह्मानन्दविरचितं
श्रीशङ्कराष्टकं सम्पूर्णम् ॥

॥ सुवर्णमालास्तुतिः ॥

अथ कथमपि मद्रसनां त्व-
दगुणलेशैर्विशोधयामि विभो ।
साम्ब सदाशिव शम्भो
शङ्कर शरणं मे तव चरणयुगम् ॥ १

आखण्डल मदखण्डन पण्डित
तण्डुप्रिय चण्डीश विभो । साम्ब ... ॥ २

इभचर्माबर शम्बरारिपुरप-
हरणोज्वलनयन विभो । साम्ब ... ॥ ३

ईशगिरीश नरेश परेश
महेश बिलेशय भूषण भो । साम्ब ... ॥ ४

उमया दिव्यसुमङ्गल विग्रहयाऽऽ-
लिङ्गितवामाङ्ग विभो । साम्ब ... ॥ ५

ऊरीकुरु मामज्ञमनाथं
दूरीकुरु मे दुरितं भो । साम्ब ... ॥ ६

ऋषिवरमानसहंसचराचर-
जनन स्थितिलय कारण भो । साम्ब ... ॥
ऋक्षाधीश किरीट महोक्षा-
रूढविधृतरुद्राक्ष विभो । साम्ब ... ॥ ८
लृवर्णद्वन्द्वमवृन्तसुकुसुम-
मिवाङ्घ्री तवार्पयामि विभो । साम्ब ... ॥
एकं सदिति श्रुत्या त्वमेव
सदसीत्युपास्महे मृड भो । साम्ब ... ॥
ऐक्यं निजभक्तेभ्यो वितरसि
विश्वम्भरोऽत्र साक्षी भो । साम्ब ... ॥
ओमिति तव निर्देष्ट्री माया-
स्माकं मृडोपकर्त्री भो । साम्ब ... ॥ १२
औदास्यं स्फुटयति विषयेषु
दिगम्बरता च तवैव विभो । साम्ब ... ॥
अन्तः करणविशुद्धिं भक्तिं च
त्वयि सतीं प्रदेहि विभो । साम्ब ... ॥

अस्तोपाधिसमस्तव्यस्तै-
रूपैर्जगन्मयोऽसि विभो । साम्ब ... ॥
करुणावरुणालय मयि दास
उदासस्तवोचितो नहि भो । साम्ब ... ॥
खलसहवासं विघटय घटय
सतामेव सङ्गमनिशं भो । साम्ब ... ॥
गरलं जगदुपकृतये गिलितं भवता
समोऽस्ति कोऽत्र विभो ? । साम्ब ...॥
घनसारगौरगात्रप्रचुर-
जटाजूटबद्धगङ्ग विभो । साम्ब ... ॥ १९
ज्ञप्तिः सर्वशरीरेष्वखण्डिताया
विभाति सात्वं भो । साम्ब ... ॥ २०
चपलं मम हृदयकपिं विषय-
द्रुचरं दृढं बधान विभो । साम्ब ... ॥
छायास्थाणोरपि तव पापं
नमतां हरत्यहो शिव भो । साम्ब ... ॥

जयकैलासनिवास प्रमथ-
गणाधीश भूसुरार्चित भो । साम्ब ... ॥
झणुतक इङ्किणु झणुत-
त्किटतकशब्दैर्नटसिमहानट भो । साम्ब...
ज्ञानं विक्षेपादिरहितं कुरु मे
गुरुस्त्वमेव विभो । साम्ब ... ॥ २५
टङ्कारस्तव धनुषो दलयति
हृदयं द्विषमेशनिरिव भो । साम्ब ... ॥
टाकृतिरिव तवमायाबहि-
रन्तः शून्यरूपिणी खलु भो । साम्ब ...॥
डम्बरमम्बुरुहामपि दलय-
त्यतघ्रं त्वदङ्घ्रियुगलं भो । साम्ब । ... ॥
ढक्काक्षसूत्र शूलद्रुहिणं-
करोटीसमुल्लसत्कर भो । साम्ब ॥...२९
णाकारगर्भिणी चेच्छुभदा ते
शरमतिर्नृणामिह भो । साम्ब ... ॥ ३०

तव मन्त्रतिसञ्जपतः सद्य-
स्तरति नरोहि भवाब्धिं भो । साम्ब ...॥
धूत्कारस्तस्य मुखे भूयात्ते
नामनास्ति यस्य विभो । साम्ब ... ॥१२
दयनीयश्च दयालुः कोऽस्ति
मदन्यस्त्वदन्य इह वद भो । साम्ब ... ॥
धर्मस्थापनदक्षत्र्यक्षगुरो
दक्षयज्ञशिक्षक भो । साम्ब ... ॥ १४
ननुताडितोऽसि धनुषा
लुब्धधिया त्वं पुरा नरेण विभो । साम्ब...
परिमातुं तव मूर्तिं नाल-
मजस्तत्परात्परोऽसि विभो । साम्ब ... ॥
फलमिह नृतया जनुषस्त्व-
त्पदसेवासनातनेश विभो । साम्ब ... ॥
बलमारोग्यं चायुस्त्वद्गुण-
रुचितां चिरं प्रदेहि विभो । साम्ब ... ॥

भगवन् भर्ग भयापह भूतपते
भूतिभूषिताङ्ग विभो । साम्ब ... ॥ ३९
महिमा तव नहि मति
श्रुतिषु हिमानीधरात्मजाधव भो । साम्ब...
यमनियमादिभिरङ्गैर्यमिनो
हृदये भजन्ति सत्वं भो । साम्ब ...॥ ४१
रज्जावहिरिव शुक्तौ रजतमिव
त्वयि जगन्ति भान्ति विभो । साम्ब... ॥
लब्ध्वा भवत्प्रसादाच्चक्रं
विधुरवति लोकमखिलं भो । साम्ब ... ॥
वसुधातद्धरच्छयरथमौर्व-
शरपराकृतासुर भो । साम्ब ... ॥ ४४
शर्वदेव सर्वोत्तम सर्वद
दुर्वृत्तगर्वहरण विभो । साम्ब ... ॥ ४५
षड्रिपुषड्ऊर्मि षड्विकारहर
सन्मुख षण्मुख जनक विभो । साम्ब... ॥

सत्यं ज्ञानमनन्तं ब्रह्मे-
त्येतल्लक्षणलक्षित भो । साम्ब ... ॥ ४७

हाहा हूहू मुख सुरगायक-
गीतापदानपद्य विभो । साम्ब ... ॥ ४८

ळादिर्नहि प्रयोगस्तदन्तमिह
मङ्गलं सदास्तु विभो । साम्ब ... ॥ ४९

क्षणमिव दिवसान्नेष्यति
त्वत्पदसेवाक्षणोत्सुकः शिव भो। साम्ब ...

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
॥ सुवर्णमालास्तुतिः सम्पूर्णा ॥

॥ विश्वेश्वराष्टकम् ॥

गङ्गातरङ्गकमनीयजटाकलापं
गौरीनिरन्तरविभूषितवामभागम् ।
नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ १

वाचामगोचरममेयगुणस्वरूपं
वागीशविष्णुसुरसेवितपादपीठम् ।
वामेन विग्रहभरेण कळत्रवन्तं वाराणसी ...॥

रागादिदोषरहितं सुगुणानुरागं
वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्यधैर्यनिलयं गरळाभिरामं वाराणसी ...॥

तेजोमयं सकलनिष्कळमद्वितीय-
मानन्दकन्दमपराजितमप्रमेयम् ।
नानात्मकं सगुणनिर्गुणमादिदेवं वाराणसी ...॥

भूताधिपं भुजगपुङ्गवभूषिताङ्गं

व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम् ।
पाशाङ्कुशाभयवरप्रदशूलपाणिं वाराणसी ... ॥
आशां विहाय परिहृत्य परस्य निन्दां
पापे रतिञ्च विनिवार्य मनस्समाधौ ।
आधारहृत्कमलमध्यगतं परेशं वाराणसी ... ॥
शीतांशुशोभितकिरीटविराजमानं
फालेक्षणानलविनाशितपञ्चबाणम् ।
नागाधिपारचितभासुरकर्णपूरं वाराणसी ... ॥
पञ्चाननं दुरितमत्तमतङ्गजानां
नागान्तकं दनुजपुङ्गवपन्नगानाम् ।
दावानलं मरणशोकभयाटवीनां वाराणसी ... ॥
वाराणसीपुरपतेः परमेश्वरस्य
व्याघ्रोक्तमष्टकमिदं पठते मनुष्यः ।
विद्यार्थिश्रियं विपुसलौख्यमनन्तकीर्तिं
सम्प्राप्य देहविलये लभते च मोक्षम् ॥ ९

॥ श्रीविश्वेश्वराष्टकं सम्पूर्णम् ॥

॥ श्रीवटुकभैरवसहस्रनामस्तोत्रम् ॥

देव्युवाच—

देवेश भक्तिसुलभ देवनायकवन्दित ।
भक्तानां काम्यसिद्ध्यर्थं निदानं ब्रूहि तत्त्वतः ॥ १
विनैव न्यासजालेन पूजनेन विना भवेत् ।
विनाऽपि कायक्लेशेन विना जप्येन चेश्वर ॥ २

श्रीमहादेव उवाच—

अस्य श्रीवटुकभैरवसहस्रनाममालामन्त्रस्य ब्रह्मानन्दभैरवऋषिः अनुष्टुप्छन्दः वटुकभैरवो देवता । वं बीजं ह्रीं शक्तिः अभीष्टफलसिद्ध्यर्थे जपे विनियोगः ॥

वटुकः कामदो नाथो नाथप्रियः प्रभाकरः ।
भैरवो भीतिहा दर्पः कन्दर्पो मीनकेतनः ॥ ३
रुद्रो वटुर्विभूतीशो भूतनाथः प्रजापतिः ।
दयालुः क्रूर ईशानो जनीशो लोकवल्लभः ॥ ४
देवो दैत्येश्वरो वीरो वीरवन्द्यो दिवाकरः ।

बलिप्रियः सुरश्रेष्ठः कनिष्ठः कनिष्ठशिशुः ॥ ५
महाबलो महातेजा वित्तजित् द्युतिवर्धनः ।
तेजस्वी वीर्यवान्वृद्धो विवृद्धो भूतनायकः ॥ ६
कालः कपालकामादिविकारः काममर्दनः ।
कामिकारमणः कामी नायकः कालिकाप्रियः ॥ ७
कालीशः कामिनीकान्तः कालिकानन्दवर्धनः ।
कालिकाहृदयज्ञानी कालिकातनयो नयः ॥ ८
खगेशः खेचरः खेटो विशिष्टः खेटकप्रियः ।
कुमारः क्रोधनः काली प्रियः पर्वतरक्षकः ॥ ९
गणेज्यो गणनो गूढो गूढाशयो गणेश्वरः ।
गणनाथो गणश्रेष्ठो गणमुख्यो गणप्रियः ॥ १०
घोरनाथो घनश्यामो घनमूर्तिर्घनात्मकः ।
घोरनाशो घनेशानो घनपतिर्घनात्मकः ॥ ११
चम्पकाभाश्चिरञ्जीवो चारुवेषश्चराचरः ।
अन्योऽचिन्त्यगणो धीमान्सुचित्तस्थश्चितीश्वरः ॥
छत्री छत्रपतिश्छत्रश्छिन्ननासामनः प्रियः ।

छिन्नाभिश्छिन्नसन्तापश्छर्दिराच्छर्दनन्दनः ॥ १३
जनो जिष्णुर्जटीशानो जनार्दनो जनेश्वरः ।
जनौको जनसन्तोषो जनजाड्य विनाशनः ॥ १४
जनप्रस्थो जनाराध्यो जनाध्यक्षो जनप्रियः ।
जीवहा जीवदो जन्तुर्जीवनाथो जनेश्वरः ॥ १५
जयदो जित्वरो जिष्णुर्जयश्रीः जयवर्धनः ।
जयाभूमिर्जयाकारो जयहेतुर्जयेश्वरः ॥ १६
झङ्कारहृदयान्तात्मा झङ्कारहेतुरात्मभूः ।
झर्झरेश्वरी हरिर्भर्ता विभर्ता भृत्यकेश्वरः ॥ १७
ठीकारहृदयोऽात्म ठङ्केशाष्टकनायकः ।
ठेकारभूषुरन्ध्रेशाष्ठिरीशाष्ठकुरपतिः ॥ १८
डडीडक्काप्रियः पान्थो डुण्ढिराजो निरन्तकः ।
ताम्रस्तमीश्वरश्चेता तीर्थजातस्तडित्प्रभुः ॥ १९
स्थाणुः स्थाणुकस्तम्भस्तार्क्ष्यैकस्तम्भदेश्वरः ।
स्थलजः स्थावरस्थाता स्थिरबुद्धिः स्थितेन्द्रियः ॥
स्थिरज्ञातिः स्थिरप्रीतिः स्थिरस्थितिः स्थिराशयः ।

दरो दामोदरो दम्भो दाडिमीकुसुमप्रियः ॥ २१
दारिद्र्यहादिमी दिव्यो दिव्यदेहो दिवप्रभः ।
दीक्षाकारो दिवानाथो दिवसेशो दिवाकरः ॥ २२
दीर्घशान्तिर्दलज्योतिर्दलेशो दलसुन्दरः ।
दलप्रियो दलाभाशो दलश्रेष्ठो दलप्रभुः ॥ २३
दलकान्तिर्दलाकारो दलसेव्यो दलार्चितः ।
दीर्घबाहुर्दलश्रेष्ठो दललूध्वदलाकृतिः ॥ २४
दानवेशो दयासिन्धुर्दयालुर्दीनवल्लभः ।
धनेशो धनदो धर्मो धनराजो धनप्रियः ॥ २५
धनप्रदो धनाध्यक्षो धनमान्यो धनञ्जयः ।
धीवरो धातुको धाता धूम्रो धूमच्छविवर्धनः ॥ २६
धनिष्ठो धनलच्छत्री धनकाम्यो धनेश्वरः ।
धीरो धीरतरो धेनुर्धीरेशो धरणीप्रभुः ॥ २७
धरानाथो धराधीशो धरणीनायको धरः ।
धराकान्तो धरापालो धरणीभृद्धराप्रियः ॥ २८
राधारो धराधृष्णो धृतराष्ट्रो धनीश्वरः ।

नारदो नरदो नेता नतिपूज्यो नतिप्रभुः ॥ २९
नतिलभ्यो नतीशानो नतिलब्धो नतीश्वरः ।
पाण्डवः पार्थसम्पूज्यः पाथोदः प्रणतः पृथुः ॥ ३०
पुराणः प्राणदो पान्थो पाञ्चाली पावकप्रभुः ।
पृथिवीशः पृथासूनुः पृथिवीभृत्यकेश्वरः ॥ ३१
पूर्वेशूरपतिः श्रेयान् प्रीतिदः प्रीतिवर्धनः ।
पार्वतीशः परेशानः पार्वतीहृदयप्रियः ॥ ३२
पार्वतीरमणः पूतः पवित्रः पापनाशनः ।
पात्रीपात्रालिसन्तुष्टः परितुष्टः पुमान्प्रियः ॥ ३३
पर्वेशः पर्वताधीशः पर्वतो नायकात्मजः ।
फाल्गुनः फल्गुनो नाथः फणेशः फणिरक्षकः ॥
फणीपतिः फणीशानः फणालिन्दः फणाकृतिः ।
बलभद्रो बली बालो बलधीर्बलवर्धनः ॥ ३५
बलप्राणो बलाधीशो बलिदानप्रियङ्करः ।
बलिराजो बलिप्राणो बलिनाथो बलिप्रभुः ॥ ३६
बली बलश्च बालेशो बालकः प्रियदर्शनः ।

भद्री भद्रप्रदो भीमो भीमसेनो भयङ्करः ॥ ३७
भव्यो भव्यप्रियो भूतपतिर्भूतविनाशकः ।
भूतेशो भूतिदो भर्गो भूतभव्यो भवेश्वरः ॥ ३८
भवानीशो भवेशानो भवानीनायको भवः ।
मकारो माधवो मानी मीनकेतुर्महेश्वरः ॥ ३९
महर्षिर्मर्दनो मन्थो मिथुनेशोऽमराधिपः ।
मरीचिर्मञ्जुलो मोहो मोहहा मोहमर्दनः ॥ ४०
मोहको मोहनो मेधाप्रियो मोहविनाशकः ।
महीपतिर्महेशानो महाराजो महेश्वरः ॥ ४१
महीश्वरो महीपालो महीनाथो महीप्रियः ।
महीधरो महीशानो मधुराजो मुनिप्रियः ॥ ४२
मौनी मौनधरो मेधो मन्दारो मतिवर्धनः ।
मतिदो मन्धरो मन्त्रो मन्त्रीशो मन्त्रनायकः ॥ ४३
मेधावी मानदो मानी मानहा मानमर्दनः ।
मीनगो मकराधीशो मकरो मणिरञ्जितः ॥ ४४
मणिरन्ध्रो मणिभ्राता मणिमण्डल मण्डितः ।

मन्त्रिणो मन्त्रदो मुग्धो मोक्षदो मोक्षवल्लभः ॥ ४५
मल्लो मल्लप्रियो मन्त्रो मेलको मेलनप्रभः ।
मल्लिकागन्धरमणो मालतीकुसुमप्रभः ॥ ४६
मालतीशो मघाधीशो माघमूर्तिर्मधेश्वरः ।
मूलाभो मूलहा मूलो मूलदो मूलसम्भवः ॥ ४७
माणिक्यरोचिः सम्मुग्धो मणिकूटो मणिप्रियः ।
मुकुन्दो मदनो मन्दो मदवन्द्यो मनुप्रभुः ॥ ४८
मनस्थो मेनकाधीशो मेनकाप्रियदर्शनः ।
यमोऽपि यामलो येता यादवो यदुनायकः ॥ ४९
याचको यज्ञको यज्ञो यज्ञेशो यज्ञवर्धनः ।
रमापती रमाधीशो रमेशो रामवल्लभः ॥ ५०
रमापती रमानाथो रमाकान्तो रमेश्वरः ।
रेवतीरमणो रामो रामेशो रामनन्दनः ॥ ५१
रम्यमूर्ती रतीशानो राकाया नायको रविः ।
लक्ष्मीधरो ललज्जिह्वो लक्ष्मीबीजजपे रतः ॥ ५२
लम्पटो लम्बराजेशो लम्बदेशो लकारभूः ।

वामनो वल्लभो वन्द्यो वनमाली वलेश्वरः ॥ ५३
वशस्थो वनगो वन्ध्यो वनराजो वनाह्वयः ।
वनेचरो वनाधीशो वनमालाविभूषणः ॥ ५४
वेणुप्रियो वनाकारो वनराध्यो वनप्रभुः ।
शम्भुः शङ्करसन्तुष्टः शम्बरारिः सनातनः ॥ ५५
शबरीप्रणतः शालः शिलीमुखध्वनिप्रियः ।
शकुलः शल्लकः शीलः शीतरश्मिः शितांशुकः ॥
शीलदः शीकरः शीलः शीलशाली शनैश्चरः ।
सिद्धः सिद्धिकरः साध्यः सिद्धिभूः सिद्धिभावनः ॥
सिद्धान्तवल्लभः सिन्धुः सिन्धुतीरनिषेवकः ।
सिन्धुपतिः सुराधीशः सरसीरुहलोचनः ॥ ५८
सरित्पतिस्सरित्संस्थः सरः सिन्धुसरोवरः ।
सखा वीरयतिः सूतः सचेता सत्पतिः सितः ॥
सिन्धुराजः सदाभूतः सदाशिवः सताङ्गतिः ।
सहशः सहसी शूरः सेव्यमानः सतीपतिः ॥ ६०
सूर्यः सूर्यपतिः सेव्यः सेवाप्रियः सनातनः ।

सनीशः शशिनाथः सतीसेव्यः सतीरतः ॥ ६१
सतीप्राणः सतीनाथस्सतीसेव्यः सतीश्वरः ।
सिद्धराजः सतीतुष्टः सचिवः सव्यवाहनः ॥ ६२
सतीनायकसन्तुष्टः सव्यसाची समन्तकः ।
सचितः सर्वसन्तोषी सर्वाराधनसिद्धिदः ॥ ६३
सर्वाराध्यः शचीवाच्यः सतीपतिः सुसेवितः ।
सागरः सगरः सार्वः समुद्रप्रियदर्शनः ॥ ६४
समुद्रेशः परो नाथः सरसीरुहलोचनः ।
सरसीजलदाकारः सरसीजलदार्चितः ॥ ६५
सामुद्रिकः समुद्रात्मा सेव्यमानः सुरेश्वरः ।
सुरसेव्यः सुरेशानः सुरनाथस्सुरेश्वरः ॥ ६६
सुराध्यक्षः सुराराध्यः सुरवृन्दविशारदः ।
सुरश्रेष्ठः सुराप्राणः सुरसिन्धुनिवासिनः ॥ ६७
सुधाप्रियः सुधाधीशः सुधासाध्यः सुधापतिः ।
सुधानाथः सुधाभूतः सुधासागरसेवितः ॥ ६८
हाटको हीरको हन्ता हाटको रुचिरप्रभः ।

हव्यवाहो हरिद्राभो हरिद्रारसमर्दनः ॥ ६९
हेतिर्हेतुर्हरिर्नाथो हरिनाथो हरिप्रियः ।
हरिपूज्यो हरिप्राणो हरिहृष्टो हरिद्रकः ॥ ७०
हरीशो हन्त्रिको हीरो हरिनाम परायणः ।
हरिमुग्धो हरीरम्यो हरिवासो हरीश्वरः ॥ ७१
हरो हरपतिर्हारो हरिणीचित्तहारकः ।
हरो हितो हरिप्राणो हरिवाहनशोभनः ॥ ७२
हंसो हासप्रियो हुंहुं हुतभुक् हुतवाहनः ।
हुताशनो हवी हिक्को हालाहलहलायुधः ॥ ७३
हलाकारो हलीशानो हलिपूज्यो हलिप्रियः ।
हरपुत्रो हरोत्साहो हरसूनुर्हरात्मजः ॥ ७४
हरबन्धो हराधीशो हरान्तको हराकृतिः ।
हरप्राणो हरमान्यो हरवैरिविनाशनः ॥ ७५
हरशत्रुर्हराभ्यर्च्यो हुङ्कारो हरिणीप्रियः ।
हाटकेशो हरेशानो हाटकप्रियदर्शनः ॥ ७६
हाटको हाटकप्राणो हाटभूषणभूषकः ।

हेतिदो हेतिको हंसो हंसागतिराह्वयः ॥ ७७
हंसीपतिर्हरोन्मत्तो हंसीशो हरवल्लभः ।
हरपुष्पप्रभो हंसीप्रियो हंसविलासितः ॥ ७८
हरजाविरतो हारी हरितो हरितांपतिः ।
हरित्प्रभुर्हरित्पालो हरिदन्तरनायकः ॥ ७९
हरिदीशो हरित्प्रायो हरिप्रियप्रिया हितः ।
हेरम्बो हुङ्कृतिक्रुद्धो हेरम्बो हुङ्कृती हरी ॥ ८०
हेरम्ब प्राणसंहर्ता हेरम्बहृदयप्रियः ।
क्षमापतिः क्षणं क्षान्तः क्षुरधारः क्षितीश्वरः ॥
क्षितीशः क्षितिभृत् क्षीणः क्षितिपालः क्षितिप्रभुः ।
क्षितीशानः क्षितिप्राणः क्षितिनायक सात्प्रियः ॥
क्षितिराजः क्षणाधीशः क्षणपतिः क्षणेश्वरः ।
क्षणप्रियः क्षमानाथः क्षणदानायकप्रियः ॥ ८३
क्षणिकः क्षणकाधीशः क्षणदाप्राणदः क्षमी ।
क्षमः क्षोणीपतिः क्षोभः क्षोभकारी क्षमाप्रियः ॥
क्षमाशीलः क्षमारूपः क्षमामण्डलमण्डितः ।

क्षमानाथः क्षमाधारः क्षमाधारी क्षमाधरः ॥ ८५
क्षेमक्षीणरुजाक्षुद्रः क्षुद्रपालविशारदः ।
क्षुद्रासनः क्षणाकारः क्षीरपानकतत्परः ॥ ८६
क्षीरशायी क्षणेशानः क्षेणीभृत् क्षणदोत्सवः ।
क्षेमङ्करक्षमालुब्धः क्षमाहृदयमण्डनः ॥ ८७
नीलाद्रिरुचिरावेशः नीलोपचितसन्निभः ।
नालमणिप्रभारम्यो नीलभूषणभूषितः ॥ ८८
नीलवर्णो नीलभ्रुवो मुण्डमालाविभूषितः ।
मुण्डस्थो मुण्डसन्तुष्टो मुण्डमालाधरो नयः ॥ ८९
दिग्वासा विदिताकारो दिगम्बरवरप्रदः ।
दिगम्बरीश आनन्दी दिग्बन्ध प्रियनन्दनः ॥ ९०
पिङ्गलैकजटो हृष्टो डमरूवादनप्रियः ।
श्रेणीकरः श्रेणाशायः खड्गधृक् खड्गपालकः ॥
शूलहस्तो मतङ्गाभो मातङ्गोत्सवसुन्दरः ।
अभयङ्कर ऊर्वङ्को लङ्कापतिर्विनायकः ॥ ९२
नगेशयो नगेशानो नागमण्डलमण्डितः ।

नागाकारो नागाधीशो नागशायी नगप्रियः ॥ ९३
घटोत्सवो घटाकारो घण्टावाद्यविशारदः ।
कपालपाणिरम्बेशः कपालाशनशारदः ॥ ९४
पद्मपाणिः करालास्यस्त्रिनेत्रो नागवल्लभः ।
किङ्किणीजालसंहृष्टो जनाशयो जननायकः ॥ ९५
अपमृत्युहरो मायामोहमूलविनाशकः ।
आयुकः कमलानाथः कमलाकान्तवल्लभः ॥ ९६
राज्यदो राजराजेशो राजवत्पदशोभनः ।
डाकिनीनायको नित्यो नित्यधर्मपरायणः ॥ ९७
डाकिनीहृदयज्ञानी डाकिनीदेहनायकः ।
डाकिनीप्राणदः सिद्धः श्रद्धेयचरितो विभुः ॥ ९८
हेमप्रभो हिमेशानो हिमानीप्रियदर्शनः ।
हेमदो नर्मदो मानी नामधेयो नगात्मकः ॥ ९९
वैकुण्ठो वासुकिप्राणो वासुकीकण्ठभूषणः ।
कुण्डलीशो मखध्वंसी मखराजो मखेश्वरः ॥ १००
मखाकारो मखाधीशो मखमालिविभूषणः ।

अम्बिकावल्लभो वाणीमतिर्वाणीविशारदः ॥ १०१
वाणीशो वचनप्राणो वचनस्थो वनप्रियः ।
वेलाधारो दिशामीशो दिग्भागो हि दिगीश्वरः ॥
पटुप्रियो दुराराध्यो दारिद्र्यभञ्जनक्षमः ।
तर्कतर्कप्रियोऽतर्क्यो वितर्क्यस्तर्कवल्लभः ॥ १०३
तर्कसिद्धः सुसिद्धात्मा सिद्धदेहो महासनः ।
महगर्वो महेशानो गन्धो गन्धीविशारदः ॥ १०४
मङ्गलं मङ्गलाकारो मङ्गलवाद्यवादकः ।
मङ्गलीशो विमानस्थो विमानैकसुनायकः ॥ १०५
बुधेशो विविधाधीशो बुधवारो बुधाकरः ।
बुधनाथो बुधप्रीतो बुधवन्द्यो बुधाधिपः ॥ १०६
बुधसिद्धो बुधप्राणो बुधप्रियो बुधोबुधः ।
सोमः सोमसमाकारः सोमपाः सोमनायकः ॥
सोमप्रभः सोमसिद्धो मनःप्राणप्रणायकः ।
कामगः कामहा बौद्ध कामनाफलदोऽधिपः ॥
त्रिदशो दशरात्रीशो दशाननविनाशकः ।

लक्ष्मणो लक्षसम्भर्ता लक्ष्यसंख्यो मनःप्रियः ॥
विभावसुर्नवेशानो नायको नगरप्रियः ।
नरकान्तिर्नलोत्साहो नरदेवोनलाकृतिः ॥ ११०
नरपतिर्नरेशानो नारायणो नरेश्वरः ।
अनिलो मारुतो मासो मांसैकरससेवितः ॥ १११
मरीचिरमरेशानो मागधो मगधप्रभुः ।
सुन्दरीसेवको द्वारी द्वारदेशनिवासिनः ॥ ११२
देवकोगर्भसञ्जातो देवकीसेवकी कुहुः ।
बृहस्पतिः कविः शुक्रः शारदासाधनप्रियः ॥ ११३
शारदासाधकप्राणः शारदासेवकोत्सुकः ।
शारदासाधकश्रेष्ठो मधुपानसदारतिः ॥ ११४
मोदकादानसम्प्रीतो मोदकामोदमोदितः ।
आमोदानन्दनो नन्दो नन्दिकेशो महेश्वरः ॥ ११५
नन्दिप्रियो नदीनाथो नदीतीरतरुस्तथा ।
तपनस्तापनस्तप्ता तापहा तापकारकः ॥ ११६
पतङ्गगोमुखो गौरगोपालो गोपवर्धनः ।

गोपतिर्गोपसंहर्ता गोविन्दैकप्रियोऽतिगः ॥ ११७
गव्येष्ठो गणरम्यश्च गुणसिन्धुर्गुणप्रियः ।
गुणपूज्यो गुणोपेतो गुणवाद्यगुणोत्सवः ॥ ११८
गुणीसकेवलो गर्भः सुगर्भो गर्भरक्षकः ।
गाम्भीरधारको धर्ता विधर्ता धर्मपालकः ॥ ११९
जगदीशो जगन्मित्रो सगज्जाड्यविनाशनः ।
जगत्कर्ता जगद्धाता जगज्जीवनजीवनः ॥ १२०
मालतीपुष्पसम्प्रीतो मालतीकुसुमोत्सवः ।
मालतीकुसुमाकारो मालतीकुसुमप्रभुः ॥ १२१
रसालमञ्जरीरम्यो रसालगन्धसेवितः ।
रसालमञ्जरी लुब्धो रसालतरुवल्लभः ॥ १२२
रसालपादपासीनो रसालफलसुन्दरः ।
रसालरससन्तुष्टो रसालरससालयः ॥ १२३
केतकीपुष्पसन्तुष्टः केतकीगर्भसम्भवः ।
केतकीपत्रसङ्काशः केतकीप्राणनाशकः ॥ १२४
गर्तस्थो गर्तगम्भीरो गर्ततीरनिवासिनः ।

गणसेव्यो गणाध्यक्षो गणराजो गणाह्वयः ॥ १२५
आनन्दभैरवो भीरुभैरवेशो रुरुर्भगः ।
सुब्रह्मण्यभैरवो नामभैरवो भूतभावनः ॥ १२६
भैरवीतनयो देवीपुत्रः पर्वतसन्निभः ।
नाम्नाऽनेन सहस्रेण स्तुत्वा वटुकभैरवम् ॥ १२७
लभते ह्यतुलां लक्ष्मीं देवतामपि दुर्लभाम् ।
उपदेशं गुरोर्लब्ध्वा योगेन्द्रमण्डली भवेत् ॥ १२८
तस्मिन्योगे महेशानस्सर्वसिद्धिमवाप्नुयात् ।
लक्षमावर्तयेन्मन्त्री मन्त्रराजं नरेश्वरः ॥ १२९
नित्यकर्मसु सिध्यर्थं तत्फलं लभते ध्रुवं ।
स्तवमेनं पठेन्मन्त्री पाठयित्वा यथाविधि ॥ १३०
दुर्लभां लभते सिद्धिं सर्वदेवनमस्कृताम् ।
न प्रकाश्यं च पुत्राय भ्रष्टेषु न कदाचन ॥ १३१
अन्यथा सिद्धिरोधः स्याच्चतुरो वा भवेत् प्रियः ।
स्तवस्यास्य प्रसादेन देवनाकमविप्रियः ॥ १३२
सङ्ग्रामे विजयेच्छत्रून्मातङ्गानिव केसरी ।

राजानं वशयेत्सद्यो देवानपि शमं नयेत् ॥ १३३
किमपरं फलं प्राप्य स्तवराजस्य कथ्यते ।
यद्यन्मनसि सङ्कल्पस्तवमेतदुदीरितम् ॥ १३४
तत्तत्प्राप्नोति देवेश बटुकस्य प्रसादतः ।
आपदां हि विनाशाय कारणं कान्तदुर्लभम् ॥ १३५
देवासुरराणे घोरे देवानामुपकारकम् ।
प्रकाशितं मया नाथ तन्त्रे भैरवदीपके ॥ १३६
अपुत्त्रो लभते पुत्त्रान् षण्मासे च निरन्तरम् ।
पठित्वा पाठयित्वाऽपि स्तवराजमुनुत्तमम् ॥ १३७
दरिद्रो लभते लक्ष्मीमायुःप्राप्तिमतिस्थिरम् ।
कन्यार्थी लभते कन्यां सर्वरूपसमन्विताम् ॥ १३८
प्रदोषे बलिदाने च वशयेदखिलं जगत् ।
वटे वा बिल्वमूले वा रम्भायां विपिने वने ॥
जपेत्सततमालक्ष्य मन्त्रराजस्य सिद्धये ।
वर्णलक्षं जपेद्वापि दिव्यात्रं हि प्रदर्शितम् ॥ १४०
पूजयेत्तु तिलैर्माषैर्दुग्धैर्माससैर्घृतैस्तथा ।

घृतपक्वान्नतो वापि व्यञ्जनै रससङ्कुलैः ॥ १४१
पूजयेद्वारयेद्वापि स्तवमेनं सुसाधकः ।
पठेद्वा पाठयेद्वापि यथाविधि सुरप्रिये ॥ १४२
शत्रुतो न भयं तेषां नाग्निचौराज्जलं भयम् ।
ज्वरादिसम्भवं चापि सत्यं सत्यं महेश्वरि ॥ १४३
भैरवाराधने शक्तो यो भवेत्साधकः प्रभो ।
सदाशिवः सविज्ञेयो भैरवेणेति भाषितम् ॥ १४४
श्रीमद्भैरवराजसेवनविधौ वैयाघ्रमासेदुषः
पुंसः पञ्चविधा भवन्ति नवधा ह्यष्टौ महासिद्धयः ।
क्ष्मापालकिरीटकोटिमणिरुड्ज्वालामरैर्भूयशो
मौद्गर्यंपादपयोजयोर्निवहते मूर्ध्नि प्रयास्यिच्यताम् ॥

इति भैरवतन्त्रे देवीहरसंवादे श्रीवटुकभैरवसहस्रनामस्तोत्रं
॥ सम्पूर्णम् ॥

॥ ॐ ॥

॥ बृहत्स्तोत्ररत्नाकरः ॥

॥ आदित्यहृदयम् ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपगम्याब्रवीद्राममगस्त्यो भगवानृषिः ॥ २
राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन्वत्स समरे विजयिष्यसि ॥ ३
आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्यमक्षय्यं परमं शुभम् ॥ ४
सर्वमङ्गळमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥ ५

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणान्लोकान्पाति गभस्तिभिः ॥ ७
एष ब्रह्मा च विष्णुश्च शिवस्स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमस्सोमो ह्यपांपतिः ॥ ८
पितरो वसवस्साध्या ह्यश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ॥ ९
आदित्यस्सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥ १०
हरिदश्वस्सहस्रार्चिस्सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनश्शम्भुस्त्वष्टा मार्तण्ड अंशुमान् ॥ ११
हिरण्यगर्भश्शिशिरस्तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रश्शङ्खश्शिशिरनाशनः ॥ १२
व्योमनाथस्तमोभेदी ऋग्यजुस्सामपारगः ।
धनवृष्टिरपांमित्रो विन्ध्यवीथी प्लवङ्गमः ॥ १३

आतपी मण्डली मृत्युः पिङ्गळस्सर्वतापनः ।
कविर्विश्वो महातेजा रक्तस्सर्वभवोद्भवः ॥ १४
नक्षत्रग्रहताराणामधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते ॥ १५
नमः पूर्वाय गिरये पश्चिमे गिरये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६
जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमस्सहस्रांशो आदित्याय नमो नमः ॥ १७
नम उग्राय वीराय सारङ्गाय नमो नमः ।
नमः पद्मप्रबोधाय मार्तण्डाय नमो नमः ॥ १८
ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९
तमोघ्नाय हिमघ्नाय शत्रुघ्नायाऽमितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २०
तप्तचामीकराभाय वह्नये विश्वकर्मणे ।
नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१

नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३
वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्वं एष रविः प्रभुः ॥ २४
एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन्पुरुषः कश्चिन्नावसीदति राघव ॥ २५
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६
अस्मिन्क्षणे महाबाहो रावणं त्वं वधिष्यसि ।
एवमुक्त्वा तदाऽगस्त्यो जगाम च यथागतम् ॥ २७
एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८
आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥ ३०

अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसङ्क्षयं विदित्वा
सुरगणमध्यगतो वचस्त्वरेति ॥ ३१

॥ इति श्रीमद्रामायणे आदित्यहृदयम् समाप्तम् ॥

॥ सूर्याष्टकम् ॥

साम्ब उवाच—

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥ १

सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम् ।
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥ २

लोहितं रथमारूढं सर्वलोकपितामहम् ।
महापापहरं देवं तं सूर्यं ... ॥ ३

त्रैगुण्यं च महाशूरं ब्रह्मविष्णुमहेश्वरम् ।
महापापहरं देवं तं सूर्यं ... ॥ ४

बृंहितं तेजः पुञ्जं च वायुमाकाशमेव च ।
प्रभुं च सर्वलोकानां तं सूर्यं ... ॥ ५

बन्धूकपुष्पसङ्काशं हारकुण्डलभूषितम् ।
एकचक्रधरं देवं तं सूर्यं ... ॥ ६

तं सूर्यं जगत्कर्तारं महातेजःप्रदीपनम् ।

महापापहरं देवं तं सूर्यं ... ॥ ७

तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् ।
महापापहरं देवं तं सूर्यं ... ॥ ८

सूर्याष्टकं पठेन्नित्यं ग्रहपीडाप्रणाशनम् ।
अपुत्रो लभते पुत्रं दरिद्रो धनवान्भवेत् ॥ ९

आमिषं मधुपानं च यः करोति रवेर्दिने ।
सप्तजन्म भवेद्रोगी जन्मजन्म दरिद्रता ॥ १०

स्त्रीतैलमधुमांसानि यस्त्यजेत्तु रवेर्दिने ।
न व्याधिः शोकदारिद्र्यं सूर्यलोकं स गच्छति ॥

॥ इति श्रीसूर्याष्टकस्तोत्रं सम्पूर्णम् ॥

॥ सूर्यार्यास्तोत्रम् ॥

शुकतुण्डच्छवि सवितुश्चण्डरुचेः पुण्डरीकवनबन्धोः।
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः ॥ १

यस्योदयास्तसमये सुरमकुटनिघृष्टचरणकमलोऽपि ।
कुरुतेऽञ्जलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः॥

उदयाचलतिलकाय प्रणतोऽस्मि विवस्वते ग्रहेशाय ।
अम्बरचूडामणये दिग्वनिताकर्णपूराय ॥ ३

जयति जनानन्दकरः करनिकरनिरस्ततिमिरसङ्घातः।
लोकालोकालोकः कमलारुणमण्डलः सूर्यः ॥ ४

प्रतिबोधितकमलवनः कृतघटनश्चक्रवाकमिथुनानाम्।
दर्शितसमस्तभुवनः परहितनिरतो रविस्सदा जयति॥

अपनयतु सकलकलिकृतमलपटलं सुप्रतप्तकनकाभः ।
अरविन्दबृन्दविघटनपटुतरकिरणोत्करः सविता ॥ ६

उदयाद्रिचारुचामरहरितहयखुरपरिहितरेणुराग ।
हरितहय हरितपरिकर गगनाङ्गनदीपक नमस्ते ॥ ७

उदितवति त्वयि विकसतिः
मुकुलीयति समस्तमस्तमितबिम्बे ।
नह्यन्यस्मिन्दिनकरसकलं कमलायते भुवनम् ॥ ८
जयति रविरुदयसमये बालातपः कनकसन्निभो यस्य।
कुसुमाञ्जलिरिव जलधौ तरन्ति रथसप्तयः सप्त ॥ ९
आर्याः साम्बपुरे सप्त आकाशात्पतिता भुवि ।
यस्य कण्ठे गृहे वापि न स लक्ष्म्या वियुज्यते ॥
आर्याः सप्त सदा यस्तु सप्तम्यां सप्तधा जपेत् ।
तस्य गेहं च देहं च पद्मा सत्यं न मुञ्चति ॥ ११
निधिरेष दरिद्राणां रोगिणां परमौषधम् ।
सिद्धिः सकलकार्याणां गाथेयं संस्मृता रवेः ॥ १२

॥ इति श्रीयाज्ञवल्क्यविरचितं सूर्यार्यास्तोत्रं सम्पूर्णम् ॥

॥ परमेश्वरस्तुतिः ॥

ऋषय उवाचः—

नमो विश्वावासते तुभ्यं कृतान्ताय त्रिशूलिने ।
विकटाय कराळाय करालवदनाय च ॥ १

अरूपाय सुरूपाय विश्वरूपायते नमः ।
कटङ्कटाय रुद्राय खाहाकाराय वैनमः ॥ २

सर्वप्रणतदेहाय स्वयं च प्रणतात्मने ।
नित्यं नीलशिखण्डाय श्रीकण्ठाय नमोनमः ॥ ३

नीलकण्ठाय देवाय चिताभस्मांगधारिणे ।
त्वं ब्रह्मा सर्वदेवानां रुद्राणां नीललोहितः ॥ ४

आत्माच सर्वभूतानां साङ्ख्यैः पुरुष उच्यते ।
पर्वतानां महामेरुर्नक्षत्राणाञ्च चन्द्रमाः ॥ ५

ऋषीणां च वसिष्ठस्त्वं देवानां वासवस्तथा ।
ओङ्कारस्सर्वदेवानां ज्येष्ठस्साम च सामसु ॥ ६

अरण्यानां पशूनां च सिंहस्त्वं परमेश्वरः ।
ग्राम्याणामृषभश्चासि भगवान् लोकपूजितः ॥ ७
सर्वथा वर्तमानोपि योयो भावो भविष्यति ।
त्वामेव तत्र पश्यामो ब्रह्मणा कथितं यथा ॥ ८
कामः क्रोधश्च लोभश्च विषादो मदएवच ।
एतदिच्छामहे बोद्धुं प्रसीद परमेश्वर ॥ ९
महासंहरणे प्राप्ते त्वया देव कृतात्मना ।
करं ललाटे संविध्य वह्निरुत्पादितस्त्वया ॥ १०
तेनाग्निना तदालोका अर्चिर्भिःसर्वतो वृताः ।
तस्मादग्निसमाख्येते बहवो विकृताग्नयः ॥ ११
कामः क्रोधश्च लोभश्च मोहो दम्भ उपद्रवः ।
यानि चान्यानि भूतानि स्थावराणि चराणि च ॥
दह्यन्ते प्राणिनस्ते तु त्वत्समुत्थेन वह्निना ।
अस्माकं दह्यमानानां त्राता भव सुरेश्वर ॥ १२
त्वं च लोकहितार्थाय भूतानि परिषिञ्चसि ।

महेश्वर महाभाग प्रभो शुभनिरीक्षक ॥ १४
आज्ञापय नयं नाथ कर्तारो वचनं तव ।
भूतकोटिसहस्रेषु रूपकोटिशतेषु च ॥ १५
अन्तं गन्तुं न शक्तास्म देवदेव नमोस्तु ते ॥

इति श्रीमद्वापुराणे लैङ्गे पूर्वभागे देवदारुवनस्थ मुनिकृता परमेश्वरस्तुतिर्नाम द्वात्रिंशोध्यायः ॥

॥ शिवस्तुतिः ॥

नमोस्तु ते भैरव भीममूर्ते त्रैलोक्यगोप्ते शितशूल-पाणे । कपालपाणे भुजगेशहार त्रिनेत्र मां पाहि विपन्नबुद्धिं ॥ १

जयस्व सर्वेश्वर विश्वमूर्ते सुरासुरैर्वन्दितपादपीठ। त्रैलोक्यमातर्गुरवे वृषाङ्क भीतश्शरण्यं शरणागतोस्मि॥

त्वं नाथ देवाशिवमीरयन्ति सिद्धा हरं स्थाणु-मर्मर्षिताश्च । भीमं च यक्षा मनुजा महेश्वरं भूतानि भूताधिपमुच्चरन्ति ॥ ३

निशाचरास्तूग्रमुपाचरन्ति भवेति पुण्याः पितरो नमस्ते । दासोस्मि तुभ्यं हर पाहि मह्यं पापक्षयं मे कुरु लोकनाथ ॥ ४

भवांघ्रिदेवघ्रियुगघ्रिधर्मा त्रिपुष्करश्चासि विभो त्रिनेत्र । त्रयारुणिस्त्वं श्रुतिरव्ययात्मा पुनीहि मां त्वां शरणं गतोऽस्मि ॥ ५

त्रिणाचिकेतस्त्रिपदप्रतिष्ठष्त्रयङ्गवित् स्त्रीविषये-
ष्वलुब्धः । त्रैलोक्यनाथोसि पुनीहि शम्भो दासोऽस्मि
भीतश्शरणागतस्ते ॥ ६

कृतो महाशङ्कर तेऽपराधो मया महाभूतपते
गिरीश। कामारिणा निर्जितमानसेन प्रसादयेत्वां शिर-
सा नतोऽस्मि ॥ ७

पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां देवदेवेश सर्वपापहरो भव ॥ ८
मम दैवापराधोऽस्ति त्वयावै तादृशोऽप्यहम् ।
स्पृष्टः पापसमाचारो मां प्रसन्नो भवेश्वर ॥ ९
त्वं कर्ता चैव धाता च जय त्वं च महाजय ।
त्वं मङ्गल्यस्त्वमोङ्कारस्त्वमोङ्कारो व्ययोधृतः ॥ १०
त्वं ब्रह्मसृष्टिकृन्नाथस्त्वं विष्णुस्त्वं महेश्वरः ।
त्वमिन्द्रस्त्वं वषट्कारो धर्मस्त्वं तु हितोत्तम ॥ ११
सूक्ष्मस्त्वं व्यक्तरूपस्त्वं त्वमव्यक्तश्च धीवरः ।
त्वया सर्वमिदं व्याप्तं जगत् स्थावरजङ्गमम् ॥ १२

त्वमादिरन्तो मध्यं च त्वमेवच सहस्रपात्।
विजयस्त्वं सहस्राक्षो चित्तपाख्यो महाभुजः ॥ १३
अनन्तस्सर्वगो व्यापी हंसः पुण्याधिकोऽच्यतः।
गीर्वाणपतिरव्ययो रुद्रः पशुपतिश्शिवः ॥ १४
त्रैविद्यस्त्वं जितक्रोधो जितारातिर्जितेन्द्रियः।
जयश्च शूलपाणिस्त्वं पाहि मां शरणागतम् ॥ १५

॥ इति श्रीवामनपुराणान्तर्गता अन्धककृता शिवस्तुतिः ॥

॥ अष्टमूर्त्यष्टकम् ॥

तुष्टावाष्टतनुं हृष्टः प्रफुल्लनयनाञ्चलः ।
मौळावञ्जलिमाधाय वदन् जयजयेतिच ॥ १

भार्गव उवाचः—

त्वं भाभिराभिरभिभूय तमस्समस्तमस्तं नयस्यभिमतं च निशाचराणाम् । देदीप्यसे दिनमणे गगनेहिताय लोकत्रयस्य जगदीश्वर तन्नमस्ते ॥ २

लोकेतिवेलमतिवेल महामहोभिर्निर्मासि कौमुदमुदं च समुत्समुद्रम् । विद्रावितासिलतमास्सुतमोहिमांशो पीयूषपूरपरिपूरित तन्नमस्ते ॥ ३

त्वं पावने पथि सदागतिरप्युपास्यः कस्त्वां विना भुवनजीवन जीवतीह । स्तब्धप्रभञ्जन विवर्धित सर्वजन्तो सन्तोषिताहिकुल सर्वग तन्नमस्ते ॥ ४

विश्वैकपावक नतावक पावकैक शक्तेरृते व्रतबतामृतदिव्यकार्यम् । प्राणित्यदो जगदहो जगदन्तरात्मन् तत्पावक प्रतिपदं शमदं नमस्ते ॥ ५

पानीयरूप परमेश जगत्पवित्र चित्रं विचित्र सुचरित्र करोषि नूनम् । विश्वं पवित्रममलं किल

विश्वनाथ पानावगाहनत एतदतो नतोऽस्मि ॥ ६

आकाशरूप बहिरन्तरितावकाश दानाद्विकस्वर महेश्वर विश्वमेतत् । त्वत्तस्सदा सदय संश्वसिति स्वभावात्संकोचमेति भवतोस्मि नतस्ततस्त्वाम् ॥ ७

विश्वम्भरात्मक बिभर्ति विभोत्र विश्वं कोविश्वनाथ भवतोन्यतमस्तमोरे । तस्त्वां विना नशमिनाहि फणाहिभूष स्तव्यो परः परतर प्रणतस्ततस्त्वाम् ॥८

आत्मस्वरूप तव रूपपरम्पराभिराभिस्ततं हर चराचररूपमेतत् । सर्वान्तरात्मनिलय प्रतिरूपरूप-नित्यं नतोऽस्मि परमात्मतनोऽष्टमूर्ते ॥ ९

इत्यष्टमूर्तिभिरिमाभिरुमाभिनन्द्य वन्द्यातिवन्द्य तव विश्वजनीनमूर्ते । एवत्ततं नु विततं प्रणतप्रणीत सर्वार्थसार्थपरमार्थतनो नतोऽस्मि ॥ १०

अष्टमूर्त्यष्टकेनेष्टं परिष्टुत्येति भार्गवः ।
भर्गं भूमिमिळन्मौळिः प्रणनाम पुनः पुनः ॥११

॥ इति श्रीशुक्राचार्यकृतं अष्टमूर्त्यष्टकम् ॥

॥ ताण्डवाष्टकम् ॥

सदञ्चितमुदञ्चितनिकुञ्चितपदं झलझलञ्चलित मञ्जुकटकं पतञ्जलिदृगञ्जनमनञ्जनमचञ्चलपदं जनन-भञ्जनकरम् । कदम्बरुचिमम्बरवसं परममम्बुद-कदम्बकविडङ्गगळं चिदम्बुधिमणिं बुधहृदम्बुजरविं परचिदम्बरनटं हृदि भज ॥ १

हरं त्रिपुरभञ्जनमनन्तकृतकङ्कणमखण्डदयमन्त-रहितं विरिञ्चसुरसंहति पुरन्दरविचिन्तितपदं तरुण-चन्द्रमकुटम् । परम्पदविखंडितयमं भसितमण्डित-तनुं मदनवञ्चनपरं चिरन्तनमिमं प्रणतसञ्चितनिधिं परचिदम्बरनटं हृदि भज ॥ २

अवन्तमखिलं जगदभङ्ग गुणतुङ्ग ममतं धृतविधुं सुरसरित्तरङ्गनिकुरुम्बधृतिलम्पटजटं शमनडम्बरहरं भवहरम् । शिवं दशदिगन्तरविजृम्भितकरं करल-सन्मृगशिशुं पशुपतिं हरं शशि धनञ्जय पतङ्गनयनं परचिदम्बरनटं हृदि भज ॥ ३

अनन्तनवरत्नविलसत्कटकिङ्किणि झलं झलझलं झलरवं मुकुन्दविधिहस्तगतमद्दलध्वनिधिमि - द्धिमितनर्तनपदम् । शकुन्तरथबर्हिरथनन्दिमुखदन्ति-मुखभृङ्गिरिटिसङ्गनिकटं सनन्द सनक प्रमुखवन्दित-पदं परचिदम्बरनटं हृदि भज ॥ ४

अनन्तमहसं त्रिदशवन्द्यचरणं मुनिहृदन्तरवसन्त-ममलं कवन्ध वियदम्बवनिगन्धवह वह्निमख बन्धु-रवि मञ्जुवपुषम् । अनन्तविभवं त्रिजगदन्तरमणिं त्रिनयनं त्रिपुरखण्डनपरं सनन्द मुनिवन्दितपदं सक-रुणं परचिदम्बरनटं हृदि भज ॥ ५

अचिन्त्यमलिबृन्दरुचिबन्धुरगलं कुरितकुन्दनिकु-रुम्बधवलं मुकुन्दसुरबृन्दवलहन्तृकृतवन्दनल - सन्तमहिकुण्डलधरम् । अकम्पमनुकम्पितरतिं सुजन-मङ्गलनिधिं गजहरं पशुपतिं धनञ्जयनुतं प्रणत-रञ्जनपरं परचिदम्बरनटं हृदि भज ॥ ६

परं सुरवरं पुरहरं पशुपतिं जनितदन्तिमुख षन्मुखममुं मृडं कनकपिङ्गलजटं सनकपङ्कजरविं सुमनसं हिमरुचिं । असङ्गमनसज्वलधिजन्मगरलं कबळयन्तमतुलं गुणनिधिं सनन्दवरदं शमित-मिन्दुवदनं परचिदम्बरनटं हृदि भज ॥ ७

अजं क्षितिरथं भुजगपुङ्गवगुणं कनकशैलधनुषं करलसत्कुरङ्ग पृथुटङ्क परसुरुचि कुङ्कुमरुचिं डमरुकं च दधतम् । मुकुन्दविशिखं नमदवन्ध्यफलदं निगम-बृन्दतुरगं निरुपमं स चण्डिकममुं झडिति संहृतपुरं परचिदम्बरनटं हृदि भज ॥ ८

अनङ्गपरिपन्थिनमजं क्षितिधुरन्धरमलङ्करुण-यन्तमखिलं ज्वलन्तमनलं दधतमन्तकरिपुं सतत-मिन्द्रसुरवन्दितपदम् । उदञ्चदरविन्दकुलबन्धुशत-बिम्बरुचिसंहृतिसुगन्धिवपुषं पतञ्जलिसुतं प्रणव-पञ्जरशुकं परचिदम्बरनटं हृदि भज ॥ ९

इति स्तवमुं भुजगपुङ्गवकृतं प्रतिदिनं पठति यः कृतमुखस्सदा प्रभुपद द्वितय दर्शनपदं सुलळितं चरण भृङ्गरहितम्। सरः प्रभवसम्भवं हरित्पति हरिप्रमुख-दिव्यनुत शङ्करपदं स गच्छति परं नतु जनुर्जलनिधिं परमदुःखजनकं दुरितदम् ॥ १०

॥ इति श्रीपतञ्जलिकृतं ताण्डवाष्टकम् ॥

॥ अर्धनारीश्वराष्टोत्तरशतनामस्तोत्रम् ॥



चामुण्डीकाम्बा श्रीकण्ठः पार्वती परमेश्वरः ।
महाराज्ञी महादेवस्सदाराध्या सदाशिवः ॥ १
शिवार्धाङ्गी शिवार्धाङ्गो भैरवी कालभैरवः ।
शक्तित्रितयरूपाढ्या मूर्तित्रितयरूपवान् ॥ २
कामकोटिसुपीठस्था काशीक्षेत्रसमाश्रयः ।
दाक्षायणी दक्षवैरी शूलिनी शूलधारकः ॥ ३
ह्रीङ्कारपञ्जरशुकी हरिशङ्कररूपवान् ।
श्रीमद्गणेशजननी षडानन सुजन्मभूः ॥ ४
पञ्चप्रेतासनारूढा पञ्चब्रह्मस्वरूपभृत् ।
चण्डमुण्डशिरश्छेत्री जलन्धरशिरोहरः ॥ ५
सिंहवाहा वृषारूढश्श्यमाभा स्फटिकप्रभः ।
महिषासुरसंहर्त्री गजासुरविमर्दनः ॥ ६
महाबलाऽचलावासा महाकैलासवासभूः ।
भद्रीकाळी वीरभद्रो मीनाक्षी सुन्दरेश्वरः ॥ ७

भण्डासुरादिसंहर्त्री दुष्टान्धकविमर्दनः ।
मधुकैटभसंहर्त्री मधुरापुरनायकः ॥ ८
कालत्रयस्वरूपाढ्या कार्यत्रयविधायकः ।
गिरिजाता गिरीशश्च वैष्णवी विष्णुवल्लभः ॥ ९
विशालाक्षी विश्वनाथः पुष्पास्त्रा विष्णुमार्गणः ।
कौसुम्भवसनोपेता व्याघ्रचर्माम्बरावृतः ॥ १०
मूलप्रकृतिरूपाढ्यापरब्रह्मस्वरूपवान् ।
रुण्डमालाविभूषाढ्या लसद्रुद्राक्षमालिकः ॥ ११
मनोरूपेक्षुकोदण्डा महामेरुधनुर्धरः ।
चन्द्रचूडा चन्द्रमौलिर्महामाया महेश्वरः ॥ १२
महाकाळी महाकालो दिव्यरूपा दिगम्बरः ।
बिन्दुपीठसुखासीना श्रीमदोङ्कारपीठगः ॥ १३
हरिद्रा कुङ्कुमालिप्ता भस्मोद्धूलितविग्रहः ।
महापद्माटवीलोला महाबिल्वाटवीप्रियः ॥ १४
सुधामयी विषधरो मातङ्गी मकुटेश्वरः ।
वेदवेद्या वेदवाजी चक्रेशी विष्णुचक्रदः ॥ १५

जगन्मयी जगद्रूपो मृडाणी मृत्युनाशनः ।
रामार्चितपदाम्भोजा कृष्णपुत्रवरप्रदः ॥ १६
रमावाणी सुसंसेव्या विष्णुब्रह्मसुसेवितः ।
सूर्यचन्द्राग्निनयना तेजस्त्रयविलोचनः ॥ १७
चिदग्निकुण्डसम्भूता महालिङ्गसमुद्भवः ।
कम्बुकण्ठी कालकण्ठो वज्रेशी वज्रिपूजितः ॥ १८
त्रिकण्टकी त्रिभङ्गीशः भस्मरक्षा स्मरान्तकः ।
हयग्रीववरोद्धात्री मार्कण्डेयवरप्रदः ॥ १९
चिन्तामणिगृहावासा मन्दराचलमन्दिरः ।
विन्ध्याचलकृतावासा विन्ध्यशैलार्चपूजितः ॥ २०
मनोन्मनी लिङ्गरूपो जगदम्बा जगत्पिता ।
योगनिद्रा योगगम्यो भवानी भवमूर्तिमान् ॥ २१
श्रीचक्रात्मरथारूढा धरणीधरसंस्थितः ।
श्रीविद्यावेद्यमहिमा निगमागमसंश्रयः ॥ २२
दशशीर्षसमायुक्ता पञ्चविंशति शीर्षवान् ।
अष्टादशभुजायुक्ता पञ्चाशत्करमण्डितः ॥ २३

ब्राह्म्यादि मातृकारूपा शताष्टेका दशात्मवान् ।
स्थिरा स्थाणुस्तथा बाला सद्योजात उमा मृडः ॥
शिवा शिवश्च रुद्राणी रुद्रश्चैवेश्वरीश्वरः ।
कदम्बकाननावासा दारुकारण्यलोलुपः ॥ २५
नवाक्षरीमनुस्तुत्या पञ्चाक्षरमनुप्रियः ।
नवावरणसम्पूज्या पञ्चायतनपूजितः ॥ २६
देहस्थषट्चक्रदेवी दहराकाशमध्यगः ।
योगिनी गणसंसेव्या भृग्वादिप्रमथावृतः ॥ २७
उग्रताराघोररूपश्शर्वाणी शर्वमूर्तिमान् ।
नागवेणी नागभूषो मन्त्रिणी मन्त्रदैवतः ॥ २८
ज्वलज्जिह्वा ज्वलन्नेत्रो दण्डनाथा दृगायुधः ।
पार्थाङ्गनास्त्रसन्दात्री पार्थपाशुपतास्त्रदः ॥ २९
पुष्पवच्चक्रताटङ्का फणिराजमुकुण्डलः ।
बाणपुत्री वरोद्धात्री बाणासुरवरप्रदः ॥ ३०
व्यालकञ्चुकसंवीता व्यालयज्ञोपवीतवान् ।
नवलावण्यरूपाढ्या नवयौवनविग्रहः ॥ ३१

नाट्यप्रिया नाट्यमूर्तिर्नित्यसन्ध्या त्रिपुरान्तकः ।
तन्त्रोपचारसुप्रीता तन्त्रादिविधायकः ॥ ३२
नवचक्रेष्टवरदा नववीरसुजन्मभूः ।
भ्रमरेश्या वासुकिश्यो भैरुण्डा भीमपूजितः ॥ ३३
निशुम्भशुम्भमदनी नीचापस्मारमर्दनः ।
सहस्राराम्बुजारूढा सहस्रकमलार्चितः ॥ ३४
गङ्गासहोदरी गङ्गाधरो गौरी त्रियम्बकः ।
श्रीशैलभ्रमराम्बाख्या मल्लिकार्जुनपूजितः ॥ ३५
भवतापप्रशमनी भवरोगनिवारकः ।
चन्द्रमण्डलमध्यस्था मुनिमानसहंसकः ॥ ३६
प्रत्यङ्गिरा प्रसन्नात्मा कामेशी कामरूपवान् ।
स्वयम्प्रभा स्वप्रकाशः कालरात्री कृतान्तहृत् ॥ ३७
सदान्नपूर्णा भिक्षाटो वनदुर्गा वसुप्रदः ।
सर्वचैतन्यरूपाढ्या सच्चिदानन्दविग्रहः ॥ ३८
सर्वमङ्गलरूपाढ्या सर्वकल्याणदायकः ।

राजराजेश्वरी श्रीमद्राजराज प्रियङ्करः ॥ ३९

अर्धनारीश्वरस्येदं नाम्नामष्टोत्तरं शतम् ।
पठन्नर्चन्सदा भक्त्या सर्वसाम्राज्यमाप्नुयात् ॥ ४०

इति श्रीस्कान्दे अर्धनारीश्वराष्टोत्तरशतनामस्तोत्रम् ॥

॥ काश्यष्टकम् ॥

स्वर्गतस्सुखकरी दिवौकसां शैलराजतनयाविवल्लभा।
डिण्डिभैरवविदारितविघ्ना विश्वनाथनगरी गरीयसी ॥
यत्र देहपतनेन देहिनां मुक्तिरेव भवतीति निश्चितम्।
पूर्वपुण्यनिचयेन लभ्यते विश्वनाथनगरी गरीयसी ॥
सर्वदाऽमरगणैश्च वन्दिता या गजेन्द्रमुखवारितविघ्ना।
कालभैरव कृतैकशासना विश्वनाथनगरी गरीयसी ॥

यत्र तीर्थममला मणिकर्णिका
यासदाशिवसुखप्रदायिनी ।
या शिवेन रचिता निजायुधैः
विश्वनाथनगरी गरीयसी ॥ ४

सर्वतीर्थकृतमज्जनपुण्यै-
र्जन्म जन्मसुकृतैः खलु लभ्या ।
प्राप्यते भवभवार्तिनाशिनी
विश्वनाथनगरी गरीयसी ॥ ५

यत्र शक्रनगरी तनीयसी यत्र धातृनगरी कनीयसी ॥
यत्र केशवपुरी लघीयसी विश्वनाथनगरी गरीयसी॥
यत्र देवतटिनी प्रथीयसी यत्र विश्वजननी पटीयसी।
यत्र भैरवकृतिर्बलीयसी विश्वनाथनगरी गरीयसी ॥

विश्वनाथनगरीस्तवं शुभं यः पठेत् प्रयतमानसस्सदा। पुत्रदारगृहलाभमव्ययं मुक्तिमार्गमनघं लभेत्सदा ॥

॥ इति श्रीवेदव्यासविरचितकाश्यष्टकम् ॥

॥ शिवस्तुतिः ॥

गले कलितकालिमः प्रकटितेन्दु फालस्थले विनाटितजटोत्करं रुचिरपाणिपाथोरुहे, उदञ्चितकपालजं जघनसीम्नि सन्दर्शितद्विपाजिनमनुक्षणं किमपि धाम वन्दामहे ॥ १

वृषोपरि परिस्फुरद्धवलदाम धामश्रिया कुबेरगिरिगौरिमप्रभवगर्वनिर्वासि तत् । क्वचित्पुनरुमाकुचोपचितकुङ्कुमैरङ्कितं गजाजिनविराजितं वृजिनभङ्गबीजं भजे ॥

उदित्वरविलोचनत्रयविसृत्वरज्योतिषा कलाकरकलाकरव्यतिकरेण चाहर्निशम् । विकासितजटाटवीविहरणोत्सवप्रोल्लसत्तरामरतरङ्गिणीतरलचूडमीडे मृडम् ॥

विहाय कमलालयाविलसितानि विद्युन्नटीविडम्बनपटूनि मे विहरणं विधत्तां मनः । कपर्दिनि

कुमुदृतीरमणखण्डचूडामणौ कटीतटपटीभवत्करटि-चर्मणि ब्रह्मणि ॥ ४

भवद्भुवनदेहलीविकटतुण्डदण्डाहतिव्रुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते । व्रजेम भवदन्तिकं प्रकृतिमेत्य पैशाचकीं किमित्यमरसम्पदः प्रमथनाथ नाथामहे ॥ ५

त्वदर्चनपरायणप्रमथकन्यकालुण्ठितप्रसून सफलद्रुमं कमपि शैलमाशास्महे । अलं तटवितर्दिकाशयितसिद्धसीमन्तिनीप्रकीर्णसुमनोमनोरमणमेरुणामेरुणा ॥ ६

न जातु हर यातु मे विषयदुर्विलासं मनो मनोभवकथास्तु मे न च मनोरथातिथ्यभूः । स्फुरत्सुरतरङ्गिणीतटकुटीरकोटौ वसन्नये शिव दिवानिशं तव भवानि पूजापरः ॥ ७

विभूषणसुरापगाशुचितरालवालावळीवलद्वृहल-सीकरप्रकरसेकसंवर्धिता । महेश्वरसुरद्रुमस्फुरित-

सज्जटामञ्जरीनमज्जनफलप्रदा मम नु हन्त भूयादियम्॥

बहिर्विषयसङ्गतिप्रतिनिवर्तिताश्चावलेस्समाधि - कलितात्मनः पशुपतेरशेषात्मनः । शिरस्सुरसरित्तटी कुटिलकल्पकल्पद्रुमं निशाकरकळामहं वटुविमृज्य-माणां भजे ॥ ९

त्वदीयसुरवाहिनीविमलवारिधारावलज्जटा - गहनगाहिनी मतिरियं मम क्रामतु । सुरोत्तमसरि-त्तटीविटपितावटीप्रोल्लसत्तपस्विपरिषत्तुलाममलमल्लि - काभ प्रभो ॥ १०

॥ इति श्रीलङ्केश्वरविरचिता शिवस्तुतिः ॥

॥ श्रीशिवरक्षास्तोत्रम् ॥

ओं अस्य श्रीशिवरक्षास्तोत्रमहामन्त्रस्य - याज्ञ - वल्क्यऋषिः - श्री सदाशिवो देवता - अनुष्टुप् छन्दः - श्री सदाशिवप्रीत्यर्थे श्री शिवरक्षास्तोत्रजपे विनियोगः ॥

चरितं देवदेवस्य महादेवस्य पावनम् ।
अपारं परमोदारं चतुर्वर्गस्य साधनम् ॥ १

गौरीविनायकोपेतं पञ्चवक्त्रं त्रिनेत्रकम् ।
शिवं ध्यात्वा दशभुजं शिवरक्षां पठेन्नरः ॥ २

गङ्गाधरशिरः पातु फालमर्धेन्दुशेखरः ।
नयने मदनध्वंसी कर्णौ सर्पविभूषणः ॥ ३

घ्राणं पातु पुरारातिर्मुखं पातु जगत्पतिः ।
जिह्वां वागीश्वरः पातु कन्धरां शशिकन्धरः ॥ ४

श्रीकण्ठः पातु मे कण्ठं स्कन्धौ विश्वधुरन्धरः ।
भुजौ भूभारसंहर्ता करौ पातु पिनाकधृत् ॥ ५

हृदयं शङ्करः पातु जठरं गिरिजापतिः ।
नाभिं मृत्युञ्जयः पातु कटिं व्याघ्राजिनाम्बरः ॥ ६
सक्थिनी पातु दीनार्तः शरणागतवत्सलः ।
ऊरू महेश्वरः पातु जानुनी जगदीश्वरः ॥ ७
जङ्घे पातु जगत्कर्ता गुल्फौ पातु गणाधिपः ।
चरणौ करुणासिन्धुः सर्वाङ्गानि सदाशिवः ॥ ८
एतां शिवबलोपेतां रक्षां यस्सुकृती पठेत् ।
स भुक्त्वा सकलान्कामान् शिवसायुज्यमाप्नुयात् ॥
ग्रहभूतपिशाचाद्यास्त्रैलोक्ये विचरन्ति ये ।
दूरादाशु पलायन्ते शिवनामाभिरक्षणात् ॥ १०
अभयङ्करनामेदं कवचं पार्वतीपतेः ।
भक्त्या बिभर्ति यः कण्ठे तस्य वश्यं जगत्त्रयम् ॥
इमां नारायणस्स्वप्ने शिवरक्षां यथादिशत् ।
प्रातरुत्थाय योगीन्द्रो याज्ञवल्क्यस्तथालिखत् ॥

॥ इति श्रीयाज्ञवल्क्यप्रोक्तं श्रीशिवरक्षास्तोत्रम् ॥

॥ शिवशङ्कराष्टकम् ॥

अतिभीषण कटुभाषण यमकिङ्करपटलीकृतता-
डनपरिपीडनमरणागमसमये। त्वमया सह मम चेतसि
यमशासननिवसं शिवशङ्कर शिव शङ्कर हर मे
हर दुरितम् ॥ १

असदिन्द्रियविषयोदयसुखसात्कृतसुकृतेः पर
दूषण परितोषण कृतपातकविकृतेः। परमालय परि-
पालय परितापन मिति मां शिवशङ्कर शिवशङ्कर
हर मे हर दुरितम् ॥ २

विषयाभिध बडिशायुध पिशितायुतसुभगं मसि-
कायुतमतिसन्ततिमरुभूमिषु निरतम् । मृड मामव
सुगतेरव शिवया सह कृपया शिवशङ्कर शिवशङ्कर
हर मे हर दुरितम् ॥ ३

दयितामव दुहितामव जननीमव जनकं मम
कल्पितमतिसन्तति मरुभूमिषु निरतम्। जनिता-

मुखवनितासक्त वसतिं कुरु सुमतिं शिवशङ्कर शिव-
शङ्कर हर मे हर दुरितम् ॥ ४

जननाशन मृतिमोचन शिवपूजन निरतैरभितो-
कृशमितयेदृशमहमाहरमिवहम् । गजकच्छपजनित-
श्रममुरलीकुरसुमतिं शिवशङ्कर शिवशङ्कर हर मे
दुरितम् ॥ ५

त्वयि तिष्ठति सकलस्थितिपरमात्मनि हृदये
वसुमार्गणकृपणेक्षण मनसा शिव विमुखम् । अकृ-
ताह्निकमनुपोषक मवतादिरिसुतया शिवशङ्कर शिव-
शङ्कर हर मे हर दुरितम् ॥ ६

पितराविति नु कदाविति युतयोकृत हृदये शिव-
योः पदमभियाह्युरु पणसत्तव सुकृतेः । इति मे
शिव हृदयं भवदात्ततरयया शिवशङ्कर शिवशङ्कर
हर मे हर दुरितम् ॥ ७

शरणागत भरणाहत करुणामृतजलधे शरणं तव
चरणं शिवभव संसृतिवसवे । वर चिन्मय जगदा-

मयभिषगानतमवतात् शिवशङ्कर शिवशङ्कर हर मे हर दुरितम् ॥ ८

त्रिपुरान्तक त्रिदशेश्वरगणनायक शिव ते शरणं भव कृतसागरफणिकङ्कणचरणम् । वृषवाहन विष-दूषण पतितोद्धर शरणं शिवशङ्कर शिवशङ्कर हर मे दुरितम् ॥ ९

शशिशेखर शिवदायक हरिशायक गिरिजाप्रिय-नायक गजकन्धर गजदानवहरण । कनकासनकन-काम्बरविनाशन शरणं शिवशङ्कर शिवशङ्कर हर मे हर दुरितम् ॥ १०

विजितेन्द्रिय विबुधार्चित विमलाम्बुजचरण भव-नाशन भयनाशन भजिताङ्कितहृदय । फणिभूषण मुनिपोषण मदनान्तक शरणं शिवशङ्कर शिवशङ्कर हर मे हर दुरितम् ॥ ११

॥ इति श्री शिवशङ्कराष्टकम् ॥

" मार्कण्डेयशिवाष्टकम् ॥

सदा गोदावर्यास्तटनिकटवासं पशुपतिं वदान्यं सर्वेशं वरदमखलार्थैकघटनम् । शिवं गौरीनाथं शशिधरमनन्तार्चितपदं भजे मार्कण्डेयं भसितनिटलं मव्यनटनम् ॥ १

सदा कैलासाद्रिस्थपदमनघं सर्वजगतां प्रभुं श्रीविश्वेशं प्रकटितपरंधाम सरयम् । नटेशं गौरीशं ललितरविचन्द्रानलदृशं भजे ... ॥ २

महादेवं सर्वं मधुरिपुसखं मङ्गळकरं परेशम्भुं साम्बं पुरमथनमीशं भवहरम् । स्मरारिं सर्वज्ञं स्मरहरमनादिं मृगधरं भजे ... ॥ ३

प्रदोषेषु स्वान्तं प्रबलतरतौर्यत्रिककृतं त्रयत्रिंशत्कोटित्रिंशदप्रवरैः संपरिवृतम्। रमावाणीन्द्र श्रीपति विधिकृतोल्लास्यकरणं भजे ... ॥ ४

भवानीहृत्पद्मारुणमहिनि नीलोत्पलगलं सह-
स्रारे पद्मानिशमविवसन्तं सुरगुरुम् । स्तुतिभ्यो
भक्तानां निखिल सुखदं सुस्थिरपदं भजे ... ॥ ५

शिवस्त्वं विष्णुस्त्वं सकलभुवनस्त्वं रविशशी
नभस्त्वं कायस्त्वं सकलजगदात्मा त्वमसि भो ।
यतिर्देयं सान्ते सुखतमखिलं जैमिनिवरैः भजे ॥ ६

सदोचैराह्वानं हरहरहरेति प्रवचसा सदा भक्त्या-
नन्दो शिवशिव शिवेति स्वमनसा । स्तुतिं वारं
वारं भवभवभवेति प्रतिभया भजे ... ॥ ७

यमाहूतं भीतं मुनिवरनुतं पाशनिहतिं भवन्तं
सद्भक्त्या हृदि शिशुमवन्तं करुणया । शरण्यं भक्ता-
नां परमगतिमीशं परशिवं भजे मार्कण्डेयम् ॥ ८

श्रीकोलाचलसद्गंशवारिधेस्तु सुधाकरः ।
यज्ञेशो भूसुरश्चक्रे मार्कण्डेयशिवाष्टकम् ॥ ९

॥ इति श्रीमार्कण्डेय शिवाष्टकम् ॥

॥ श्रीमहानन्दीश्वरभुजङ्गस्तोत्रम् ॥

किरीटेन्दुगङ्गामनोज्ञोत्तमाङ्गं ललाटेक्षणात्पुष्प-
देहानुषङ्गं । तुषाराद्रिकन्या ससङ्गं सदऽहं नमाम्यन्त-
रङ्गं महानन्दिलिङ्गम् ॥ १

दिगीशादिदिग्भित्तिसन्नाट्यलिङ्गं लसत्कुम्भि-
चर्माम्बरच्छादिताङ्गम् । जगन्मातृगौरी मुखाम्भोज
भृङ्गं नमा ॥ २

चतुर्वेदवेद्यं महावेदवाद्यं नमद्भक्तहृद्यं मुरारि-
प्रसाध्यम् । गुरुब्रह्मभूतं चिदानन्दरूपं नमा ॥ ३

पुराकाशिकापट्टणप्राङ्गणान्ते नवस्वर्णदीभूतभूत्कृष्ट
रान्ते । हरिब्रह्ममूर्धाभिषिक्तं विदेहं नमा ... ॥ ४

सुहृत्पुत्रसम्पन्मुखाद्युन्मुखादिं विहायरिवर्गै महा-
सेव्यकायम् । जटाजूटमध्यप्रदेशप्रगङ्गं महीभृद्वराङ्गं
महानन्दिलिङ्गम् ॥ ५

चतुर्द्वारदौवारिकौदार्यमाणं नमन्हृद्यगन्धर्वगीता-
नुरक्तं । सुनाट्यं प्रकुर्वाणमीशं सुरेशं नमा ... ॥

॥ इति श्रीमहानन्दीश्वर भुजङ्गस्तोत्रम् ॥

॥ चन्द्रमौळीश्वर भुजङ्गस्तोत्रम् ॥



सदामुदाय दिव्यमानसे सरोरुहान्तरे विहारणेषु सञ्चयं विदारिणे चिदात्मने । निरस्ततोय तोयमञ्जि-कायकायशालिने नमश्शिवाय साम्ब शङ्कराय चन्द्रमौळये ॥ १

नमो नमोष्टमूर्तये नमो समानकीर्तये नमो नमो महात्मने नमश्शुभप्रदायिने । नमो दयार्द्रसेतवे नमोस्तु कृत्तिवाससे नम ... ॥ २

पितामहाद्यवेद्यकस्वभावके ममायते समस्तदेवता समप्रपूजिताङ्घ्रिचर्चिते । भवाय शक्ररत्नसद्गुणप्रभाव-शालिने नम ... ॥ ३

शिवोहमस्मि भावयन् शिवं शिवेन रक्षस शिवस्वपूर्णवर्चस स्वमर्चसे पदद्वयम् । शिवत्परं न विद्यते शिवे जगत्प्रवर्तने नम ... ॥ ४

कपर्दिनेऽर्कचन्द्रमः कृपीटयोनिसन्दृशे तपोधना-

प्रणीमनस्सरोजसत्यवासिने । फणाफणिच्छविज्व-
लद्भुजङ्गभूषणाञ्चिते नम ... ॥ ५

शिवाननारविन्दसन्मिलिन्दभाविभासिने विनोदिने
दिनेशकोटिदिक्प्रभाकृतायिने । स्वसीदसाम्ब सादर-
मवलोकनैकवर्तिने नम ... ॥ ६

जटातटीलुठद्वयद्धुनीगलं गलध्वनिद्धगर्जितोप्र-
बुद्धि सम्भ्रमभ्रमच्छिखण्डिने। विखण्डितारिमण्डल-
प्रचण्डगो खिशूलिने नम ... ॥ ७

अखर्वगर्वदुर्विजृम्भकुम्भिदम्भदानवं जितेनतद्वन-
ञ्जिनाकचारिणे विहारिणे । सुरक्तसुदृक्षु हृच्छयाप-
हरिणे विदारिणे नम ... ॥ ८

अखण्डिताण्डबाहुदण्डदन्नितोप्रदिन्धिमप्रदि -
न्धिमिद्धिमि ध्वनि प्रमोदितोप्रताण्डवम् । विधा -
यिने घनाधिनाथ साधुसख्यदायिने नम ... ॥ ९

प्रहृष्टरुष्टदुष्टपुष्ट दिष्टविष्टपायसं नमद्विशिष्ट भक्त-

चिष्टङ्कीर्तयेष्टमूर्तये । यथेष्टदष्टशैलजाधरोष्टपल्लवाय ते सदानम .... ॥ १०

हराय वा हराय वाजनन्दिनन्दिने विनोदिने सनातनाय भूतनायरायते । यतीश्वरेश्वराय शाश्वताय विश्वरूपिणे नम ... ॥ ११

भवाय दिव्यवैभवाय नायनाग्निहृष्टहृद्भवाय भूरि भूमभृद्धनुर्धराय वर्धिने । समृद्धिरुद्धिमृद्धनुप्रमृद्ध-वन्दिताय ते नम ... ॥ १२

मरन्दतुन्दिलारविन्दसुन्दरस्मिताननोन्मिळिन्द - बृन्द बालनीलजालशैलकुन्तलां । कलाकलापशालिने शिवामपेक्षतोषणे नम ... ॥ १३

इति श्रीमच्छङ्करानन्दाचार्यविरचितं
श्रीचन्द्रमौळीश्वरभुजङ्गस्तोत्रम् ॥

॥ गङ्गाधरस्तोत्रम् ॥

श्रीराम्भोनिधिमन्थनोद्भवविषात्सन्दह्यमानान् - सुरान् ब्रह्मादीनवलोक्य यः करुणया हालाहलाख्यं विषम् । निश्शङ्कं निजलीलया कवळयन्लोकान्ररक्षा-दरादार्तत्राणपरायण स्सभगवान् गङ्गाधरो मेगतिः॥ १

क्षीरं स्वादु निपीय मातुलगृहेभुक्त्वा स्वकीयं गृहं श्रीसलाभवशेन खिन्नमनसेघोरं तपः कुर्वते । कारुण्यादुपमन्यवेनिरवधिं श्रीरांबुधिं दत्तवानार्त-त्राण परायणस्सभगवान् गङ्गाधरो मे गतिः ॥ २

मृत्युं वक्षसि ताडयन्निजपदध्यानैकभक्तं मुनिं मार्कंडेयमपालयत्करुणया लिंगाद्विनिर्गत्य यः । नेत्राम्भोजसमर्पणेनहरयेभीष्टं रथाङ्गं ददा वार्तात्राण परायण स्सभगवान् गङ्गाधरो मे गतिः ॥ ३

ओढुं द्रोणजयद्रथादिरथिकैस्सैन्यं महत्कैरवं दृष्ट्वा कृष्णसहायवन्तमपि तं भीतं प्रपन्नार्तिहा । पार्थं रक्षितवा नमोघविषय दिव्यास्त्र मुद्बोधयन्नार्त ...॥

बालं शैवकुलोद्भवं परिहसत्स्वज्ञातिपक्षाकुलं
खिद्यन्तं तव मूर्ध्नि पुष्पनिचयं दातुं समुद्यत्करम् ।
दृष्ट्वा नन्यविरिञ्चिरम्यनगरे पूजां त्वदीयां भज-
न्नार्त ... ॥ ५

संत्रस्तेषु पुरा सुरासुरभयादिन्द्रादिवृन्दारके-
ष्वारूढो धरणीरथं श्रुतिहयं कृत्वा मुरारिं शरम् ।
रक्षन्यः कृपया समस्तविबुधात् जित्वा पुरारीन्
क्षणा दार्तत्राण ... ॥ ६

श्रौतस्मार्तपथो पराङ्मुखमपि प्रोद्यन्महापातकं
विश्वाधीशमपत्यमेव गतिरित्यालापवन्तं सकृत् ।
रक्षन्यः करुणापयोनिधिरिति प्राप्तप्रसिद्धिः पुरा
ह्यार्त्रताण ... ॥ ७

गाङ्गं वेगमवाप्यमान्यविबुधै रुद्धोढुं पुरा याचितो
दृष्ट्वाभक्तभगीरथेन विनतो रुद्रोजटामण्डले। कारुण्या
दवनीतले सुरनदीमापूरयन्पावनी मार्तत्राण परा-
यण ... ॥ ८

॥ इति श्रीमदप्पय्यदीक्षितविरचितं श्रीगङ्गाधराष्टकम् ॥

॥ श्रीपार्वतीशकरावलम्बस्तोत्रम् ॥

श्रीमच्चराचरजगत्परिपालनेश
शम्भोशतानन गणत्रयकारणत्वम् ।
श्रीदक्षमासम सुशान्त सुरेन्द्रवन्द्य
श्री पार्वतीश मम देहि करावलम्बम् ... ॥
नित्यानिवारित महाबलवत्सुरौघ
सत्यस्वरूप सदयाप्रतिमस्वभाव ।
निर्विण्णबुद्धिरहित प्रथितोरुकीर्ते श्रीपा ... ॥
पाशाङ्कुशाभयकरप्रणताघनाश
कौशल्यसञ्चरित विश्वविशालफाल ।
त्रैशूलशृङ्गजितराक्षसबृन्दशम्भो श्रीपा ... ॥
सर्वाखुमूषकभुगादिषु पापजन्म
स्वत्यन्तपापनिरतस्य च जन्मनो मे ।
बाल्ये विशुद्धमतिहीनचकर्तिनश्च श्रीपा ...॥४
ज्ञानप्रदिग्ध चरणायुध सारमेयैः
बालैर्विदग्धहृदयैश्च फलैश्च नाकम् ।
अज्ञानतश्चलबालकचेष्टितस्य श्रीपा ... ॥ ५

अन्धैर्युभिर्युवति काठिनवृत्तवक्षो
जन्मद्वयार्पितहृदस्तरुणीरतस्य ।
तारुण्यके वयसि नाम मदांध दृष्टेः श्रीपा... ॥
वित्तार्जने विविधपापविचारयुक्त-
स्याज्ञानबद्धहृदयस्य च दारपुत्रान् ।
पातुं धरासुरधन प्रतिलोभबन्देः श्रीपा... ॥ ७
दारा इमे मम सुताः पशवो मदीया
धान्यं मदीयमिति गर्वितमानसस्य ।
दुर्वृत्तकृत्यनिरतस्य दुरात्मकस्य श्रीपा... ॥ ८
वृद्धे वयस्युत कफामय वातपित्त
तृष्णादिभिश्च रुदतस्स्वकळत्रपुत्रान् ।
देह्यन्नमम्बरमिति प्रतिपावनस्य श्रीपा... ॥ ९
बाल्ये च कुर्दनरतस्य च यौवने तु
स्त्रीलोलुपस्य गळितस्य जरांशभाजि ।
चिन्तारतस्य च विदा परिहीणबुद्धेः श्रीपा... ॥
काले मृतेस्सुतकळत्रजनैरुदद्भि-
र्हाहेति बन्धुनिवहै रतिदीनवाक्यैः ।

दैन्यं गतस्य यमदूतनिपीडितस्य श्रीनीलकण्ठ ..
आगत्य ते यमचराश्चति भीतिरूपाः
दंष्ट्राकराळवदना धृतयाम्यदण्डाः ।
माभीषयन्ति च तदा परिपालकः को
विश्वेश शर्व ... ॥ १२
आयाहि पापनिरतेति वदन्ति ये ते
बद्ध्वा गळे यमभटास्तु कठोरपाशैः ।
धृत्वा करौ च चरणौ वशगस्य तेषां श्रीपा...
जल्पन् रुदन् सति सुतानभिवीक्ष्य वक्तुं
हीनस्य वैधृतिबलेनच दिव्यनाम ।
स्मर्तुं भयेन यमदूतसहानुगस्य श्रीपा ... ॥१४
नीतस्य तैस्सिकतकण्टक कुत्सिताश्म
सान्द्रेण दुष्कृतपदाजलहीनदेशे ।
छायाविहीनबहुळातपतप्तभूमौ श्रीपा ... ॥ १५
आपन्नतस्य च तदा कृपया गतस्त्वं
नालोच्य दुर्गुणगणांस्तव किङ्करस्य ।

भीतस्य दूतवशगस्य च मे दयाळो श्रीपा ... ॥
नास्त्येव दारसुतबन्धुगुणप्रतीकं
मुक्त्वागतस्य रविसूनुपरं तदीये ।
दूतैस्समानुगमनेऽप्यतिभीतिगस्य श्रीपा ... ॥
जन्मप्रभृत्युतमहांति च दुष्कृतानि
कृत्वा तु संसृतिनिमित्तमदान्धकारैः ।
नह्यात्तमीश तव नाम मया कदापि श्रीपा ...
अव्याजभक्तपरिपालकदीनबन्धो
स्वामिन् शिवारमण मे तव किङ्करस्य ।
देहावसानसमये तव नाम दत्वा श्रीपा ... ॥
नास्त्यन्यदैवबरदो मम नास्तिनास्ति
त्वामन्तरेण गिरिजेश कृपासमुद्र ।
दत्वा स्मृतिं शुभतरां तव नाम्नएष श्रीपा ... ॥
मृत्युश्च सन्निहित एव यदा करोषा
तं प्राप्नुयां यदि तदा स्मृतिहीनचित्तम् ।
तस्मिन्समागत उमाधव रक्ष मां त्वं श्रीपा ...
पूर्वार्जितैरमितदुष्करपातकौघै-

यैरप्राप्नुयां मृतिमरण्यवने पुरेव ।
न ज्ञायते यदि कदा भव मे प्रसन्नः श्रीपा... ॥
शार्दूलसिंहमृगसर्पजलाग्निवात
चोरामयादिमृतिमाप्नुवतोऽन्तकाले ।
तत्रागतस्यदमृताख्य मथोपदिश्यश्रीपा ... ॥
श्रीमन्गिरीश शशिशेखर दिव्यमूर्ते
श्रीपार्वतीधर रमापति मुख्यसेव्य ।
सर्वान्तरायहर पाशधर प्रभो मे श्रीपा ...॥२४
नित्यं शिवस्य महतस्तु करावलम्बं
स्तोत्रं महागुरुवरेण शिवशङ्करेण ।
यत्प्रातरेव पठतश्शरवक्रपद्म-
स्सर्वानभीष्टनिचयान् प्रददाति शम्भुः ॥
श्रीपार्वतीशस्य करावलम्ब
... स्तोत्रं पठेद्यः प्रयतः प्रभाते ।
स्मृतिं तु तस्यात्र मृतौ प्रदद्यात्
श्रीपार्वतीशो हि करावलम्बम् ॥ २६

इति श्रीमत्परमहंसपरिव्राजक श्रीशङ्करभारतीस्वामिविरचितं श्रीपार्वतीशकरावलम्बस्तोत्रम् सम्पूर्णम् ॥

॥ शिवमानसिकपूजास्तोत्रम् ॥

अनुचितमनुलपितमेत्वयिशम्भो शिवतदागसःशांत्यै ।
अर्चां कथमपि विहितामङ्गीकुरु सर्वमङ्गळोपेत ॥ १
ध्यायामि कथमिव त्वां धीवर्त्म विदूर दिव्यमहिमानम्।
आवाहनं विभोस्ते देवाद्य भवेत्प्रभो कुतस्थानात् ॥
कियदासनं प्रकल्प्यं कृतासनस्येह सर्वतोपिसह ।
पाद्यं कतेऽर्घ्यमपिवा पाद्यं सर्वत्र पाणिपादस्य ॥ ३
आचमनन्ते स्यादधिभगवन्तेसर्वतो मुखस्यकथम् ।
मधुपर्कोवाकथमिह मधुवैरिणि दर्शितप्रसादस्य ॥ ४
स्नानेन किं विधेयं सलिलकृतेनेह नित्यशुद्धस्य ।
वस्त्रेणापि नकार्यं देवाधिपते दिगम्बरस्येह ॥ ५
स्फुरतिहि सर्वाभरणं सर्वाङ्गे सर्वमङ्गळाकार ।
अतिवर्णाश्रमिणस्तेऽस्त्युपवीतेनेहकश्चिदुत्कर्षः ॥ ६
गन्धवतीहतनुस्ते गन्धाःकिंनेश पौनरुक्त्या ।
पुष्कर फलदातारं पुष्करकुसुमेन पूजयामि त्वाम् ॥
शमधनमूलधनं त्वां सकलेश्वरभवसिधूपितःकेन ।

दीपः कथं शिखावान् दीप्येत पुरस्त्वयंप्रकाशस्य ॥
अमृतात्मकमपि भगवन्नशनं किन्नाम नित्यतृप्तस्य ।
स्वय्यात्रेडितमेतत्ताम्बूलं यदिहनुमुखरागाय ॥ ९
उपहारी भूयादिदमुमेशयन्मे विचेष्टितमशेषम् ।
नीराजयामि तमिमं नानात्मानं सहाखिलैःकरणैः ॥
सुमनश्शेखर भवते सुमनोञ्जलिरेषकोभवेच्छम्भो ।
छत्रंद्युमन्द्युमार्धन् चामरमपिकिञ्चितश्रमस्यतव॥ १०
नृत्यंप्रथतां कथमिवनाथ तवाग्रेमहानटस्नेह ।
गीतं किं पुरवैरिन् गीतागम मूलदेशिकस्यपुरः ॥
वाद्यं डमरुभृतस्ते वादयितुंतेपुरोस्तिकाशक्तिः ।
अपरिच्छिन्नस्य भवेदखिलेश्वर कः प्रदक्षिणविधिस्ते ॥
स्युस्तेनमांसिकथमिव शङ्करपरितोपि विद्यमानस्य ।
वाचामगोचरे त्वयिवाक्प्रसरोमे कथंसुसम्भवति ॥
नित्यानन्दायनमो निर्मलविज्ञानविग्रहायनमः ।
निरवधिकरुणायनमोनिरवधिविभवायतेजसेस्तुनमः॥
सरसिज विपक्षचूड स्सगरतनू जन्मसुकृतमूर्धासौ ।

दक्कूलङ्कषकरुणो दृष्टिपथेमेस्तु धवळिमाकोपि ॥
जगदाधार शरासं जगदुत्पाद प्रवीणयन्तारम् ।
जगदवन कर्मठशरं जगदुद्धारं श्रयामि चित्सारम्॥
कुवलयसह युध्वगळैः कुलगिरिकूटस्थकवचिताधाङ्गैः ।
कलुषविदूरैश्चेतः कबलितमेतत्कृपारसैः किञ्चित् ॥
वसनवतेकृत्कृत्या वासवते रजितशैळ शिखरेण ।
वलयवतेभोगभृता वनितार्धाङ्गाय वस्तुनेस्तु नमः ॥
सरसिजकुवलय जागरसंवेशन जागरूकलोचनतः ।
सकृदपि नाहंजाने सुतरान्तं भाष्यकारमञ्जीरात् ॥
आपाटलजूटानामानीलच्छायकन्धरा सीम्नाम् ।
आपाण्डु विग्रहाणामादुहिणं किङ्करा वयं महसाम् ॥
मुषितस्मरावलेपे मुनितनयायुर्वदान्यपदपद्मे ।
महसि मनो रमतांमे मनसि दयापूर मेदुरापाङ्गे ॥२२
शर्मणि जगताङ्गिरिजा नर्मणि सप्रेमहृदयपरिपाके ।
ब्रह्मणि विनमद्रक्षण कर्मणि तस्मिन्नुदेतु भक्तिर्मे ॥
कस्मिन्नपि समये मम कण्ठच्छायाविधूतकालाभ्रं ।

अस्तुपुरोवस्तु किमप्यर्धाङ्गे दारमुन्मिषन्निटलम् ॥
जटिलाय मौळिभागे जलधरनीलायकन्धराभोगे ।
धवळाय वपुषि निखिले धाम्नेस्यान्मानसे नमोवाकः॥
अकरविराजत्सु मृगैरवृषतुरङ्गै रमौळिधृतगङ्गैः ।
अकृतमनोभवभङ्गैरलमन्यैर्जगतिदैवतंमन्यैः ॥ २६
कस्मै वक्ष्मि दशां मे कस्येदृग्घृदयमस्तिशक्तिर्वा ।
कस्य बलं चोद्धर्तुं क्लेशंत्वामन्तरा दयासिन्धो ॥ २७
याचेह्यनभिनवन्ते चन्द्रकळोत्तंस किञ्चिदपिवस्तु ।
मह्यंप्रदेहिभगवन् मदीयमेव स्वरूपमानन्दम् ॥ २८
भगवन्बालतयावा भक्त्यावा प्यापदाकुलतयावा ।
मोहाविष्टतया वा मास्तुचते मनसि यदुरुक्तं मे॥ २९
यदि विश्वाधिकता ते यदि निगमागम पुराणथाथार्थ्यम्।
यदिवाभक्तेषुदयातदिहमहेशाशु पूर्णकामस्याम् ॥३०

॥ इति शिवानन्दावधूतरचित शिवमानसिकपूजास्तोत्रम् ॥

॥ शिवपञ्चाक्षरीस्तोत्रम् ॥

ओङ्कारसञ्जातसमस्तवेदपुराणपुण्यागमपूजिताय ।
चोङ्काररूपप्रियदर्शनाय चोङ्काररूपाय नमश्शिवाय ॥

नानाजराव्याधिविनाशनाय नाथायलोकाय जगद्धिताय । नानाकळङ्कानिदर्शनाय तस्मै नकाराय ॥

मात्सर्यदोषान्तकसम्भवाय मातुः पितुर्दुःखनिवारणाय । महेश्वरीसूक्ष्मवराय नित्यं तस्मै मकाराय ॥

शीलव्रतज्ञानदृढव्रताय शीलासुवर्णाय समुत्सुकाय ।
शीघ्राय नित्यं सुरसेविताय तस्मै शिकाराय ... ॥

वामार्धविद्युत्प्रतिमप्रभाय वाचा मनःकर्मविमोचनाय ।
वागीश्वरीसूक्ष्मवराय नित्यं तस्मै वकाराय ... ॥ ५

यक्षोरगेन्द्रादिसुरव्रताय यक्षाङ्गनाजन्मविलोचनाय ।
यक्षेषु लोकेषु जगद्धिताय तस्मै यकाराय ... ॥ ६

ईषत्फुल्लनीलोत्पललोचनायै कृशानुचन्द्रार्कविलोचनाय ।
निरीश्वरायै निखिलेश्वराय नमश्शिवायै च नमश्शिवाय ... ॥ ७

॥ इति शिवपञ्चाक्षरीस्तोत्रम् ॥

॥ बिल्वाष्टकम् ॥

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधं ।
त्रिजन्मपापसंहारं एकबिल्वं शिवार्पितम् ॥ १

त्रिशाखैर्बिल्वपत्रैश्च अच्छिद्रैः कोमलैश्शुभैः ।
तव पूजां करिष्यामि एक ... ॥ २

दर्शनं बिल्ववृक्षैश्च स्पर्शनं पापनाशनम् ।
अघोरपापसंहारं एक ... ॥ ३

सालग्रामेषु विप्रेषु तटाके वनकूपयोः ।
यज्ञकोटिसहस्राणां एक ... ॥ ४

दन्तिकोटिसहस्रेषु अश्वमेधशतानि च ।
कोटिकन्याप्रदानेन एक ... ॥ ५

एकं च बिल्वपत्रैश्च कोटियज्ञफलं लभेत् ।
महादेवैश्च पूजार्थं एक ... ॥ ६

काशीक्षेत्रे निवासं च कालभैरवदर्शनम् ।
गयाप्रयागमे दृष्ट्वा एक ... ॥ ७

उमया सह देवेशं वाहनं नन्दिशङ्करम् ।
मुच्यते सर्वपापेभ्यो एकबिल्वं शिवार्पितम् ॥ ८

॥ इति श्रीबिल्वाष्टकम् ॥

तुलसी बिल्व निर्गुण्डी अपामार्गकपित्थकौ ।
शमी चामलकं दूर्वा अष्टबिल्वाः प्रकीर्तिताः ॥ ९

॥ इत्यष्टबिल्वानि ॥

॥ मेधादक्षिणामूर्ति मन्त्रवर्णपदस्तुतिः ॥

ओमित्येकाक्षरं ब्रह्म व्याहरन्ति त्रयशिखाः ।
तस्मै तारात्मने मेधादक्षिणामूर्तये नमः ॥ १
नत्वायं मुनयस्सर्वे परं यान्ति दुरासदम् ।
नकाररूपिणे मेधादक्षिणामूर्तये नमः ॥ २
मोहजालविनिर्मुक्तो ब्रह्मविद्याति यत्पदम् ।
मोकाररूपिणे मेधादक्षिणामूर्तये नमः ॥ ३
भवमाश्रित्य यं विद्वान् नभवोद्भवत्परः ।
भकाररूपिणे मेधादक्षिणामूर्तये नमः ॥ ४
गगनाकारवद्भान्तमनुभात्यखिलं जगत् ।
गकाररूपिणे मेधादक्षिणामूर्तये नमः ॥ ५
वटमूलनिवासो यो लोकानां प्रभुरव्ययः ।
वकाररूपिणे ... ॥ ६
तेजोभिर्यस्य सूर्योऽसौ कालकृन्निकरो भवेत् ।
तेकार रूपिणे ... ॥ ७

दक्षत्रिपुरसंहारे यः कालविषभक्षने ।
दकाररूपिणे ... ॥ ८
क्षिप्रं भवति वाक्सिद्धिर्यन्नामस्मरणान्नृणाम् ।
क्षिकाररूपिणे ... ॥ ९
णाकारवाच्यो यस्सुप्तं स्पन्दीपयति मे मनः ।
णाकाररूपिणे ... ॥ १०
मूर्तयोऽष्टधा यस्य जगज्जन्मादिकारणम् ।
मूकाररूपिणे ... ॥ ११
तत्त्वं ब्रह्मासि परमिति यद्गुरुबोधितः ।
सरेफतात्मनेमे ... ॥ १२
येयं विदित्वा ब्रह्माद्या ऋषयो यान्ति निर्वृतिम् ।
येकाररूपिणे ... ॥ १३
महतां देवमित्याहुर्निगमागमयोश्शिवः ।
मकाररूपिणे ... ॥ १४
सर्वस्य जगतोऽभ्यन्तर्बहिर्यो व्याप्य संस्थितः ।
सकाररूपिणे ... ॥ १५

त्वमेव जगतस्साक्षी सृष्टिस्थित्यन्तकारणम् ।
मेकाररूपिणे ... ॥ ११

दामेति धातृसृष्टेर्यत्कारणं कार्यमुच्यते ।
धाङ्कारररूपिणे ... ॥ १७

प्रकृतेर्यत्परं ध्यात्वा तादात्म्यं याति वै मुनिः ।
प्रकाररूपिणे ... ॥ १८

ज्ञानिनोयमुपास्यन्ति तत्वातीतं चिदात्मकम् ।
ज्ञाकाररूपिणे ... ॥ १९

नज्ञा सञ्जायते यस्य ध्याननामार्चनादिभिः ।
नकाररूपिणे ... ॥ २०

यस्यस्मरणमात्रेण नरो मुक्तस्सबन्धनात् ।
यकाररूपिणे ... ॥ २१

छवेर्यन्नेन्द्रियाण्यापुर्विषयेष्विह जाड्यताम् ।
छकाररूपिणे ... ॥ २२

ह्रान्तेविदां जडानां यो दूरे तिष्ठति चिन्मयः ।
ह्राकाररूपिणे ... ॥ २३

हारम्प्रायफणीन्द्राय सर्वविद्याप्रदायिने ।
हाकाररूपिणे ... ॥ २४

॥ इति श्रीमेधादक्षिणामूर्ति मन्त्रवर्णपदस्तुतिः ॥

॥ दक्षिणामूर्तिनवरत्नमालिकास्तोत्रम् ॥

तेजः किंचित्काञ्चनटङ्कीकपिशाभान् बिभ्रद्भ्रूनु-
द्भूटकापर्दकलापान् । भस्मालेपस्मेरललाटं वटमूले
दृष्टं दुष्टापस्मृतिहारि स्मरहन्तृ ॥ १

न्यग्रोधाधो धिक्कृतधाराधरधीर ग्रीवाभोगं भो-
गिकुलाकल्पमनल्पम् । मुग्धाकारं मुग्धनिशानाथ-
वतंसं मुग्धस्मेरं मोहविरामं विमृशामः ॥ २

नासादत्तालोकनयानाव्यसरोरुद्किञ्जल्काळि -
पिङ्गजटाजूटकवत्या। प्रौढापस्मारस्मयिताधस्मरशक्त्या
चिन्मूर्तं चित्कळया मामकमन्तः ॥ ३

विद्यारूपे वेदगिरामे कविमृग्ये नद्यामौळौ नर्तन-
शीलालकचूडे । आलीनं मे मानसमालीढमनोभू-
गाढाहङ्काराङ्कुरलालाटकृशानौ ॥ ४

वैयाघ्रत्वक्चित्रपटीकृत्तकटीका टीकाकारज्ञान-
समुद्रानिगमोक्तेः । मुक्तेर्माता मूलमपारस्य महिम्न-
श्चिद्वैदग्ध्री काचन चित्ते मम भाति ॥ ५

इन्दूत्तंसं कालिमकण्ठं शिखिनेत्रं सिन्दूरोष्ठं-
शुद्धतनुं बद्धफणीन्द्रम् । भाधीशाभासुरहासं भव-
मन्तश्शार्दूलत्वग्वाससमीशं वरिवस्ये ॥ ६

मुद्रा काचित् ज्ञानमयी यं मुनिशंसन्मोहध्वां-
तोत्कर्तनवैकर्तनमूर्तेः । आर्तिं भिन्द्यादाशयलग्ना-
मनिशं नो नैयग्रोधीं मूलभुवं चाधिशयाना ॥ ७

नीहारांभो हारसितैरावतगङ्गा पाटीराळी -
भूतिसुधातधौवळक्ष्मम् । सद्रुद्राक्षस्रग्धरमुद्राक्षमनक्षस्पं-
दं मन्दस्मेरमनादिं गुरुमन्तः ॥ ८

घोरापस्मृत्युत्कटपृष्ठे विनिविष्टो यस्यैकोङ्घ्रि स्त्वत्पृथु-
लोरु स्थितिरन्यः । वस्तुध्यानादुद्भूतनिष्पन्दशरीरं
शान्तं तेजस्तन्महिमानं समुपासे ॥ ९

एतां मालां नवमणिरूपामादिगुरोर्भक्त्या नित्यं
पठति च यो जाड्यविमुक्तः । अष्टाचत्वारिंशति
साहस्रसमत्वं गत्वा तस्मिन् विलयमुपैत्येव स धन्यः॥

॥इति श्री नवनाथसिद्धकृत दक्षिणामूर्ति नवरत्नमालिकास्तोत्रम्॥

॥ दक्षिणामूर्तिनवरत्नमालास्तोत्रम् ॥

मूले वटस्य मुनिपुङ्गवसेव्यमानं मुद्राविशेष मुकुळीकृतपाणिपद्मम् । मन्दस्मितं मधुरवेषमुदार-माद्यं तेजस्तदस्तु हृदि मे तरुणेन्दुचूडम् ॥ १

शान्तं शारदचन्द्रकान्तिधवळं चन्द्राभिरामाननं चन्द्रार्कोपमकान्तिकुण्डलधरं चन्द्रावदातांशुकं । वी-णां पुस्तकमक्षसूत्रवलयं व्याख्यानमुद्रां करैर्बिभ्राणं कलये हृदा मम सदा शास्तारमिष्टार्थदम ॥ २

कर्पूरगात्रमरविन्ददळायताक्षं कर्पूरशीतलहृदं क-रुणाविलासम् । चन्द्रार्धशेखरमनन्तगुणाभिराम-मिन्द्रादिसेव्यपदपङ्कजमीशभीडे ॥ ३

द्युद्रोरथस्वर्णमयासनस्थं मुद्रोल्लसद्बाहुमुदार-कायम् । सद्रोहिणीनाथ कळावतंसं भद्रोदधिं कञ्चन चिन्तयामः ॥ ४

उद्यद्भास्करसन्निभं त्रिणयनं श्वेताङ्गरागप्रभं बालं मौञ्जिधरं प्रसन्नवदनं न्यग्रोधमूले स्थितम् । पिङ्गाक्षं

मृगशावकस्थितिकरं सुब्रह्मसूत्राकृतिं भक्तानामभय-
प्रदं भयहरं श्रीदक्षिणामूर्तिकम् ॥ ५

श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्द्रनन्द्यादयः प्रा-
चीना गुरवोपि यस्य करुणालेशाद्भवा गौरवम् । तं
सर्वादिगुरुं मनोज्ञवपुषं मन्दस्मितालङ्कृतं चिन्मुद्रा-
कृतिमुग्धपाणिनलिनं चित्ते शिवं कुर्महे ॥ ६

कपर्दिनं चन्द्रकळावतंसं त्रिनेत्रमिन्दुं प्रतिमक्षिता-
ज्वलम् । चतुर्भुजं ज्ञानदमक्षसूत्रपुस्ताग्निहस्तं हृदि-
भावयेच्छिवम् ॥ ७

वामोरुपरिसंस्थितां गिरिसुतामन्योन्यमालिङ्गितां
श्यामामुत्पलधारिणीं शशिनिभां चालोकयन्तं शिवम्।
आश्लिष्टेन करेण पुस्तकमथो कुम्भं सुधापूरितं
मुद्रां ज्ञानमथौं दधानमपरैर्मुक्ताक्षमालं भजे ॥ ८

वटतरुनिकटनिवासं पटुतरविज्ञानमुद्रितकराब्जम् ।
कञ्चन देशिकमाद्यं कैवल्यानन्दकन्दळं वन्दे ॥ ९

॥ इति श्रीदक्षिणामूर्ति नवरत्नमालास्तोत्रम् ॥

॥ श्रीदक्षिणामूर्तिस्तोत्रम् ॥

मन्दस्मित स्फुरित मुग्धमुखारविन्दं
कन्दर्पकोटिशतसुन्दरादिव्यमूर्तिम् ।
आताम्रकोमल जटाघटितेन्दुलेख-
मालोकये वटतटीनिलयं दयालुम् ॥ १

कन्दलित बोधमुद्रं कैवल्यानन्द संविदुन्निद्रम् ।
कलये कञ्चन रुद्रं करुणारसपूरपूरितसमुद्रम् ॥ २

ओं जयदेव महादेव जय कारुण्यविग्रह ।
जयभूमिरुहावास जय वीरासनस्थित ॥ ३

जय कुन्देन्दुपाटीरपाण्डुराङ्गाङ्गजापते ।
जय विज्ञानमुद्राक्ष मालावीणालसत्कर ॥ ४

जयेतरकरन्यस्त पुस्तकास्तरजस्तमः ।
जयापस्मार निक्षिप्त दक्षपाद सरोरुह ॥ ५

जय शार्दूल चर्मैक परिधान लसत्कटे ।
जय मन्दस्मितोदार मुखेन्दु स्फुरिताकृते ॥ ६

जयान्तेवासिनिकरैरावृतानन्दमन्दर ।
जय लीलाजितानङ्ग जय मङ्गलवैभव ॥ ७
जय तुङ्गपृथूरस्क जय सङ्गीतलोलुप ।
जय गङ्गाधरासङ्ग जय शृङ्गारशेखर ॥ ८
जयोत्सङ्गानुषङ्गार्य जयोत्तुङ्ग नगालय ।
जयापाङ्गैक निर्दग्ध त्रिपुरामरवल्लभ ॥ ९
जय पिङ्गजटाजूट घटितेन्दु करामर ।
जयजातुप्रपन्नार्ति प्रपाटनपटूत्तम ॥ १०
जय विद्योत्पलोल्लासि निशाकर परावर ।
जयाविद्यान्धतमसध्वंसनोद्भासिभास्कर ॥ ११
जय संसृतिकान्तारकुठारासुरसूदन ।
जय संसारसावित्र तापतापित पादप ॥ १२
जयदोषविषालीढ मृतसञ्जीवनौषध ।
जय कर्तव्यदावाग्नि दग्धान्तर सुधाम्बुधे ॥ १३
जयासूयार्णवामग्नजनतारणनाविक ।
जयाहताधि रोगाणा मतिलोक सुखाञ्जन ॥ १४

जयाशाविषवल्लीनां मूलमालानिकृन्तन ।
जयाघतृणकूटाना ममन्द ज्वलितानल ॥ १५
जय मायामदेभश्री विदारण मृगोत्तम ।
जय भक्तजनस्वान्त चन्द्रकान्तैकचन्द्रमाः ॥ १६
जय सन्त्यक्तसर्वाश मुनिकोक दिवाकर ।
जयाचलसुताचारु मुखचन्द्र चकोरक ॥ १७
जयाद्रि कन्यकोत्तुङ्ग कुचाचल विहङ्गम ।
जय हैमवती मञ्जु मुखपङ्कज बम्भर ॥ १८
जय कात्यायनी स्निग्ध चित्तोत्पल सुधाकर ।
जयाखिल हृदाकाश लसद्युमणि मण्डल ॥ १९
जयासङ्ग सुखोत्तुङ्ग सौधक्रीडन भूमिप ।
जयसंवित्सभासीम नटनोत्सुक नर्तक ॥ २०
जयानवधि बोधाब्धि केलिकौतुक भूपते ।
जय निर्मलचिद्व्योम्नि चारुद्योतित नीरद ॥ २१
जयानन्द सदुद्यान लीलालोलुप कोकिल ।
जयागम शिरोरण्य विहार वरकुञ्जर ॥ २२

जय प्रणव माणिक्य पञ्जरान्तश्शुकाग्रणीः ।
जयसर्वकलावार्धि तुषार करमण्डल ॥ २३
जयाणिमादिभूतीनां शरण्या खिल पुण्यभूः ।
जय स्वभावभासैव विभासित जगत्त्रय ॥ २४
जय खादिधरित्यन्त जगज्जन्मादि कारण ।
जयाशेष जगज्जाल कलाकलनवर्जित ॥ २५
जय मुक्तजनप्राप्य सत्यज्ञान सुखाकृते ।
जयदक्षाध्वरध्वंसिन् जय मोक्षफलप्रद ॥ २६
जय सूक्ष्म जगव्यापिन् जय साक्षिन् चिदात्मक ।
जय सर्व कुलाकल्प जयानल्प गुणार्णव ॥ २७
जयकन्दर्पलावण्य दर्पनिर्भेदनप्रभो ।
जयकर्पूरगौराङ्ग जयकर्म फलाश्रय ॥ २८
जयकञ्जदलोत्सेक भञ्जनोद्यतलोचन ।
जय पूर्णेन्दुसौन्दर्यगर्वनिर्वापणानन ॥ २९
जय हासश्रियोदस्त शरच्चन्द्र महाप्रभ ।
जयाधर विनिर्भिन्न बिम्बारुणिम विभ्रम ॥ ३०

जय कम्बुविलासश्री धिक्कारि वरकन्धर ।
जयमञ्जुलमञ्जीररञ्जित श्रीपदाम्बुज ॥
जय वैकुण्ठसम्पूज्य जयाकुण्ठमते हर ।
जय श्रीकण्ठसर्वज्ञ जय सर्वकलानिधे ॥
जयकोशातिदूरस्थ जयाकाश शिरोरुह ।
जयपाशुपतध्येय जयपाश विमोचक ॥
जयदेशिक देवेश जयशम्भो जगन्मय ।
जयशर्व शिवेशान जयशङ्कर शाश्वत ॥
जयोङ्कारैकसंसिद्ध जयकिङ्करवत्सल ।
जय पङ्कजजन्मादि भावितान्घ्रियुगाम्बुज ॥
जयभर्ग भवस्थाणो जयभस्मावकुण्ठन ।
जयस्तिमित गम्भीर जयनिस्तुलविक्रम ॥
जयास्तमितसर्वार्थ जयोदस्तारिमण्डल ।
जयमार्तण्डसोमाग्नि लोचनत्रयमण्डित ॥
जयगण्डस्थलादर्श विम्बितोद्भासिकुण्डल ।
जय पाषण्डजनतादण्डनैकपरायण ॥

जयाखण्डितसौभाग्य जयचण्डीश भावित ।
जयानन्तांत क्रान्तैक जयशान्तजनेडित ॥ ३९
जय त्रय्यन्तसंवेद्य जयाङ्ग त्रितयातिग ।
जयनिर्भेदबोधात्मन् जयनिर्भावभावित ॥ ४०
जयनिर्द्वन्द्व निर्दोष जयाद्वैतसुखाम्बुधे ।
जयनित्यनिराधार जयनिष्कळनिर्गुण ॥ ४१
जयनिष्क्रियनिर्मोय जयनिर्मलनिर्भय ।
जयनिश्शब्दनिस्स्पर्श जयनीरूपनिर्मल ॥ ४२
जयनीरस निर्गन्ध जयनिस्पृह निश्चल ।
जयनिस्सीम भूमात्मन् जयनिष्पन्द नीरघे ॥ ४३
जयाच्युत जयातर्क्य जयानन्य जयाऽव्यय ।
जयामूर्त जयाचिन्त्य जयाग्राह्य जयाद्भुत ॥ ४४
इति श्रीदेशिकेन्द्रस्य स्तोत्रं परमपावनम् ।
पुत्रपौत्रायुरारोग्यसर्वसौभाग्यवर्धनम् ॥ ४५
सर्वविद्याप्रदं सम्यगपवर्गविधायकम् ।
यः पठेत्प्रयतो भूत्वा ससर्वफलमश्नुते ॥ ४६

दाक्षायणीपतिदयार्द्रनिरीक्षणेन
साक्षादवैति परतत्त्वमिहैव धीरः ।
नक्षानदानजपहोमसुरार्चनादि
धर्मैरशेष निगमाप्ततनिरूपणैर्वा ॥ ४

अवचनचिन्मुद्राभ्यामद्वैतं बोधमात्रमात्मानम् ।
ब्रूते तत्र च मानं पुस्तक भुजगाग्निभि र्महादेवः ॥
कटिघटित करटिकृत्तिः कामपि मुदां प्रदर्शयन् जटिलः,
स्वालोकिनः कपाली हन्त मनोविलय मातनोत्येकः
श्रुतिमुखचन्द्रचकोरं नतजनदौरात्म्यदुर्गमकुठारम् ।
मुनिमानस सञ्चारं मनसा प्रणतोस्मिदेशिक मुदारम्॥

इति श्रीमत्परमहंस परिव्राजकाचार्यवर्य
श्रीसदाशिव ब्रह्मेन्द्रविरचितं श्रीदक्षिणामूर्तिस्तोत्रम् ॥

॥ श्रीदक्षिणामूर्ति मानसिकपूजास्तोत्रम् ॥

मुद्राक्षमाला मृतपात्रविद्या व्याघ्राजिनार्धेन्दु-
फणीद्रयुक्तम् । योगीन्द्रपर्जन्य मनस्सरोजभृङ्गंभजेहं
हृदिदक्षिणास्यम् ॥ १

स्फुटवटनिकटस्थं स्तूयमानावभासं पटुभुजतटबद्ध-
व्याघ्रचर्मोत्तरीयम् । चटुलनिटलनेत्रं चन्द्रचूडं मुनीशं
स्फटिकपटलदेहं भावये दक्षिणास्यम् ॥ २

आवाहये सुन्दरनागभूषं विज्ञानमुद्राञ्चित पञ्च-
शाखम् । भस्माङ्गरागेण विराजमानं श्रीदक्षिणामूर्ति-
महात्मरूपम् ॥ ३

सुवर्णरत्नामलवज्रनीलमाणिक्यमुक्तामणियुक्त -
पीठे । स्थिरोभव त्वं वरदो भवत्वं संस्थापयामीश्वर
दक्षिणास्यम् ॥ ४

श्रीजाह्नवीनिर्मलतोयमीश चार्घ्यार्थमानीय समर्प-
यिष्ये । प्रसन्नवक्त्राम्बुजलोकवन्द्य कालत्रयेहं तव-
दक्षिणास्यम् ॥ ५

कस्तूरिकामिश्रमिदं गृहाण रुद्राक्षमालाभरणाङ्कि
ताङ्ग । कालत्रयाबाध्यजगन्निवास पाद्यं प्रदास्ये हृदि
दक्षिणास्यम् ॥

मुदाहमानन्द सुरेन्द्रवन्द्य गङ्गानदीतोयमिदं
हिदास्ये । तवाधुना चाचमनं कुरुष्व श्रीदक्षिणामू
गुरुस्वरूप ॥

सर्पिः पयो दधि मधु शर्कराभिः प्रसेचये ।
पञ्चामृतमिदं स्नानं दक्षिणास्य कुरु प्रभो ॥ ८

वेदान्तवेद्याखिलशूलपाणे ब्रह्मामरोपेन्द्रसुरेन्द्र
वन्द्य । स्नानं कुरुष्वामलगाङ्गतोये सुवासितेस्मिन्
कुरुदक्षिणास्य ॥ ९

कौशेयवस्त्रेण च मार्जयामि देवेश्वराङ्गानि तवाम
लानि । प्रज्ञाख्यलोकत्रितयप्रसन्न श्रीदक्षिणास्याखिल
लोकपाल ॥ १०

सुवर्णतंतूद्भव मध्यमीश यज्ञोपवीतं परिधत्स्व

देव । विशालबाहूदरपञ्चवक्त्र श्रीदक्षिणामूर्ति सुख-
स्वरूप ॥ ११

कस्तूरिकाचन्दनकुङ्कुमादिविमिश्रगन्धंमणिपात्र
संस्थम् । समर्पयिष्यामि मुदा महात्मन् गौरीमनो-
वल्लभतदक्षिणास्य ॥ १२

शुभ्राक्षतैश्शुभ्रतिलैस्सुमिश्रै स्संपूजयिष्ये भवतः-
परात्मन्, तदेकनिष्ठेन समाधिनाथ सदाहमानन्द
मुदक्षिणास्य ॥ १३

सुरत्नदाङ्क्ये किरीटकुण्डलं हाराङ्गुळीकङ्कणमेख-
लावृतम् । खण्डेन्दु चूडामृतपात्रयुक्तं श्रीदक्षिणामूर्ति-
महं भजामि ॥ १४

मुक्तामणिस्थापितकर्बुरप्रसूनैस्सदाहं परिपूज -
यिष्ये । कुक्षिप्रपुष्टाखिळलोकजाल श्रीदक्षिणामूर्ति-
महत्स्वरूपम् ॥ १५

दशाङ्गधूपं परिकल्पयामि नानासुगन्धान्वित-

माज्ययुक्तम् । मेधाख्य सर्वज्ञ बुधेन्द्रपूज्य दिगम्बर स्वीकुरु दक्षिणास्य ॥ ११

आज्येन संमिश्रमिमं प्रदीपं वर्तित्रयेणान्वितमग्नि-युक्तम् । गृहाण योगीन्द्र मयार्पितं भो श्रीदक्षिणा-मूर्तिगुरो प्रसीद ॥ १७

शाल्योदनं निर्मलसूपशाकभक्ष्याज्यसंयुक्तदधि-प्रसिक्तम् । कपित्थ सद्राक्ष फलैश्च चूतै स्सापोशनं भक्षय दक्षिणास्य ॥ १८

गुडाम्बु सत्सैन्धवयुक्तनक्रं कर्पूरपाटीर लवङ्ग-युक्तम् । यज्ञेश कामान्तक पुण्यमूर्ते पिबोदकं निर्मल-दक्षिणास्य ॥ १९

खमार्गनिर्यज्जलमाशु देव कुरूत्तरापोशनमभ्रकेश । प्रक्षालनं पाणियुगस्य शर्व गण्डूषमापादय दक्षि-णास्य ॥ २०

सम्यग्जलेनाचमनं कुरुष्व स्वस्थो भव त्वं मम-

वाग्रभागे । चिदाकृते निर्मलपूर्णकाम विनिर्मितं पावन दक्षिणास्य ॥ २१

ताम्बूलमद्य प्रतिसंगृहाण कर्पूरमुक्तामणिचूर्ण - युक्तम् । सुपर्णपर्णान्वितपूगखण्डमनेकरूपाकृति दक्षिणास्य ॥ २२

नीराजनं निर्मलपात्रसंस्थं कर्पूरसंदीपित मच्छरू- पम्। करोमिवामेश तवोपरीदं व्योमाकृते शङ्कर दक्षि- णास्य ॥ २३

ततःपरं दर्पणमीश पश्य स्वच्छं जगद्दीपितचक्रभा- स्वत् । माणिक्यमुक्तामणिहेमनील विनिर्मितं पावन- दक्षिणास्य ॥ २४

मन्दारपङ्केरुहकुन्दजाजीसुगन्धपुष्पाञ्जलिमर्प - यामि । त्रिशूलढक्काञ्चितपाणियुग्म ते दक्षिणामूर्ति- विरूपधारिन् ॥ २५

प्रदक्षिणं सम्यगहं करिष्ये कालत्रये त्वां करुणा-

भिरामम् । शिवामनोनाथ ममापराधं क्षमस्व यज्ञेश्वर दक्षिणास्य ॥ २६

नमोनमः पापविनाशनाय नमोनमः कञ्जभवार्चिताय । नमोनमः कृष्णहृदि स्थिताय श्रीदक्षिणामूर्तिमहेश्वराय ॥ २७

इति विज्ञानेन्द्रविरचितं श्रीदक्षिणामूर्ति मानसिकपूजास्तोत्रम् ॥

॥ श्रीदक्षिणामूर्तिस्तोत्रम् ॥

उपासकानां यदुपासनीयमुपात्तवासं वटशाखिमूले । तद्धाम दाक्षिण्यजुषा स्वमूर्त्या जागर्तु चित्ते मम बोधरूपम् ॥ १

अद्राक्षमक्षीणदयानिधानमाचार्यमाद्यं वटमूलभागे । मौनेन मन्दस्मितभूषितेन महर्षिलोकस्य तमोनुदं तम् ॥ २

विद्राविताशेषतमोगणेन मुद्राविशेषेण मुहुर्मुनीनाम् । निरस्य मायां वयया विधत्ते देवो महांस्त्वमसीति बोधम् ॥ ३

अपारकारुण्यसुधातरङ्गैरपाङ्गपातैरवलोकयन्तम् । कठोरसंसारनिदाघतप्तान् मुनीनहं नौमि गुरुं गुरूणाम् ॥ ४

ममाद्य देवो वटमूलवासी कृपाविशेषात्कृतसन्निधानः । ओंकाररूपामुपदिश्य विद्यामाविद्यकध्वान्तमपाकरोतु ॥ ५

कळाभिरिन्दोरिव कल्पिताङ्गं मुक्ताकलापैरिव बद्धमूर्तिम् । आलोकये देशिकमप्रमेयमनाद्यविद्या - तिमिरप्रभातम् ॥ ६

स्वदक्षजानुस्थितवामपादं पादोदरालङ्कृतयोग - पट्टम् । अपस्मृतेराहितपादमङ्के प्रणौमि देवं प्रणि- धानवन्तम् ॥ ७

तत्त्वार्थमन्तेवसतामृषीणां युवापि यस्सन्नुपदेष्टु- मीष्टे । प्रणौमि तं प्राक्तनपुण्यजालैराचार्यमाश्चर्य- गुणाधिवासम् ॥ ८

एकेन मुद्रां परशुं करेण करेण चान्येन मृगं दधानः । स्वजानुविन्यस्तकरः पुरस्तादाचार्यचूडा - मणिराविरस्तु ॥ ९

आलेपवन्तं मदनाङ्गभूत्या शार्दूलकृत्या परिधान- वन्तम् । आलोकये कञ्चन देशिकेन्द्रमज्ञानवाराकर- बाडवाग्निम् ॥ १०

चारुस्मितं सोमकळावतंसं वीणाधरं व्यक्तजटा-

कलापम् । उपासने केचन योगिनस्त्वामुपात्तना-
दानुभवप्रमोदम् ॥ ११

उपासते यं मुनयश्शुकाद्या निराशिषो निर्ममता-
धिवासाः । तं दक्षिणामूर्तितनुं महेशमुपास्महे मोह-
महार्तिशान्त्यै ॥ १२

कान्त्या निन्दितकुन्दकन्दलवपुर्न्यग्रोधमूले वसन्
कारुण्यामृतवारिभिर्मुनिजनं सम्भावयन् वीक्षितैः ।
मोहध्वान्तविभेदनं विरचयत् बोधेन तत्तादृशा देव-
स्त्वमसीति बोधयतु मां मुद्रावता पाणिना ॥ १३

अगौरगात्रैरललाटनेत्रैरशान्तवेषैरभुजङ्गभूषैः ।
अबोधमुद्रै रनपास्तनिद्रै रपूरकामै रमरैरलं नः ॥

दैवतानि कति सन्ति नावनौ नैव तानि मनसो
मतानि मे । दीक्षितं जडधियामनुग्रहे दक्षिणाभि-
मुखमेव दैवतम् ॥ १५

मुदिताय मुग्धशशिनावतंसिने भसितावलेपरम-

णीयमूर्तये । जगदिन्द्रजालरचनापटीयसे महसे नमोस्तु वटमूलवासिने ॥ १६

व्यालम्बिनीभिः परितो जटाभिः कलावशेषेण कलाधरेण । पश्यल्ललाटेन मुखेन्दुना च प्रकाशसे चेतसि निर्मलानाम् ॥ १७

उपासकानां त्वमुमासहायः पूर्णेन्दुभावं प्रकटीकरोषि । यदद्य ते दर्शनमात्रतो मे द्रवत्यहो मानसचन्द्रकान्तः ॥ १८

यस्ते प्रसन्नामनुसन्दधानो मूर्तिं मुदा मुग्धशशाङ्कमौळेः । ऐश्वर्यमायुर्लभते च विद्यामन्ते च वेदान्तमहारहस्यम् ॥ १९

इति श्रीमच्छङ्करभारतीस्वामिविरचितं दक्षिणामूर्तिस्तोत्रम् ॥

॥ श्री नीलकण्ठनमश्शिवायाष्टकम् ॥

नमो नमः कारणकारणाय जगन्मयायाहित-
पाशकाय । त्वत्पादपद्माश्रितरक्षकाय श्री नील-
कण्ठाय नमश्शिवाय ॥ १

ध्यायन्ति ये त्वां यतयः स्तुवन्ति हृदंबुजे दीप-
समप्रकाशम् । नासाग्रविन्यस्तविलोचनाय श्री नील-
कण्ठाय नमश्शिवाय ॥ २

सर्गस्थितिध्वंसनकारणाय यमादियोगाष्टक -
सिद्धिदाय । तपस्विनां शीघ्रफलप्रदाय श्री ... ॥ ३

वेदादिरूपाय त्रिलोचनाय वेदान्तवेद्याय दिग-
म्बराय । विभूतिभूषाय जटाधराय श्री ... ॥ ४

उग्राय संसारभयापहाय ज्ञानप्रदायाशुसुख -
प्रदाय । कालान्तकाय प्रळयानिलाय श्री ... ॥ ५

विधातृरूपाय जगद्धिताय रमेशरूपाय सदा-
शिवाय । अनन्तरूपाय चतुर्भुजाय श्री ... ॥ ६

विश्वैकवन्द्याय कळाधराय समस्तलोकैकसमाश्र-
याय । कुठारपाशाङ्कुशपालिने च श्री ... ॥ ७

शर्वाय सर्वप्रियकारणाय पिनाकिने बाणधराय
तुभ्यम् । गौरीप्रियायाखिलपालकाय श्री ... ॥ ८

इति स्तुत्वा महादेवं प्रणम्य च पुनः पुनः ।
निदध्यू ऋषयस्तत्र सुराः पद्मभुवादयः ॥ ९

इति श्रीस्कान्दपुराणे श्रीगरळपुरीनाथमाहात्म्ये
श्री नीलकण्ठनमश्शिवायाष्टकम् ॥

॥ शिवापदानदण्डकस्तोत्रम् ॥

शैलादिकृतनिषेवण कैलासशिखरभूषण तत्त्वार्थ गोचरचन्द्रार्धशेखर शापायुधकुलार्थ्यस्मितापाङ्ग कोपारुणकटाक्षभस्मितानङ्ग सस्मितापाङ्ग ऊरीकृत विभूतिदिव्याङ्गराग गौरीपरिगृहीतसव्याङ्गभाग अङ्गानुषङ्गपावितनरास्थिदेश गङ्गातरङ्गभासितजटाप्रदेश वन्दनाभिरताखण्डलस्यन्दनायितभूमण्डल आश्रितदासतापसकदम्ब चक्रीकृतार्कशीतकरबिम्ब आहतपुराणवेतण्ड स्त्रीकृतसुमेरुकोदण्ड खर्वीकृतासुर मदानुपूर्वीविकास दर्वीकरेश्वर गृहीतमौर्वीविलास वीणामुनीन्द्रख्यापितगरिम पौरुषबाणाधिकार स्थापितपरमपूरुष अनिलाशनविहितनैपथ्यकमलासन विहितसारथ्य विश्वाधिकत्वपरिकलितोपलम्भ अश्वायिताद्यवचोगुम्भ कुन्दस्मयहर कान्तिप्रकर मन्दस्मितलवशान्तत्रिपुर नादबिन्दुकलाभिज्ञास्पद भूरि-

भद्र स्वेदबिन्दुलवाविर्भावितवीरभद्र त्रस्तरक्षापरतन्त्र
ध्वस्तदक्षाध्वरतन्त्र किरीटनीतविविधवेधःकपाल
चपेटाघात शिथिलभास्वत्कपोल विजृम्भितविक्रमो-
द्दण्ड स्तम्भितचक्रिदोर्दण्ड ब्रह्मस्तवोचितमहाहर्ष
जिह्मस्वभावजनदुराधर्ष वसुन्धराधरसुतोपलालन
जरन्दरासुरशिरोनिपातन कोपाहतपतितान्तक -
व्यापादितसमदान्धक परसंहननजटासंभृतपरभाग -
गौर नरसिंहनियमनालम्बितशरभावतार प्रपन्नभय-
मोचन विभिन्नभगलोचन प्रपञ्चदहनकारक विरिञ्च-
वदनहारक सञ्चारपूतमन्दर पञ्चायुधातिसुन्दर अप-
नीतदक्षानन अभिनीताभिक्षाटन धारितमेरुकानन
कुसुममालिकालङ्कार दारितदारुकावनकुलपालिका -
हङ्कार समावर्जितभक्तमानसानुसार परावर्तितदृग्-
वापसाभिचारवैयासिकोक्तिगोचरवैयाघ्रकृत्तिभासुर
गतपरिकर्मकृतस्पृह कृतकरिचर्मपरिग्रह स्वध्यानश-
मितपातकप्रसङ्ग विध्यादिविबुधपूजितस्वलिङ्ग शान्त-

मानसानुरोध क्षान्ततापसापराध सालानलवलन-
भीषण हालाहलगरलभूषण अरुणांशुकन्दलमणिफणि-
कुण्डल चरणाग्रयंत्रित दशकन्धरभुजमण्डल आनन्द-
ताण्डव नटनानुबन्ध गोविन्दपूजितचरणारविन्द
विनयानतामृताशन सहस्राहितप्रमोद तनयाभिलाषि-
माधवतपस्याकृतप्रसाद दिव्यास्त्रदानतोषितभृगुसूनु-
नम्य सन्ध्याभागभावितहरिरूपरम्यवन्दितागतश्रुतिधर
नन्दिपालित प्रतीहार बुद्धनानारहस्यशतमन्युमुखामर-
भक्तिगोचर दुग्धपानार्थं तपस्यदुपमन्युविश्राणित-
दुग्धसागर अधिकचालित दुष्टपीडाकरण हरिविरि-
ञ्चापदृष्ट चूडाचरण अश्वद्धर्म वृषाधार अधर्मप्रक्षाळ-
नादर पञ्चब्रह्ममयाकारवेदाश्ववरोहितस्वाम्यश्वेताश्वत-
रोपनिषदूम्य चापल्यरहितरम्यस्वभाव अखर्वमखादि-
राज्यप्रताप अधर्वशिखानुवाद्यस्वरूप अगर्वनरस्तुति-
मुदित अधर्ववरस्तुतिविदित नादान्तविभावनीय
प्रणतार्तिहर प्रणवार्थसार मुग्धलावण्याधार मुद्ध-

चैतन्याकार आशीविषधारक काशीपुरनायक हृद-
म्बुजकृतविलास चिदम्बरकृतनिवास आकर्णचलिता-
पाङ्ग गोकर्णरचितानङ्ग घोराशुरपुर धूमकेतु स्मित
वाराकरगत रामसेतु स्थित रक्षणलीलाविलास
दक्षिणकैलासवास आताम्रलोलनयन एकाम्रमूलभवन
आभीलविधुसेवन श्रीशैलशिखरपावन द्राक्षामधुर
वाग्गुम्भ रुद्राक्षरुचिरदोस्तम्भ कालकण्ठरुचिघटित-
लावण्य नीलकण्ठमाखिनिहितकारुण्य सेवापरतन्त्र-
पालक शैवागमतन्त्रकारक सर्गस्थितिसंहृतित्रयस्तेय
गर्भश्रुतियन्त्रित गायत्र्यनुसंधेय अध्यासितवर-
निकुञ्जगृहहिमाहार्य अध्यापितहरिविरिञ्चिमुख
शिवाचार्य अर्चितानन्तविहर सच्चिदानन्दशिशिर
विजयीभव विजयीभव ॥

दृष्ट्वा कौस्तुभमप्सरोगण-
मपि प्रक्रान्तवादा मिथो

गीर्वाणाः कतिवा न सन्ति
भुवने भारा दिवः केवलम्।
निष्क्रान्ते गरळे द्रुते
सुरगणे निश्चेष्टिते विष्टपे
माभैष्टेति गिराविरास धुरि
यो देव त्वमेव स्तुमः ॥

॥ इति श्री नीलकण्ठमखीन्द्रविरचितं शिवापदानगद्यस्तोत्रम् ॥

॥ शिवमङ्गळाष्टकम् ॥

भवाय चन्द्रचूडाय निर्गुणाय गुणात्मने ।
कालकालाय रुद्राय नीलग्रीवाय मङ्गळम् ॥ १
वृषारूढाय भीमाय व्याघ्रचर्माम्बराय च ।
पशूनां पतये तुभ्यं गौरीकान्ताय मङ्गळम् ॥ २
भस्मोद्धूळितदेहाय व्याळयज्ञोपवीतिने ।
रुद्राक्षमालाभूषाय व्योमकेशाय मङ्गळम् ॥ ३
सूर्यचन्द्राग्निनेत्राय नमः कैळासवासिने ।
सच्चिदानन्दरूपाय प्रमथेशाय मङ्गळम् ॥ ४
मृत्युञ्जयाय साम्बाय सृष्टिस्थित्यन्तकारिणे ।
त्रियम्बकाय शान्ताय त्रिलोकेशाय मङ्गळम् ॥ ५
गङ्गाधराय सोमाय नमो हरिहरात्मने ।
उग्राय त्रिपुरघ्नाय वामदेवाय मङ्गळम् ॥ ६
सद्योजाताय शर्वाय भव्यज्ञानप्रदायिने ।
ईशानाय नमस्तुभ्यं पञ्चवक्त्राय मङ्गळम् ॥ ७

सदाशिवस्वरूपाय नमस्तत्पुरुषाय च ।
अघोराय च घोराय महादेवाय मङ्गळम् ॥ ८
श्रीचामुण्डाप्रेरितेन रचितं मङ्गळास्पदम् ।
तस्याभीष्टप्रदं शम्भोः यः पठेन्मङ्गळाष्टकम् ॥ ९

॥ इति श्रीशिवमङ्गळाष्टकम् ॥

॥ शिवनक्षत्रमालिकास्तोत्रम् ॥

श्रीकण्ठस्साम्ब ईशानः पार्वतीप्राणवल्लभः ।
वृषारूढो विष्णुसखश्शिव एव गतिर्मम ॥ १

परमात्मा परब्रह्म पञ्चास्यः परमेश्वरः ।
परात्परतरं धाम शिवएव गतिर्मम ॥ २

निरालम्बो निराकारो निर्मलो निरुपद्रवः ।
नित्यशुद्धो निष्कळङ्कश्शिवएव गतिर्मम ॥ ३

शुद्धस्फटिकसङ्काशस्सूर्यचन्द्राग्निलोचनः ।
शूलटङ्कधरश्शर्व श्शिवएव गतिर्मम ॥ ४

भूरथो विष्णुबाणश्च वेदाश्वो ब्रह्मसारथिः ।
त्रिपुरारिर्मेरुधन्वा शिवएव गतिर्मम ॥ ५

व्याघ्रचर्माम्बरधरो व्याळयज्ञोपवीतवान् ।
भक्ताभीष्टप्रदो नित्य श्शिवएव गतिर्मम ॥ ६

कालकालो महाकालो भस्मोद्धूलितविग्रहः ।
कैलासनिलयश्शम्भु श्शिवएव गतिर्मम ॥ ७

रुद्राक्षमालाभरणस्त्रिपुण्ड्राङ्कितमस्तकः ।
प्रमथेशो महादेव शिवएव गतिर्मम ॥ ८
गौरीकान्तो वामदेवो नीलग्रीवो दिगम्बरः ।
गङ्गाधरश्चन्द्रचूडश्शिवएव गतिर्मम ॥ ९
मूर्तित्रयस्वरूपाढ्यो गुणत्रयविवर्जितः ।
कार्यत्रयविधाता च शिवएव गतिर्मम ॥ १०
सद्योजातो भैरवश्च मार्कण्डेयवरप्रदः ।
विष्णुचक्रप्रदाता च शिवएव गतिर्मम ॥ ११
अघोरमूर्तिस्सर्वेशो वेदवेद्यो दयानिधिः ।
कपालयुक्तहस्ताब्ज शिवएव गतिर्मम ॥ १२
अष्टमूर्तिस्तत्पुरुष स्तथैकादश मूर्तिमान् ।
पञ्चविंशति लीलात्मा शिवएव गतिर्मम ॥ १३
शतरुद्रस्वरूपाढ्यो नन्दिभृङ्गि वरप्रदः ।
सदाशिवोऽनन्तरूपश्शिवएव गतिर्मम ॥ १४
महालिङ्गोद्भवश्शान्तो रुण्डमालाविभूषणः ।
त्रियम्बको विरूपाक्ष शिवएव गतिर्मम ॥ १५

निरञ्जनः परंज्योति स्सच्चिदानन्दविग्रहः ।
मायाशबररूपाढ्य शिवएव गतिर्मम ॥ १६
लिङ्गरूपो दशभुजश्चोग्रःपशुपतिर्भवः ।
कामेश्वरो जगद्रक्षशिवएव गतिर्मम ॥ १७
कल्याणसुन्दराकारः कामितार्थवरप्रदः ।
हालास्यलीलालोलश्च शिवएव गतिर्मम ॥ १८
मृत्युञ्जयो महारौद्रस्सोमस्स्कन्दो महेश्वरः ।
बाणासुरपरित्राता शिवएव गतिर्मम ॥ १९
जलन्धरशिरश्छेत्ता नागालङ्कारभूषितः ।
गजचर्माम्बरधरश्शिवएव गतिर्मम ॥ २०
भवरोगहरः पूज्यो भयकृद्भयनाशनः ।
दक्षिणामूर्ति रूपाढ्य शिवएव गतिर्मम ॥ २१
सन्ध्यानटो हरो रुद्रो भस्मासुरवरप्रदः ।
पिनाकभृन्मन्मथारिश्शिवएव गतिर्मम ॥ २२
मृडो ब्रह्मशिरश्छेत्ता विनायकवरप्रदः ।
उमामहेश्वरो देवश्शिवएव गतिर्मम ॥ २३
महाप्रभु र्महायोगी भूतसङ्घसमावृतः ।

नारदादिमुनिस्तुत्य शिवएव गतिर्मम ॥ २४
दक्षाध्वरहरो वीरः कालकोटिविषाशनः ।
गणेशशास्तृजनक शिवएव गतिर्मम ॥ २५
कुबेरमित्रो भीमेशो गिरीशो मोहिनीप्रियः ।
देवासुरादिसंसेव्यशिवएव गतिर्मम ॥ २६
स्थाणुर्हरिहरात्मा च रामतारकमन्त्रदः ।
शङ्करश्चार्धनारीशशिवएव गतिर्मम ॥ २७
श्रीचामुण्डाकृपापूर्ण शिवध्यानपरायणः ।
श्रीकृष्णेन्द्रो भक्तियुक्तशिवनक्षत्रमालिकाम् ॥ २८
रचयित्वार्पयामास श्रीकण्ठहृदयाम्बुजे ।
त्रिसन्ध्यं यः पठेद्भक्त्या शिवसायुज्यमाप्नुयात् ॥

मल्लिकावृत्तम्—

रत्नशैलनगावनीशकचन्द्रपक्षवहायने सिद्धमास-सिताष्टमी शशिवासरे कनकोज्वला । चन्द्रशेखर-पादयोः खखपूर्ण रूपमिताक्षरा कृष्णभूपसमर्पिता गजभानुनाम सुमालिका ॥ ३०

॥ इति श्रीशिवनक्षत्रमालिकास्तोत्रम् ॥

॥ श्रीशङ्कराचार्याष्टोत्तरशतनामस्तोत्रम् ॥

श्रीशङ्कराचार्यवर्यो ब्रह्मानन्दप्रदायकः ।
अज्ञानतिमिरादित्यस्सुज्ञानाम्बुधिचन्द्रमाः ॥ १
वर्णाश्रमप्रतिष्ठाता श्रीमान्मुक्तिप्रदायकः ।
शिष्योपदेशनिरतो भक्ताभीष्टप्रदायकः ॥ २
सूक्ष्मतत्त्ववरहस्यज्ञः कार्याकार्यप्रबोधकः ।
ज्ञानमुद्राञ्चितकर शिष्यदुःखापहारकः ॥ ३
परिव्राजाश्रमोद्धर्ता सर्वतन्त्रस्वतन्त्रधीः ।
अद्वैतस्थापनाचार्यस्साक्षाच्छङ्कररूपभृत् ॥ ४
षण्मतस्थापनाचार्य स्त्रयीमार्ग प्रकाशकः ।
वेदवेदान्ततत्त्वज्ञो दुर्वादिमतखण्डनः ॥ ५
वैराग्यनिरतश्शान्तस्संसारार्णवतारकः ।
प्रसन्नवदनाम्भोजः परमार्थप्रकाशकः ॥ ६
पुराणस्मृतिसारज्ञो नित्यतृप्तो महाशुचिः ।
नित्यानन्दो निरातङ्को निस्सङ्गो निर्मलात्मकः ॥ ७

निर्ममो निरहङ्कारो विश्ववन्द्यपदाम्बुजः ।
सत्त्वप्रधानस्सद्भावस्सङ्कल्पातीतगुणोज्वलः ॥ ८
अनघस्सारहृदयस्सुधीस्सारस्वतप्रदः ।
सत्यात्मा पुण्यशीलश्च साङ्ख्ययोगविलक्षणः ॥ ९
तपोराशि र्महातेजा गुणत्रयविभागवित् ।
कलिघ्नः कालकर्मज्ञ स्तमोगुणनिवारकः ॥ १०
भगवान्भारतीजेता शारदाह्वानपण्डितः ।
धर्माधर्मविभावज्ञो लक्ष्यभेदप्रदर्शकः ॥ ११
नादबिन्दुकळाभिज्ञो योगिहृत्पद्मभास्करः ।
अतीन्द्रियज्ञाननिधिर्नित्यानित्यविवेकवान् ॥ १२
चिदानन्दश्चिन्मयात्मा परकायप्रवेशकृत् ।
अमानुषचरित्राढ्यः क्षेमदायी क्षमाकरः ॥ १३
भव्यो भद्रप्रदो भूरि महिमा विश्वरञ्जकः ।
स्वप्रकाशस्सदाधारो विश्वबन्धुश्शुभोदयः ॥ १४
विशालकीर्तिर्वागीशस्सर्वलोकहितोत्सुकः ।
कैलासयात्रासंप्राप्त चन्द्रमौळिप्रपूजकः ॥ १५

कांच्यां श्रीचक्रराजाख्ययन्त्रस्थापनदीक्षितः ।
श्रीचक्रात्मक ताटङ्क तोषिताम्बामनोरथः ॥ १६
श्रीब्रह्मसूत्रोपनिषद्भाष्यादिग्रन्थकल्पकः ।
चतुर्दिक्चतुरान्नायप्रतिष्ठाता महामतिः ॥ १७
द्विसप्तति मतोच्छेत्ता सर्वदिग्विजयप्रभुः ।
काषायवसनोपेतो भस्मोद्धूलितविग्रहः ॥ १८
ज्ञानात्मकैकदण्डाढ्यः कमण्डलुलसत्करः ।
गुरुभूमण्डलाचार्यो भगवत्पादसंज्ञकः ॥ १९
व्यासस्सन्दर्शनप्रीतः ऋष्यशृङ्गपुरेश्वरः ।
सौन्दर्यलहरीमुख्यबहुस्तोत्रविधायकः ॥ २०
चतुष्षष्टिकळाभिज्ञो ब्रह्मराक्षसपोषकः ।
श्रीमन्मण्डनमिश्राख्यस्वयंभूजयसञ्जुतः ॥ २१
तोटकाचार्यसम्पूज्य पद्मपादार्चिताङ्घ्रिकः ।
हस्तामलकयोगीन्द्र ब्रह्मज्ञानप्रदायकः ॥ २२
सुरेश्वराख्य सच्छिष्य सन्यासाश्रमदायकः ।
नृसिंहभक्तस्सद्रत्नगर्भहेरम्बपूजकः ॥ २३

व्याख्यासिंहासनाधीशो जगत्पूज्यो जगद्गुरुः ।
इति श्रीमच्छङ्कराचार्यसर्वलोकगुरोः परम् ॥ २४
नाम्नामष्टोत्तरशतं भुक्तिमुक्तिफलप्रदम् ।
त्रिसंध्यं यः पठेद्भक्त्या सर्वान्कामानवाप्नुयात् ॥

॥ इति श्रीमच्छङ्कराचार्याष्टोत्तरशतनामस्तोत्रम् ॥

॥ श्रीविद्यारण्याष्टोत्तरशतनामस्तोत्रम् ॥

विद्यारण्यमहायोगी महाविद्याप्रकाशकः ।
श्रीविद्यानगरोद्धर्ता विद्यारत्नमहोदधिः ॥ १
रामायणमहासत्र कोटिमन्त्रप्रकाशकः ।
श्रीदेवीकरुणापूर्णः परिपूर्णमनोरथः ॥ २
विरूपाक्षमहाक्षेत्र स्वर्णवृष्टिप्रकल्पकः ।
वेदत्रयोल्लसद्भाष्यकर्ता तत्वार्थकोविदः ॥ ३
भगवत्पादनिर्णीत सिद्धान्तस्थापनप्रभुः ।
वर्णाश्रमव्यवस्थाता निगमागमसारवित् ॥ ४
श्रीमत्कर्णाटराज्यश्री सम्पत्तिसहासनप्रदः ।
श्रीमद्बुक्कमहीपालराज्यपट्टाभिषेककृत् ॥ ५
आचार्यकृतभाष्यादि ग्रन्थवृत्तिप्रकल्पकः ।
सकलोपनिषद्भाष्यदीपिकादिप्रकाशकृत् ॥ ६
सर्वशास्त्रार्थतत्वज्ञो मन्त्रशास्त्राब्धिमन्दरः ।
विद्वन्मणि शिरश्लाघ्य बहुग्रन्थ विधायकः ॥ ७

सारस्वतसमुद्धर्ता सारासारविचक्षणः ।
श्रौतस्मार्तसदाचार संस्थापनधुरन्धरः ॥ ८
वेदशास्त्र बहिर्भूत दुर्मताम्भोधिशोषकः ।
दुर्वादिगर्वदावाग्निः प्रतिपक्षेभकेसरी ॥ ९
यशो जैवातृकज्योत्स्ना प्रकाशितदिगन्तरः ।
अष्टाङ्गयोगनिष्णातस्साङ्गषयोगविशारदः ॥ १०
राजाधिराजसन्दोह पूज्यमानपदाम्बुजः ।
महावैभवसम्पन्न औदार्यश्रीनिवासभूः ॥ ११
तिर्यगान्दोळिकामुख्य समस्तविरुदाञ्चितः ।
महाभोगी महायोगी वैराग्यप्रथमाश्रयः ॥ १२
श्रीमान्परमहंसादिसद्गुरुः करुणानिधिः ।
तपःप्रभावनिर्धूतदुर्वारकलिवैभवः ॥ १३
निरन्तरशिवध्यान शोषिताखिलकल्मषः ।
निर्जिताराति षड्वर्गो दारिद्र्योन्मूलनक्षमः ॥ १४
जितेन्द्रिय स्सत्यवादी सत्यसन्धो दृढव्रतः ।
शान्तात्मा सुचरित्राढ्य स्सर्वभूतहितोत्सुकः ॥ १५

कृतकृत्यो धर्मशीलो दान्तो लोभविवर्जितः ।
महाबुद्धिर्महावीर्यो महातेजा महामनाः ॥ १६
तपोराशिर्ज्ञानराशिः कल्याणगुणवारिधिः ।
नीतिशास्त्रसमुद्धर्ता प्राज्ञमौलिशिरोमणिः ॥ १७
शुद्धसत्वमयो धीरो देशकालविभागवित् ।
अतीन्द्रियज्ञाननिधिर्भूतभाव्यर्थकोविदः ॥ १८
गुणत्रयविभागज्ञस्सन्यासाश्रमदीक्षितः ।
ज्ञानात्मकैकदण्डाढ्यः कौसुम्भवसनोज्ज्वलः ॥ १९
रुद्राक्षमालिकाधारी भस्मोद्धूलितदेहवान् ।
हस्तमालालसद्वस्त्र त्रिपुण्ड्राङ्कितमस्तकः ॥ २०
धरासुरतपस्सम्पत्फलं शुभमहोदयः ।
चन्द्रमौलीश्वर श्रीमत्पादपद्मार्चनोत्सुकः ॥ २१
श्रीमच्छङ्करयोगीन्द्रचरणासक्तमानसः ।
रत्नगर्भगणेशान प्रपूजनपरायणः ॥ २२
शारदाम्बादिव्यपीठ सपर्यातत्पराशयः ।
अव्याजकरुणामूर्तिः प्रज्ञानिर्जितगीष्पतिः ॥ २३

सुज्ञान सत्कृतजगल्लोकानन्दविधायकः ।
वाणीविलासभवनं ब्रह्मानन्दैकलोलुपः ॥ २४
निर्ममो निरहङ्कारो निरालस्यो निराकुलः ।
निश्चिन्तो नित्यसन्तुष्टो नियतात्मा निरामयः ॥ २५
गुरुभूमण्डलाचार्यो गुरुपीठप्रतिष्ठितः ।
सर्वतन्त्रस्वतन्त्रश्च यन्त्रमन्त्रविचक्षणः ॥ २६
शिष्टेष्टफलदाता च दुष्टनिग्रहदीक्षितः ।
प्रतिज्ञातार्थनिर्वोढा निग्रहानुग्रहप्रभुः ॥ २७
जगत्पूज्यस्सदानन्दस्साक्षाच्छङ्करूपभृत् ।
महालक्ष्मी महामन्त्र पुरश्चर्यापरायणः ॥ २८
विद्यारण्यमहायोगि नाम्नामष्टोत्तरं शतम् ।
यः पठेत्सततं सम्पत्सारस्वतनिधिर्भवेत् ॥ २९

॥ इति श्रीविद्यारण्याष्टोत्तरशतनामस्तोत्रम् ॥

॥ आम्नायस्तोत्रम् ॥

चतुर्दिक्षु प्रसिद्धासु प्रसिद्ध्यर्थं स्वनामतः ।
चतुरोथ मठान् कृत्वा शिष्यान्संस्थापयद्विभुः ॥ १
चकार संज्ञामाचार्यश्चतुरां नामभेदतः ।
क्षेत्रं च देवतां चैव शक्तिं तीर्थं पृथक्पृथक् ॥ २
सम्प्रदायं तथाम्नायभेदं च ब्रह्मचारिणाम् ।
एवं प्रकल्पयामास लोकोपकरणाय वै ॥ ३
दिग्भागे पश्चिमे क्षेत्रं द्वारकाशारदामठः ।
कीटवाळस्सम्प्रदाय स्तीर्थाश्रमपदे उभे ॥ ४
देवस्सिद्धेश्वरश्शक्ति र्भद्रकाळीति विश्रुता ।
स्वरूपब्रह्मचार्याख्य आचार्यः पद्मपादकः ॥ ५
विख्यातं गोमतीतीर्थं सामवेदश्च तद्व्रतम् ।
जीवात्मपरमात्मैक्यबोधो यत्र भविष्यति ॥ ६
विख्यातं तन्महावाक्यं वाक्यं तत्त्वमसीतिच ।
द्वितीयः पूर्वदिग्भागे गोवर्धनमठः स्मृतः ॥ ७

भोगवालस्सम्प्रदाय स्सत्रारण्यवने पदे ।
तस्मिन् देवो जगन्नाथः पुरुषोत्तमसंज्ञितः ॥ ८
क्षेत्रं च वृषला देवी सर्वलोकेषु विश्रुता ।
प्रकाश ब्रह्मचारीति हस्तामलकसंज्ञितः ॥ ९
आचार्यः कथितस्तत्र नाम्ना लोकेषु विश्रुतः ।
खातं महोदधिस्तीर्थं ऋग्वेद स्समुदाहृतः ॥ १०
महावाक्यं च तत्रोक्तं प्रज्ञानं ब्रह्मचोच्यते ।
उत्तरस्यां श्रीमठस्यात् क्षेत्रं बदरिकाश्रमम् ॥ ११
देवो नारायणो नामशक्तिः पूर्णगिरीतिच ।
सम्प्रदायोनन्दवाळस्तीर्थं चाळकनन्दिका ॥ १२
आनन्दब्रह्मचारीति गिरिपर्वतसागराः ।
नामानि तोटकाचार्यो वेदोधर्वणसंज्ञिकः ॥ १३
महावाक्यं च तत्रायमात्मा ब्रह्मेति कीर्त्यते ।
तुरीयो दक्षिणस्यां च शृङ्गेर्यां शारदामठः ॥ १४
मलहानिकरं लिङ्गं विभाण्डकसुपूजितम् ।
यत्रास्ते ऋष्यशृङ्गस्य महर्षेराश्रमो महान् ॥ १५

वराहो देवता तत्र रामक्षेत्रमुदाहृतम् ।
तीर्थं च तुङ्गभद्राख्यं शक्तिः श्रीशारदेति च ॥ १६
आचार्यस्तत्र चैतन्य ब्रह्मचारीति विश्रुतः ।
वार्तिकादि ब्रह्मविद्या कर्ता यो मुनिपूजितः ॥ १७
सुरेश्वराचार्य इति साक्षाद्ब्रह्मावतारकः ।
सरस्वती पुरी चेति भारत्यारण्यतीर्थकौ ॥ १८
गिर्याश्रममुखानि स्युस्सर्वनामानि सर्वदा ।
सम्प्रदायो भूरिवाळो यजुर्वेद उदाहृतः ॥ १९
अहं ब्रह्मास्मीति तत्र महावाक्यमुदीरितम् ।
चतुर्णां देवताशक्ति क्षेत्रनामान्यनुक्रमात् ॥ २०
महावाक्यानि वेदांश्च सर्वमुक्तं व्यवस्थया ।
इति श्रीमत्परमहंसपरिव्राजकभूपतेः ॥ २१
आम्नायस्तोत्रपठनादिहामुत्र च सद्गतिम् ।
प्राप्यान्ते मोक्षमाप्नोति देहान्ते नात्र संशयः ॥ २२

इत्याम्नायस्तोत्रम् ॥

॥ श्रीमच्छङ्करभगवच्चरणस्तुत्यष्टकम् ॥

श्रुतीनामाक्रीडः प्रथितपरहंसोचितगतिर्निजे सत्ये धात्रि त्रिजगदतिवर्तिन्यभिरतः । असौ ब्रह्मेवास्मिन्नखलु विशये किंतु कलये बृहेरर्थं साक्षादनुपचरितं केवलतया ॥ १

मितं पादेनैव त्रिभुवनमिहैकेन महसा विशुद्धं तत्सत्वं स्थितिजानिलयेष्वप्यनुगतम् । दशाकारातीतं स्वमहिमनि निर्वेदरमणं ततस्तं तद्विष्णोः परमपदमाख्याति निगमः ॥ २

न भूतेष्वासङ्गः क्वचन नगवाचा विहरणं न भूत्या संसर्गो न परिचितता भोगिभिरपि । तदप्यायान्तस्त्रिपुरदहनात्केवलदशा तुरीयं निर्द्वन्द्वं शिवमतितरां वर्णयति तम् ॥ ३

न धर्मस्सौवर्णो न पुरुषफलेषु प्रवणता न चैवाहोरात्र स्फुरदरियुतः पार्थिवरथः । असाहायेनैवं

सवि विततपुर्यष्टकजये कथं तन्न ब्रूयान्निगमनिकुरम्बः परांशिवम् ॥ ४

दुःखासार दुरन्त दुष्कृतघनां दुस्संसृतिप्रावृषं दुर्वारामिह दारुणां परिहरन्दूरादुदाराशयः । खण्डप्रतिपक्षपण्डितयशो नाळीकनाळाङ्कुरग्रासो - हंसकुलावतंसपदभाक्सन्मानसे क्रीडति ॥ ५

क्षीरं ब्रह्म जगच्च नीरमुभयं तद्योगमभ्यागतं दुर्भेदं त्वितरेतरं चिरतरं सम्यग्विभक्तीकृतम् । येनाशेषविशेषदोहलहरी मासेदुषीं शेमुषीं सोयं शीलवतां पुनाति परमो हंसो द्विजात्यग्रणीः ॥ ६

नीरक्षीरनयेन तथ्यवितथे संपिण्डिते पण्डितैर्दुर्बोधेसकलैर्विवेचयति यः श्रीशङ्कराख्यो मुनिः । हंसोयं परमोस्तु ये पुनरिहाशक्तास्समस्तास्स्थिता ज़ृम्भान्निम्बफलाशनैकरसिकान् काकानमून्मन्महे ॥

दृष्टिं यं प्रगुणीकरोति तमसा बाह्येन मन्दीकृतां नाळीकप्रियतां प्रयाति भजते मित्रत्वमव्याह-

तम् । विश्वस्योपकृते विलुम्पति मुहुश्चक्रस्य चार्तिं घनां हंसस्सोयमभिष्यनक्ति महतां जिज्ञास्यमर्थं मुहुः ॥ ८

इति श्रीविद्यारण्यमुनिरचितं श्रीमच्छङ्करभगवच्चरण-स्तुत्यष्टकम् ॥

॥ शिवमातृकावर्णमालास्तोत्रम् ॥

श्रीसूत उवाचः—

अथातस्सम्प्रवक्ष्यामि शिवस्थानं समासतः ।
यत्र सञ्चिन्त्य देवेशं कैवल्यं लभते नरः ॥ १

पुरा नारायणः श्रीमान् किरीटी गरुडध्वजः ।
श्रीमत्कैलासपर्यन्ते तताप परमं तपः ॥ २

भस्मोद्धूलितसर्वाङ्ग स्त्रिपुण्ड्राङ्कितमस्तकः ।
रुद्राक्षमालाभरणो जटावत्कलमण्डितः ॥ ३

तपसा तप्तदेहस्य केशवस्य महात्मनः ।
प्रादुरासीन्महादेवश्शङ्करः करुणाकरः ॥ ४

तं दृष्ट्वा पुण्डरीकाक्षो महादेवं घृणानिधिम् ।
अम्बिकासहितं रुद्रं चन्द्रमौलिं सनातनम् ॥ ५

प्रणम्य दण्डवद्भूमौ भक्त्या परमया सह ।
स्तोतुमारभते विष्णु स्सर्वभूतहितावहम् ॥ ६

अकाराय नमस्साक्षादनन्तानन्तमूर्तये ॥

आत्मभूताय सर्वेषा मतिशुद्धाय शूलिने ॥ ७
आकारायातिशुद्धाय साक्षिणे सर्ववस्तुनः ।
अम्बिकापतये तुभ्य मसङ्गाय नमोनमः ॥ ८
इकारायेश्वराख्याय सर्वसिद्धिकराय च ।
इन्द्रादिलोकपालाना मियत्ताकारिणे नमः ॥ ९
ईकाराय वरिष्ठाय वाञ्छितार्थप्रदाय च ।
वञ्चकानामलभ्याय वसुदाय नमोनमः ॥ १०
उकारायोग्रजन्तूनामुग्ररूपाय शूलिने ।
उत्तमानां तु जन्तूनामुपास्याय नमोनमः ॥ ११
ऊकारायोपवीताय ह्यूर्जितायोत्तमात्मने ।
उत्तम ज्ञानगम्याय नमस्ते परमात्मने ॥ १२
ऋकारायादिभूताय रामपूर्वार्चितायच ।
ऋचामर्थस्वरूपाय नमस्सत्यपरात्मने ॥ १३
ॠकाराय निसर्गाय नित्यतृप्ताय शम्भवे ।
रसादिभूतरूपाय नमश्शुद्धचिदात्मने ॥ १४
ऌकाराय लसद्दण्डमण्डिताभरणायच ।

लिङ्गलिङ्गथादिहीनाय लिङ्गरूपाय ते नमः ॥ १५
लृकाराय लयस्थाय ध्वंसकायादिहेतवे ।
लक्षारुणशरीराय लाभस्थानाय वै नमः ॥ १६
एकाराय नमश्चश्च दिदन्तासाक्षिणे तथा ।
अहन्तासाक्षिणे साक्षात्प्रत्यगद्वयवस्तुने ॥ १७
ऐकारायामलज्ञानप्रभावापरिशीलिनाम् ।
आत्मरूपतया नित्यं प्रतीताय नमो नमः ॥ १८
ओङ्काराय विरिञ्चाय विष्णवे रुद्रमूर्तये ।
वाच्यवाचकहीनाय स्वयं भासाय ते नमः ॥ १९
औकाराय महेशाय महामन्त्रार्थरूपिणे ।
महादेवाय मात्रादि प्रपञ्चाय नमोनमः ॥ २०
बिन्दुरूपाय बीजाय बीजाधिष्ठानरूपिणे ।
बीजनाशकरज्ञान स्वरूपाय नमोनमः ॥ २१
विसर्जनीय रूपाय विस्मयाय महात्मने ।
विसर्जनीयनिष्ठानां विशेषार्थाय वै नमः ॥ २२
ककाराय कपूर्वादि देवतापूजितायच ।

कारणग्रामसंहर्त्रे कालातीताय वै नमः ॥ २३
खकाराय खपूर्वादि भूतपञ्चकहेतवे ।
खमूर्ताय खलप्रज्ञा गोचराय नमोनमः ॥ २४
गकाराय गणेशाय गणवृन्दार्चितायच ।
गह्वराय गुह्याय गुणातीताय ते नमः ॥ २५
घकाराय घनाकार घातकाय घनात्मने ।
घटादि जगदाकार रहिताय नमोनमः ॥ २६
ङकाराय ङमन्त्रार्थ स्वरूपाय शिवात्मने ।
ङा ङी ङू संज्ञितार्थाना मगम्याय नमोनमः ॥ २७
चकारायच मन्त्रार्थ स्वरूपायामितात्मने ।
चमन्त्रार्थनिषण्णानाममृताय नमोनमः ॥ २८
छकाराय छलालस्य छादनादिविशेषतः ।
छादन च्छन्दन च्छन्न विभागाय नमोनमः ॥ २९
जकाराय जगच्छक्ति स्वरूपाय जयार्थिनाम् ।
जयप्रदाय देवाय जन्ममोहाय ते नमः ॥ ३०
झकाराय झमन्त्रार्थ स्वरूपायामृतात्मने ।

झमध्य चन्द्रबिम्बाय नमस्साम्बाय शम्भवे ॥ ३१
अकाराय अमन्त्रार्थं स्वरूपाय अमूर्तये ।
ज्ञप्तिमात्रैकनिष्ठानां मुक्तिदाय नमोनमः ॥ ३२
टकाराय ट टा टी टू पूर्वोक्तैस्तु महारवैः ।
अर्चिताय सुरश्रेष्ठै रसुरैश्च नमोनमः ॥ ३३
ठकाराय ठमन्त्रार्थं स्वरूपाय ठमन्त्रतः ।
ठठाद्रिगणपूज्याय ठमध्याय नमोनमः ॥ ३४
डकाराय ड डा डी डू डे डो डै श्च महारवैः ।
डामरै रभिपूज्याय नमोनृत्तप्रियायच ॥ ३५
ढकाराय ढमन्त्रार्थं परिज्ञानवतां नृणाम् ।
ढसंज्ञित महानन्दप्रदाय सततं नमः ॥ ३६
णकाराय ण णा णी णू णे णै णो णौ रवैस्सदा ।
णाकिनी गणपूज्याय णसंज्ञाय नमोनमः ॥ ३७
तकाराय तशब्दार्थं स्वरूपाय तथायच ।
तत्त्वमित्यभिपूज्याय तत्त्वभूतायवै नमः ॥ ३८
थकाराय थमन्त्रार्थं स्वरूपायाथ संज्ञितैः ।

महागणैश्च पूज्याय थमध्याय नमोनमः ॥ ३९
दकाराय दयारूप महाशक्तिमयाय च ।
देशजाति विहीनाय दिवारात्रायवै नमः ॥ ४०
धकाराय धरण्यादि महाभूतस्वरूपिणे ।
धराधरहृदिस्थाय धमध्याय नमोनमः ॥ ४१
नकाराय नगेन्द्राय नामजात्यादिहेतवे ।
नमश्शिवाय नम्याय नानारूपाय शूलिने ॥ ४२
पकाराय परानन्दस्वरूपाय परात्मने ।
परापरविहीनाय पावनाय नमोनमः ॥ ४३
फकाराय फलाख्याय फलाख्यगणाय नमः ।
फलाख्यगणपूज्याय नमः पूर्णस्वरूपिणे ॥ ४४
बकाराय बकाराख्य महाबीजैकजापिनाम् ।
बन्धनाकारनाशैकहेतवे वेधसे नमः ॥ ४५
भकाराय भवाब्धेस्तु तारकाय भवायते ।
भवशब्दैकवेद्याय भवानीपतये नमः ॥ ४६
मकाराय महामाया पाशनाशैकहेतवे ।

ममकारविहीनानां महानन्दायवैनमः ॥ ४७
यकाराय यथार्थाय यथार्थज्ञानिनां नृणाम् ।
यथार्थ प्रत्यगद्वैतब्रह्मणे सततं नमः ॥ ४८
रकाराय रतिप्रीति प्रियाय रतिहेतवे ।
रशब्दवपुषे रोगभवनाशायवै नमः ॥ ४९
लकाराय लतासोम स्वरूपाय लतात्मने ।
लाभालाभविहीनाय लब्धिरूपायवै नमः ॥ ५०
वकाराय वरिष्ठाय वासुदेवादिहेतवे ।
वाञ्छावागुरुविच्छित्तिहेतुभूताय वै नमः ॥ ५१
शकाराय शरण्याय शम्भवे शरणार्थिनाम् ।
शरण्याय शरच्चन्द्रधवळाय नमोनमः ॥ ५२
षकाराय षडाधार षट्चक्रादिस्वरूपिणे ।
षडक्षर निषण्णाय नमस्षण्मुखहेतवे ॥ ५३
सकाराय सशब्दार्थ स्वरूपाय सदात्मने ।
साक्षिणे साक्ष्यरूपाणां नमस्साधूपकारिणे ॥ ५४
हकारायाहमर्थाय सदाहङ्काररूपिणे ।

हाहाहूहू प्रगीताय हंसरूपाय ते नमः ॥ ५५
ळकाराय ळकाराख्य महामन्त्रप्रियायच ।
डोलाचञ्चलसंसार नाशनाय नमो नमः ॥ ५६
क्षकाराय क्षमन्त्रार्थस्वरूपाय क्षमावताम् ।
क्षेमदाय मम क्षेम स्वरूपाय नमो नमः ॥ ५७
मातृकावपुषे मातृमानमेयादिसाक्षिणे ।
मातृकामन्त्रलभ्याय महसेच नमो नमः ॥ ५८
मातृकाधारभूताय मातृकामूलरूपिणे ।
महामन्त्रैकवाच्याय महसे ब्रह्मणे नमः ॥ ५९
द्विधाभूत महामन्त्र स्वरव्यञ्जनव्यङ्क्तयतः ।
वाच्यायापदरूपाय पदाय महसे नमः ॥ ६०
अष्टधाचाष्टवर्गैस्तु विभक्तायामलात्मने ।
अशेषशब्दभूताय तत्तदर्थाय वै नमः ॥ ६१
शब्दान्वयविहीनाय शब्दलक्ष्याय साक्षिणे ।
सर्वोपाधिविहीनाय स्वयम्भानाय वै नमः ॥ ६२
प्रत्यक्षादिप्रमाणानामगम्याय परोक्षतः ।

प्रतीताय स्वयंसर्वसाक्षिणे महसे नमः ॥ ६३
स्वस्वरूपादहीनाय वस्तुतो वस्तुतोपि च ।
अर्थाय महते साक्षात्स्वयम्भानाय वै नमः ॥ ६४
प्रसादलभ्याय शिवाय सत्यचिन्महासुखाय परि-
वर्जिताय । अतीव शुद्धस्य हृदम्बुजालये विभास-
मानाय नमो नमस्ते ॥ ६५

श्रीसूत उवाचः—

एवं नारायणेनैव शङ्करोभिष्टुतः पुनः ।
प्राह गम्भीरया वाचा किमर्थं तप्तवांस्तपः ॥ ६६
इत्याकर्ण्य महाविष्णुः प्रणम्य परमेश्वरम् ।
तव स्थानानि मे देव ब्रूहि साक्षात्कृपाकर ॥ ६७
इत्युक्तो विष्णुना शम्भुस्सर्वज्ञः करुणाकरः ।
प्राह सर्वामरेशानस्थानानि स्वस्य विष्णवे ॥ ६८
यः पठेत्प्रातरुत्थाय स्तोत्रमेतन्मनोहरम् ।
इहामुत्र फलं तस्य करस्थं नात्र संशयः ॥ ६९

इति श्रीस्कान्दे महापुराणे विष्णुकृतशिवमातृका-
वर्णमालास्तोत्रम् ॥

॥ श्रीशिवनवरत्नस्तवः ॥

बृहस्पतिः—

नमोहाराय देवाय महामायात्रिशूलिने ।
तापसाय महेशाय तत्त्वज्ञानप्रदायिने ॥ १
नमो मौञ्जाय शुद्धाय नमः कारुण्यमूर्तये ।
नमो देवाधिदेवाय नमो वेदान्तदायिने ॥ २
नमः पराय रुद्राय सुपाराय नमोनमः ।
विश्वमूर्ते महेशाय विश्वाधाराय ते नमः ॥ ३
नमो भक्तभवच्छेदकारणायामलात्मने ।
कालकालाय कालाय कालातीताय ते नमः ॥ ४
जितेन्द्रियाय नित्याय जितक्रोधाय ते नमः ।
नमःपाषण्डभङ्गाय नमः पापहराय ते ॥ ५
नमः पर्वतराजेन्द्र कन्यकापतये नमः ।
योगानन्दाय योगाय योगिनां पतये नमः ॥ ६
प्राणायामपराणांतु प्राणरक्षाय ते नमः ।
मूलाधारे प्रविष्टाय मूलदीपात्मने नमः ॥ ७

नाभिकन्दे प्रविष्टाय नमो हृदेशवर्तिने ।
सच्चिदानन्दपूर्णाय नमस्साक्षात्परात्मने ॥ ८

नमश्शिवायाद्भुतविक्रमाय ते नमश्शिवायाद्भुत-
विग्रहाय ते । नमश्शिवायाखिलनायकाय ते नम-
श्शिवायामृत हेतवे नमः ॥ ९

सूतः—

य इदं पठते नित्यं स्तोत्रं भक्त्या सुसंयतः ।
तस्य मुक्तिः करस्था स्याच्छङ्करप्रियकारणात् ॥ १०
विद्यार्थी लभते विद्यां विवाहार्थी गृही भवेत् ।
वैराग्यकामो लभते वैराग्यं भवतारकम् ॥ ११
तस्माद्दिने दिने यूयमिदं स्तोत्रं समाहिताः ।
पठन्तु भवनाशार्थमिदं वो भवनाशनम् ॥ १२

इति श्री स्कान्दे महापुराणे सूतसंहितायां बृहस्पतिकृतः
॥ शिवसवरत्नस्तवः ॥

॥ श्रीशिवप्रतिपादनस्तोत्रम् ॥



नमस्ते सर्वलोकानां सृष्टिस्थित्यन्त कारण ।
नमस्ते भवभीतानां भवभीति विमर्दन ॥ १
नमस्ते वेदवेदान्तै रर्चनीय द्विजोत्तमैः ।
नमस्ते शूलहस्ताय नमस्ते वह्निपाणये ॥ २
नमस्ते विश्वनाथाय नमस्ते विश्वयोनये ।
नमस्ते नीलकण्ठाय नमस्ते कृत्तिवाससे ॥ ३
नमस्ते सोमरूपाय नमस्ते सूर्यमूर्तये ।
नमस्ते वह्निरूपाय नमस्ते तोयमूर्तये ॥ ४
नमस्ते भूमिरूपाय नमस्ते वायुमूर्तये ।
नमस्ते व्योमरूपाय नमस्ते ह्यात्मरूपिणे ॥ ५
नमस्ते सत्यरूपाय नमस्ते सत्यरूपिणे ।
नमस्ते सुखरूपाय नमस्ते सुखिरूपिणे ॥ ६
नमस्ते पूर्णरूपाय नमस्ते पूर्णरूपिणे ।
नमस्ते ब्रह्मरूपाय नमस्ते ब्रह्मरूपिणे ॥ ७

नमस्ते जीवरूपाय नमस्ते जीवरूपिणे ।
नमस्ते व्यक्तरूपाय नमस्ते व्यक्तरूपिणे ॥ ८
नमस्ते शब्दरूपाय नमस्ते शब्दरूपिणे ।
नमस्ते स्पर्शरूपाय नमस्ते स्पर्शरूपिणे ॥ ९
नमस्ते रूपरूपाय नमस्ते रूपरूपिणे ।
नमस्ते रसरूपाय नमस्ते रसरूपिणे ॥ १०
नमस्ते गन्धरूपाय नमस्ते गन्धरूपिणे ।
नमस्ते देहरूपाय नमस्ते देहरूपिणे ॥ ११
नमस्ते प्राणरूपाय नमस्ते प्राणरूपिणे ।
नमस्ते श्रोत्ररूपाय नमस्ते श्रोत्ररूपिणे ॥ १२
नमस्ते त्वक्स्वरूपाय नमस्ते त्वक्स्वरूपिणे ।
नमस्ते दृष्टिरूपाय नमस्ते दृष्टिरूपिणे ॥ १३
नमस्ते रसरूपाय नमस्ते रसरूपिणे ।
नमस्ते घ्राणरूपाय नमस्ते घ्राणरूपिणे ॥ १४
नमस्ते पादरूपाय नमस्ते पादरूपिणे ।
नमस्ते पाणिरूपाय नमस्ते पाणिरूपिणे ॥ १५

नमस्ते वाक्स्वरूपाय नमस्ते वाक्स्वरूपिणे ।
नमस्ते लिङ्गरूपाय नमस्ते लिङ्गरूपिणे ॥ १६
नमस्ते वायुरूपाय नमस्ते वायुरूपिणे ।
नमस्ते चित्तरूपाय नमस्ते चित्तरूपिणे ॥ १७
नमस्ते मातृरूपाय नमस्ते मातृरूपिणे ।
नमस्ते मानरूपाय नमस्ते मानरूपिणे ॥ १८
नमस्ते मेयरूपाय नमस्ते मेयरूपिणे ।
नमस्ते मिति रूपाय नमस्ते मितिरूपिणे ॥ १९
रक्षरक्षमहादेव क्षमस्व करुणालय ।
भक्तचित्तसमासीन ब्रह्म विष्णु शिवात्मक ॥ २०
सूतब्रह्मादयः स्तुत्वा प्रणम्य भुवि दण्डवत् ।
भक्तिपारङ्गता देवा बभूवुः परमेश्वरे ॥ २१

इति श्रीस्कान्देमहापुराणे नन्दीश्वरविष्णुसंवादे
श्रीशिवप्रतिपादनस्तोत्रम् ॥

॥ श्रीजगद्गुरुस्तुति जगद्गुरु वृत्ताष्टकम् ॥

यश्शिष्यहृत्ताप दवाग्निभयनिवारणे महामेघः
यश्शिष्य रोगार्ति महाहिविषविनाशने सुपर्णात्मा ।
यश्शिष्य सन्दोह विपक्षगिरि विभेदने पविस्सोर्च्यः
श्रीसच्चिदानन्द शिवाभिनव नृसिंहभारती स्वामी ॥

यं शङ्करार्यापररूप इति तपोनिधिं भजंत्यार्याः
यं भारतीपुन्ततनुरूप इति कलानिधिं स्तुवन्त्यन्ये ।
यं सद्गुणाढ्यं निजदैवमिति नमन्ति संश्रिता स्सो-
र्च्यः श्रीसच्चिदानन्द ... ॥ २

येनाश्रितं सज्जनतुष्टिकर मभीप्सितं चतुर्भद्रम्
येनाहृतं शिष्यसुधीसुजन शिवङ्करं किरीटाद्यम् ।
येनोद्धृता संथमिलोकनुत महानुभावता सोर्च्यः
श्रीसच्चिदानन्द ... ॥ ३

यस्मैनृपाद्याबिरुदं ददति विभूषणादिकं भक्त्या
यस्मैप्रयच्छन्ति मुदा भजक जना नृपोपचारादीन् ।

यस्मैप्रदत्ता गुरुणा स्वकृततपोविभूतयस्सोर्च्यः
श्रीसच्चिदानन्द ... ॥ ४

यस्मदभीष्टार्थचयात्रिरिह भवत्यमोघमार्तानां
यस्मात्कटाक्षास्सदयाः कुशलकरास्सरन्ति भक्तेषु ।
यस्मात्सदानन्ददसूक्तयमृतधुनी प्रजायते सोर्च्यः
श्रीसच्चिदानन्द ... ॥ ५

यस्याङ्गके भातिमहत्त्वगुणविबोधकं महातेजः
यस्योक्तिपूरे श्रुतपूतहित सदम्बुभक्तपानीयम् ।
यस्यान्तरङ्गे हि शिवोहमिति विभावनैकता सोर्च्यः
श्रीसच्चिदानन्द ... ॥ ६

यस्मिन् स्थिताश्रृङ्गगिरीड्ययति परम्परात्तदिव्यश्रीः
यस्मिन् चकास्त्युद्भृतवादि जयकरी यशःकरी विद्या।
यस्मिन् सुविज्ञानविरक्ति शमदमादिसम्पदस्सोर्च्यः
श्रीसच्चिदानन्द ... ॥ ७

योच्यों भजेयं शरणं भवुकयुतोस्मि येनयस्मैगीः
दत्ताच यस्मात्सुखमीप्सित मुचितं हि यस्य दासोहम्।
यस्मिन् मन स्सन्ततभक्तियुत मभूत्सएव पाहि त्वं
श्रीसच्चिदानन्द शिवाभिनव नृसिंहभरतीस्वामी ॥

॥ इति श्रीजगद्गुरु स्तुतिः ॥

॥ विज्ञाननौकाष्टकम् ॥

तपोयज्ञदानादिभिश्शुद्धबुद्धिर्विरक्तोग्रजातिः परे तुच्छबुद्ध्या । परित्यज्य सर्वं यदाप्नोति तत्त्वं परं-ब्रह्मनित्यं तदेवाहमस्मि ॥ १

दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं समाराध्य भक्त्या विचार्यं स्वरूपम् । यदाप्नोति तत्त्वं निधिध्यस्य विद्वान् परं ब्रह्म नित्यं तदेवाहमस्मि ॥ २

यदानन्दरूपप्रकाशस्वरूपं निरस्तप्रपञ्चं परिच्छेद-शून्यम् । अहं ब्रह्मवृत्त्यैकगम्यं तुरीयं परं ब्रह्मनित्यं तदेवाहमस्मि ॥ ३

यदज्ञानतो भाति विश्वं समस्तं प्रणष्टं च सद्यो-यदात्मप्रबोधे । मनोवागतीतं विशुद्धं विमुक्तं परं-ब्रह्म नित्यं तदेवाहमस्मि ॥ ४

अनन्तं विभुं निर्विकल्पं निरीहं शिवं सङ्गहीनं यदोङ्कारगम्यम् । निराकारमत्युज्ज्वलं मृत्युहीनं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ५

निषेधे कृते नेति नेतीति वाक्यैस्समाधिस्थितानां यदा भाति पूर्णम्। अवस्थात्रयातीतमद्वैतमेकं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ६

यदानन्दलेशैस्सदानन्दिविश्वं यदा भाति चान्यत्तथा भाति सर्वम् । यदालोचने हेयमन्यत्समस्तं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ७

यदानन्दसिन्धौ निमग्नः पुमान्स्यादविद्याविलासस्समस्तप्रपञ्चः । तदा न स्फुरत्यद्भुतं यन्निमित्तं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ८

॥ फलश्रुतिः ॥

स्वरूपानुसन्धानरूपस्तुतिं यः पठेदादराद्भक्तिभावो मनुष्यः । श्रृणोतीह वा नित्यमुद्युक्तचित्तो भवेद्विष्णुरत्रैव वेदप्रमाणात् ॥ ९

विज्ञाननौकां परिगृह्य कश्चित्तरेद्यदज्ञानमयं भवाब्धिम् । ज्ञानाम्भसा यः परिहृत्य तृष्णां विष्णोः पदं याति स एव धन्यः ॥ १०

इति श्रीमत्परमहंसपरिव्राजक श्रीमच्छङ्कर भगवत्पादाचार्य विरचितं विज्ञाननौकाष्टकम् ॥

॥ अद्वैतलक्षणम् ॥



अज्ञानमेतद्वैताख्यमद्वैतं श्रेयताम्परम् ।
मम त्वहमिति प्रज्ञावियुक्तमिति कल्पवत् ॥ १
अविकार्यमनाख्येदमद्वैतमनुभूयते ।
मनोवृत्तिमयं द्वैतमद्वैतं परमार्थतः ॥ २
मनसो वृत्तय स्तस्माद्धर्माधर्मनिमित्तजाः ।
निरोद्धव्यास्तन्निरोधेनाद्वैतं नोपपद्यते ॥ ३
मनोदृष्टमिदं सर्वं यत्किञ्चित्सचराचरम् ।
मनसो ह्यमनीभावे ऽद्वैतभावं तदाप्नुयात् ॥ ४
बहिः प्रज्ञां सदोत्सृज्याप्यन्तः प्रज्ञां च यो बुधः ।
कयापि प्रज्ञयोपेतः प्रज्ञावानिति कथ्यते ॥ ५
कर्मणो भावना चेयं सा ब्रह्मपरिपन्थिनी ।
कर्मभावनया तुल्यं विज्ञानमुपजायते ॥ ६

नारायण - नारायण - नारायण ॥

ओं तत्सत् ॥

॥ साधनपञ्चकम् ॥

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मनस्त्यज्यताम् ।
पापौघः परिभूयतां भवसुखे दोषोनुसन्धीयता-
मात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥

सङ्गस्सत्सु विधीयतां भगवतो भक्तिर्दृढा धीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम् ।
सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुके सेव्यतां ब्रह्मै-
वाक्षरमर्थ्यतां श्रुतिशिरो वाक्यं समाकर्ण्यताम् ॥ २

वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षस्समाश्रीयतां
दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोनुसन्धीयताम् ।
ब्रह्मैवास्मि विभाव्यतामहरहो गर्वः परित्यज्यतां
देहोहम्मतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम् ॥ ३

क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्य-
तां स्वाद्वन्नं न च याच्यतां विधिवशात्प्राप्तेन सन्तुष्य-

ताम् । शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यतामौदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम् ॥ ४

एकान्ते सुखमास्यतां परतरे चेतस्समाधीयतां पूर्णात्मानुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् । प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां प्रारब्धं त्विह भुज्यतामथ परं ब्रह्मात्मना स्थीयताम् ॥

॥ फलश्रुतिः ॥

यः श्लोकपञ्चकमिदं पठते मनुष्यः सञ्चिन्तयत्यनुदिनं स्थिरतामुपेत्य । तस्याशु संसृतिदवानलतीव्रघोरतापः प्रशान्तिमुपयाति चितिप्रभावात् ॥ ६

इति श्रीमत्परमहंसपरिव्राजक श्रीमच्छङ्कर-भगवत्पादाचार्यविरचितं साधनपञ्चकम् ॥

॥ शुकाष्टकम् ॥

भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमधिगतौ नष्टसन्देहवृत्ती ।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

यस्यात्मानं सकलवपुषा मेकमन्तर्बहिस्थं
दृष्ट्वा पूर्णं खमिव सततं सर्वभाण्डस्थमेकं ।
नान्यत्कार्यं किमपि च तथा कारणाद्भिन्नरूपं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

यद्वन्नद्योऽम्बुधिं मधिगता स्सागरत्वं प्रपन्नाः
तद्वज्जीवा स्समरसगताः चित्स्वरूपं प्रपन्नाः ।
वाचातीते समरसघने सच्चिदानन्दरूपे
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

हेम्नः कार्यं हुतवहगतं हेमतामेति तद्वत्
क्षीरं क्षीरे समरसगतं तोयमेवाम्बुमध्ये ।

एवं सर्वं समरसगतं त्वंपदं तत्पदार्थे
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥
कश्चात्राहं किमपि च भवान्कोऽयमत्र प्रपञ्चः
स्वान्तर्वेद्ये गगनसदृशे पूर्णतत्त्वप्रकाशे ।
आनन्दाख्ये समरसघने बाह्य अन्त र्विलीने
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥
दृष्ट्वा सर्वं परम ममृतं स्वप्रकाशस्वरूपं
बुध्वात्मानं विमल मचलं सच्चिदानन्दरूपं ।
ब्रह्माधारं सकलजगतां साक्षिणं निर्विशेषं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥
कार्याकार्यं किमपि चरतो नैव कर्तृत्वमस्ति
जीवन्मुक्तिस्थितिरिह गता दग्धवज्जीवभावा ।
एवं देहे प्रचलिततया दृश्यमान स्स मुक्तो
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥
यस्मिन् विश्वं सकलभुवनं सैन्धवं सिन्धुमध्ये
पूर्णेऽयस्त्वन्निश्चसनगगनं जीवभावक्रमेण ।

यद्यज्ञीनं तदिदमखिलं सच्चिदानन्दरूपं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥
सत्यं सत्यं परम ममृतं शान्ति कल्याणहेतुं
मायारण्ये दहन ममलं शान्तिनिर्वाणदीपं ।
तेजोराशिं निगमसदनं व्यासपुत्राष्टकं यः
प्रातःकाले पठति सहसा याति निर्वाणमार्गम् ॥ ९

॥ इति शुकाष्टकम् ॥

॥ एकश्लोकी ॥

किं ज्योतिस्तव ?, भानुमानहनि मे रात्रौ प्रदीपादिकं स्यादेवं रविदीपदर्शनविधौ किंज्योति ? राख्याहि मे । चक्षुस्तस्य निमीलनादिसमये किं ?, धीर्धियो दर्शने किं ?, तत्राह; मतोभवात्परमकं ज्योति;स्तदस्मि प्रभो !

॥ इति श्रीशङ्करभगवत्पादविरचिता एकश्लोकी ॥

॥ प्रातस्स्मरणत्रयम् ॥

प्रातस्स्मरामि हृदि संस्फुरदात्मतत्त्वं
सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यत्स्वप्नजागरसुषुप्तिमवैति नित्यं
तद्ब्रह्म निष्कळमहं न च भूतसङ्घः ॥ १

प्रात र्भजामि मनसो वचसा मगम्यं वाचो विभान्ति
निखिला यदनुग्रहेण । यं नेति नेति वचनै र्निगमा
अवोचुः तं देवदेव मज मच्युत माहु रग्र्याः ॥
प्रात र्नमामि तमसः परमर्कवर्णं पूर्णं सना-
तनपदं पुरुषोत्तमाख्यं । यस्मिन्निदं जगदशेष-
मखण्डमूर्तौ रज्ज्वाभुजङ्गम इव प्रतिभाति तं वै ॥
श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् ।
प्रातःकाले पठेद्यस्तु स गच्छेत्परमं पदम् ॥

॥ इति श्रीशङ्करभगवत्पादविरचितं प्रातस्स्मरणत्रयम् ॥

॥ यतिपञ्चकम् ॥

वेदान्तवाक्येषु सदा रमन्तः भिक्षान्नमात्रेणच तुष्टिमन्तः । विशोकमन्तःकरणे रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ १

मूलं तरोः केवल माश्रयन्तः पाणिद्वयं भोक्तुममन्त्रयन्तः । श्रियं च कन्था मिव कुत्सयन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ २

देहादिभावं परिमार्जयन्तः आत्मानमात्मन्यवलोकयन्तः । नान्तं न मध्यं न बहि स्मरन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ ३


स्वानन्दभावे परितुष्टिमन्तः संशान्तसर्वेन्द्रियदृष्टिमन्तः । अहर्निशं ब्रह्मणि ये रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ ४

पञ्चाक्षरं पावन मुच्चरन्तः पतिं पशूनां हृदिभावयन्तः । भिक्षाशना दिक्षु परिभ्रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ ५

कौपीनपञ्चरत्नस्य मननं याति यो नरः ।
विरक्तिं धर्मविज्ञानं लभते नात्र संशयः ॥ ६

॥ इति श्रीशङ्करभगवत्पादविरचितं यतिपञ्चकम् ॥

॥ मनीषापञ्चकम् ॥



सत्याचार्यस्य गमने कदाचिन्मुक्तिदायकम् ।
काशीक्षेत्रं प्रति सह गौर्या मार्गे तु शङ्करम् ॥ १
अन्त्यवेषधरं दृष्ट्वा गच्छगच्छेति चाब्रवीत् ।
शङ्करस्सोऽपि चण्डालः तं पुनः प्राह शङ्करम् ॥ २
अन्नमयादन्नमयमथ वाचैतन्यमेव चैतन्यात् ।
यतिवर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥
प्रत्यग्वस्तुनि निस्तरङ्गसहजानन्दावबोधाम्बुधौ
विप्रोऽयं श्वपचोऽयमित्यपि महान् कोऽयं विभेद-
भ्रमः किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चण्डालवीथी-
पयः पूरेवाऽन्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाम्बरे ॥
जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते
याब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी ।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्तिचे-
च्चण्डालोऽस्तु सतु द्विजोऽस्तु गुरुरित्येषामनीषामम ॥

ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं
सर्वं चैतदविद्यया त्रिगुणया शेषं मया कल्पितम् ।
इत्थं यस्य दृढा मतिस्सुखतरे नित्ये परे निर्मले
चण्डालोऽस्तु सतु द्विजोऽस्तु गुरुरित्येषामनीषामम ॥ १
शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरो-
र्नित्यं ब्रह्म निरन्तरं विमृशता निर्व्याजशान्तात्मना ।
भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके
प्रारब्धाय समर्पितं स्वपुरित्येषा मनीषा मम ॥ ३
या तिर्यङ्नरदेवताभिरहमित्यन्तस्फुटागृह्यते
यद्भासा हृदयाक्ष देहविषया भान्ति स्वतोचेतनाः ।
तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावय-
न्योगी निर्वृतमानसोऽहिगुरुरित्येषामनीषामम ॥ ४
यत्सौख्याम्बुधि लेशलेशत इमे शक्रादयो निर्वृता
यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः ।
यस्मिन् नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव नब्रह्मवि-
द्यः कश्चित्ससुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥ ५

इति श्रीमच्छङ्कर भगवत्पादविरचितं मनीषा पञ्चकम् ॥

॥ पादुकाष्टकम् ॥

श्रीसमञ्चितमव्ययं परमप्रकाशमगोचरं
भेदवर्जितमप्रमेयमनन्तमुज्झितकल्मषम् ।
निर्मलं निगमान्तमद्भुतमप्यतर्क्यमनुत्तमं
प्रातरेव हि मानसे गुरुपादुकाद्वयमाश्रये ॥ १

नादबिन्दुकलात्मकं दशनादवेदविनोदितं
मन्त्रराजपराजितं निजमण्डलान्तरभासितम् ।
पञ्चवर्णमखण्डमद्भुतमादिकारणमच्युतं
प्रातरेव हि मानसे गुरुपादुकाद्वयमाश्रये ॥ २

हन्तचारुमखण्डनादमनेकवर्णमरूपकं
शब्दजालमयं चराचरजन्तुदेहनिरासिनम् ।
चक्रराजमनाहतोद्भवमेघवर्णमतत्परं
प्रातरेव हि मानसे गुरुपादुकाद्वयमाश्रये ॥ ३

बुद्धिरूपमबद्धकं त्रिदैवकूटस्थनिवासिनं
निश्चयं निरतप्रकाशमनेकसद्गुचिरूपकम् ।

पङ्कजान्तरखेलनं निजशुद्धसख्यमगोचरं
प्रातरेव हि मानसे गुरुपादुकाद्वयमाश्रये ॥ ४

पञ्च पञ्च हृषीकदेहमनश्चतुष्क परस्परं
पञ्चभूतनिकामषट्कसमीरशब्दमभीकरम् ।
पञ्चकोशगुणत्रयादिसमस्तधर्मविलक्षणं
प्रातरेव हि मानसे गुरुपादुकाद्वयमाश्रये ॥ ५

पञ्चमुद्रसुलक्ष्यदर्शनभावमात्रनिरूपणं
विद्युदादिदगद्भगितविनोदकान्ति विवर्तनम् ।
चिन्मयत्रयवर्तिनं सदसद्विवेकममायिकं
प्रातरेव हि मानसे गुरुपादुकाद्वयमाश्रये ॥ ६

पञ्चवर्णशुकं समस्तरुचिर्विचित्रविचारिणं
चन्द्रसूर्यचिदग्निमण्डलमण्डितं घनचिन्मयम् ।
चित्कलापरिपूर्णमण्डलचित्समाधिनिरीक्षितं
प्रातरेव हि मानसे गुरुपादुकाद्वयमाश्रये ॥ ७

स्थूलसूक्ष्मसकारणान्तरखेलनं परिपालनं
विश्वतैजसप्राज्ञचेतसमन्तरात्मनिजस्थितिम् ।

सर्वकारणमीश्वरं निटलान्तरालविहारिणं
प्रातरेव हि मानसे गुरुपादुकाद्वयमाश्रये ॥ ८
तप्तकाञ्चनदीप्यमान महानुरूपमरूपकं
चन्द्रकान्तरतारकैरवमुज्ज्वलं परमं पदम् ।
नीलनीरदमध्यमस्थितविद्युदाभविभासितं
प्रातरेव हि मानसे गुरुपादुकाद्वयमाश्रये ॥ ९

॥ इति पादुकाष्टकम् ॥

ॐ

॥ सद्गुरुसेवा जयति ॥

॥ श्रीचित्सभेशाय मङ्गळम् ॥

श्रीनटेशसहस्रनामस्तोत्र-

॥ पूर्वपीठिका ॥

यस्मात्सर्वं समुत्पन्नं चराचरमिदं जगत् ।
इदं नमो नटेशाय तस्मै कारुण्यमूर्तये ॥
ओं कैलासशिखरे रम्ये रत्नसिंहासने स्थितम् ।
शङ्करं करुणामूर्तिं प्रणम्य परया मुदा ॥ १
विनयावनता भूत्वा पप्रच्छ परमेश्वरी ।
भगवन् भव सर्वज्ञ भवतापहराव्यय ॥ २
त्वत्तः श्रुतं मया देव सर्वं नामसहस्रकम् ।
नटेशस्य तु नामानि न श्रुतानि मया प्रभो ॥ ३
असकृत्प्रार्थितोऽपि त्वं न तत्कथितवानसि ।
इदानीं कृपया शंभो वद वाञ्छाभिपूर्तये ॥ ४

श्री शिव उवाच—

साधु साधु महादेवि पृष्टं सर्वजगद्धितम् ।
पुरा नारायणः श्रीमान् लोकरक्षापरायणः ॥ ५
क्षीराब्धौ सुचिरं कालं साम्बमूर्तिधरं शिवम् ।
मामेकाग्रेण चित्तेन ध्यायन् न्यवसदच्युतः ॥ ६
तपसा तस्य सन्तुष्टः प्रसन्नोऽहं कृपावशात् ।
ध्यानात्समुत्थितो विष्णुर्लक्ष्म्या मां पर्यपूजयत् ॥ ७
तुष्टाव विविधैस्स्तोत्रैर्वेदवेदान्तसम्मितैः ।
वरं वरय हे वत्स यदिष्टं मनसि स्थितम् ॥ ८
तत्ते दास्यामि न चिरादित्युक्तः कमलेक्षणः ।
प्राह मां परया भक्त्या वरं दास्यसि चेत्प्रभो ॥ ९
रक्षार्थं सर्वजगतामसुराणां क्षयाय च ।
सार्वात्म्ययोगसिद्ध्यर्थं मन्त्रमेकं ममादिश ॥ १०
इति सम्प्रार्थितस्तेन माधवेनाहमम्बिके ।
सञ्चिन्त्यानुत्तमं स्तोत्रं सर्वेषां सर्वसिद्धिदम् ॥ ११
नटेशनामसाहस्रमुक्तवानस्मि विष्णवे ।

तेन जित्वाऽसुरान् सर्वान् ररक्ष सकलं जगत् ॥
सार्वात्म्ययोगसिद्धिं च प्राप्तवानम्बुजेक्षणः ।
तदेव प्रार्थयस्यद्य नामसाहस्रमम्बिके ॥ १३
पठनान्मननाद्यस्य नृत्तं दर्शयति प्रभुः ।
सर्वपापहरं पुण्यं सर्वरक्षाकरं नृणाम् ॥ १४
सर्वैश्वर्यप्रदं सर्वसिद्धिदं मुक्तिदं परम् ।
वक्ष्यामि शृणु हे देवि नामसाहस्रमुत्तमम् ॥ १५

॥ इति पूर्वपीठिका ॥

॥ श्रीनटेशसहस्रनामस्तोत्रम् ॥

ओं अस्य श्रीनटेशसहस्रनामस्तोत्रमहामन्त्रस्य सदाशिवऋषिः, महाविराट्छन्दः, श्रीमन्नटेशो देवता। बीजं, शक्तिः, कीलकं, अङ्गन्यासकरन्यासौ च चिन्तामणिमन्त्रवत्।

॥ ध्यानम् ॥

ध्यायेत्कोटिरविप्रभं त्रिणयनं शीतांशुगङ्गाधरं
दक्षाङ्घ्रिस्थितवामकुञ्चितपदं शार्दूलचर्माम्बरम्।
वह्निं डोलकराभयं डमरुकं वामे शिवां श्यामलां
कह्लारां जपसृक्कुकां कटिकरां देवीं सभेशं भजे॥

लं पृथिव्यात्मने इत्यादिना पञ्चपूजा कार्या

श्रीशिव उवाच—

श्रीशिवः श्रीशिवानाथः श्रीमान् श्रीपतिपूजितः।
शिवङ्करःशिवतरःशिष्टेष्टःशिवागमः॥ १
अखण्डानन्दचिद्रूपः परमानन्दताण्डवः।

अपस्मृतिन्यस्तपादः कृत्तिवासाः कृपाकरः ॥ २
कालीवादप्रियः कालः कालातीतः कलाधरः ।
कालनेता कालहन्ता कालचक्रप्रवर्तकः ॥ ३
कालज्ञः कामदः कान्तः कामारिः कामपालकः ।
कल्याणमूर्तिः कल्याणीरमणः कमलेक्षणः ॥ ४
कालकण्ठः कालकालः कालकूटविषाशनः ।
कृतज्ञः कृतिसारज्ञः कृशानुः कृष्णपिङ्गलः ॥ ५
करिचर्माम्बरधरः कपाली कलुषापहः ।
कपालमालाभरणः कङ्कालः कलिनाशनः ॥ ६
कैलासवासी कामेशः कविः कपटवर्जितः ।
कमनीयः कलानाथशेखरः कम्बुकन्धरः ॥ ७
कन्दर्पकोटिसदृशः कपर्दी कमलाननः ।
कराब्जधृतकालाग्निः कदम्बकुसुमारुणः ॥ ८
कमनीयनिजानन्दमुद्राञ्चितकराम्बुजः ।
स्फुरड्डमरुनिध्वाननिर्जिताम्भोधिनिस्वनः ॥ ९
उद्दण्डताण्डवश्चण्ड ऊर्ध्वताण्डवपण्डितः ।

सव्यताण्डवसंपन्नो महाताण्डववैभवः ॥ १०
ब्रह्माण्डकाण्डविस्फोटमहाप्रलयताण्डवः ।
महोग्रताण्डवाभिज्ञः परिभ्रमणताण्डवः ॥ ११
नन्दिनाट्यप्रियो नन्दी नटेशो नटवेषभृत् ।
कालिकानाट्यरसिको निशानटननिश्चलः ॥ १२
भृङ्गिनाट्यप्रमाणज्ञो भ्रमरायितनाट्यकृत् ।
वियदादिजगत्स्रष्टा विविधानन्ददायकः ॥ १३
विकाररहितो विष्णुर्विराडीशो विराण्मयः ।
विराड्हृदयपद्मस्थो विधिर्विश्वाधिको विभुः ॥ १४
वीरभद्रो विशालाक्षो विष्णुबाणो विशां पतिः ।
विद्यानिधिर्विरूपाक्षो विश्वयोनिर्वृषध्वजः ॥ १५
विरूपो विश्वदिग्व्यापी वीतशोको विरोचनः ।
व्योमकेशो व्योममूर्तिर्व्योमाकारोऽव्ययाकृतिः॥१६
व्याघ्रपादप्रियो व्याघ्रचर्मधृद्व्याधिनाशनः ।
व्याकृतो व्यापृतो व्यापी व्याप्यसाक्षी विशारदः ॥
व्यामोहनाशनो व्यासो व्याख्यामुद्रालसत्करः ।

वरदो वामनो वन्द्यो वरिष्ठो वज्रवर्मभृत् ॥ १८
वेदवेद्यो वेदरूपो वेदवेदान्तवित्तमः ।
वेदार्थविद्वेदयोनिः वेदाङ्गो वेदसंतुतः ॥ १९
वैकुण्ठवल्लभोऽवर्ष्यो वैश्वानरविलोचनः ।
समस्तभुवनव्यापी समृद्धस्सततोदितः ॥ २०
सूक्ष्मात्सूक्ष्मतरः सूर्यः सूक्ष्मस्थूलत्ववर्जितः ।
जह्नुकन्याधरो जन्मजरामृत्युनिवारकः ॥ २१
शूरसेनः शुभाकारः शुभ्रमूर्तिः शुचिस्मितः ।
अनर्घरत्नखचितकिरीटो निकटे स्थितः ॥ २२
सुधारूपः सुराध्यक्षः सुभ्रूः सुखघनः सुधीः ।
भद्रो भद्रप्रदो भद्रवाहनो भक्तवत्सलः ॥ २३
भगनेत्रहरो भर्गो भवघ्नो भक्तिमन्निधिः ।
अरुणः शरणः शर्वः शरण्यः शर्मदः शिवः ॥ २४
पवित्रः परमोदारः परमापन्निवारकः ।
सनातनस्सप्तमः सत्यः सत्यवादी समृद्धिदः ॥ २५
धन्वी धनाधिपो धन्यो धर्मगोप्ता धराधिपः ।

तरुणस्तारकस्ताम्रस्तरिष्णुस्तत्त्वबोधकः ॥ २६
राजराजेश्वरो रम्यो रात्रिञ्चरविनाशनः ।
ग्रहरेष्ठो गणाधीशो गणेशो गतिवर्जितः ॥ २७
पतञ्जलिप्राणनाथः परापरविवर्जितः ।
परमात्मा परंज्योतिः परमेष्ठी परात्परः ॥ २८
नारसिंहो नगाध्यक्षो नादान्तो नादवर्जितः ।
नमदानन्ददो नम्यो नगराजनिकेतनः ॥ २९
दैव्यो भिषक्प्रमाणज्ञो ब्रह्मण्यो ब्राह्मणात्मकः ।
कृताकृतः कृशः कृष्णः शान्तिदश्शरभाकृतिः ॥
ब्रह्मविद्याप्रदो ब्रह्मा बृहद्ब्रह्मो बृहस्पतिः ।
सद्यो जातस्सदाराध्यः सामगस्सामसंस्तुतः ॥ ३१
अघोरोऽद्भुतचारित्र आनन्दवपुरग्रणीः ।
सर्वविद्यानामीशानईश्वराणामधीश्वरः ॥ ३२
सर्वार्थः सर्वदा तुष्टः सर्वशास्त्रार्थसम्मतः ।
सर्वज्ञः सर्वदः स्थाणुः सर्वशस्सुरप्रियः ॥ ३३
जनार्दनो जगत्स्वामी जन्मकर्मनिवारकः ।

मोचको मोहविच्छेत्ता मोदनीयो महाप्रभुः ॥ ३४
व्युप्तकेशश्च विशदः विष्वक्सेनो विशोधकः ।
सहस्राक्षः सहस्राङ्घ्रिः सहस्रवदनाम्बुजः ॥ ३५
सहस्राक्षार्चितस्संराट् सन्धाता सम्पदालयः ।
बभ्रुर्बहुविधाकारो बलप्रमथनो बली ॥ ३६
मनोभर्ता मनोगम्यो मननैकपरायणः ।
उदासीन उपद्रष्टा मौनगम्यो मुनीश्वरः ॥ ३७
अमानी मदनोऽमन्युरमानो मानदो मनुः ।
यशस्वी यजमानात्मा यज्ञभुग्यजनप्रियः ॥ ३८
मीढुष्टमो मृगधरो मृकण्डुतनयप्रियः ।
पुरुहूतो पुरद्वेषी पुरत्रयविहारवान् ॥ ३९
पुण्यः पुमान् पुरिशयः पूषा पूर्णः पुरातनः ।
शयनश्शन्तमः शान्तः शासकश्श्यामलाप्रियः ॥४०
भावज्ञो बन्धविच्छेत्ता भावातीतोऽभयङ्करः ।
मनीषी मनुजाधीशो मिथ्याप्रत्ययनाशनः ॥ ४१
निरञ्जनो नित्यशुद्धो नित्यबुद्धो निराशयः ।

निर्विकल्पो निरालम्बो निर्विकारो निरामयः ॥ ४२
निरङ्कुशो निराधारो निरपायो निरत्ययः ।
गुहाशयो गुणातीतो गुरुमूर्तिर्गुहप्रियः ॥ ४३
प्रमाणं प्रणवः प्राज्ञः प्राणदः प्राणनायकः ।
सूत्रात्मा सुलभस्त्वच्छः सूदरस्सुन्दराननः ॥ ४४
कपालमालालङ्कारः कालान्तकवपुर्धरः ।
दुराराध्यो दुराधर्ष्यो दुष्टदूरो दुरासदः ॥ ४५
दुर्विज्ञेयो दुराचारनाशनो दुर्मदान्तकः ।
सर्वेश्वरः सर्वसाक्षी सर्वात्मा साक्षिवर्जितः ॥ ४६
सर्वद्वन्द्वक्षयकरः सर्वापद्विनिवारकः ।
सर्वप्रियतमस्सर्वदारिद्र्यक्लेशनाशनः ॥ ४७
द्रष्टा दर्शयिता दान्तो दक्षिणामूर्तिरूपभृत् ।
दक्षाध्वरहरो दक्षो दहरस्थो दयानिधिः ॥ ४८
समदृष्टिस्सत्यकामः सनकादिमुनिस्तुतः ।
पतिः पञ्चत्वनिर्मुक्तः पञ्चकृत्यपरायणः ॥ ४९
पञ्चयज्ञप्रियः पञ्चप्राणाधिपतिरव्ययः ।

पञ्चभूतप्रभुः पञ्चपूजासन्तुष्टमानसः ॥ ५०
विघ्नेश्वरो विघ्नहन्ता शक्तिपाणिश्शरोद्भवः ।
गूढो गुह्यतमो गोप्यो गोरक्षी गणसेवितः ॥ ५१
सुव्रतस्सत्यसङ्कल्पः स्वसंवेद्यस्सुखावहः ।
योगगम्यो योगनिष्ठो योगानन्दो युधिष्ठिरः ॥ ५२
तत्वावबोधस्तत्वेशः तत्वभावो तपोनिधिः ।
अक्षरस्त्र्यक्षरस्त्र्यक्षः पक्षपातविवर्जितः ॥ ५३
माणिभद्रार्चितो मान्यो मायावी मात्रिन्को महान् ।
कुठारभृत्कुलाद्रीशः कुञ्चितैकपदाम्बुजः ॥ ५४
यक्षराड्यज्ञफलदो यज्ञमूर्तिर्यशस्करः ।
सिद्धेशस्सिद्धिजनकः सिद्धान्तस्सिद्धवैभवः ॥ ५५
रविमण्डलमध्यस्थो रजोगुणविवर्जितः ।
वह्निमण्डलमध्यस्थो वर्षीयान्वरुणेश्वरः ॥ ५६
सोममण्डलमध्यस्थः सोमस्सौम्यस्सुहृद्वरः ।
दक्षिणाग्निर्गार्हपत्यो दमनो दमनान्तकः ॥ ५७
चतुर्वक्त्रश्चक्रधरः पञ्चवक्त्रः परं तपः ।

विश्वस्यायतनो वर्यो वन्दारुजनवत्सलः ॥ ५८
गायत्रीवल्लभो गार्ग्यो गायकानुग्रहोन्मुखः ।
अनन्तरूप एकात्मा स्वस्तरुर्व्याहृतिस्वधा ॥ ५९
स्वाहारूपो वसुमनाः वटुकः क्षेत्रपालकः ।
शार्ङ्गशङ्खशत्रुहरश्शूली श्रुतिस्मृतिविधायकः ॥ ६०
अप्रमेयोऽप्रतिरथः प्रद्युम्नः प्रमथेश्वरः ।
अनुत्तमो ह्युदासीनो मुक्तिदो मुदिताननः ॥ ६१
ऊर्ध्वपङ्क्तोर्ध्वरेताश्च प्रौढनर्तनलम्पटः ।
महामायो महाग्रासो महावीर्यो महाभुजः ॥ ६२
महानन्दो महास्कन्दो महेन्द्रो महसांनिधिः ।
भाजिष्णुर्भावनागम्यः भ्रान्तिज्ञानविनाशनः ॥ ६३
महर्धिमहिमाधारो महासेनगुरुर्महः ।
सर्वहृत्सर्वभूत्सर्गः सर्वहृत्कोशसंस्थितः ॥ ६४
दीर्घपिङ्गजटाजूटो दीर्घबाहुर्दिगम्बरः ।
संयद्वामस्संयमीन्द्रः संशयच्छित्सहस्रदृक् ॥ ६५
हेतुदृष्टान्तनिर्मुक्तो हेतुर्हेरम्बजन्मभूः ।

हेलाविनिर्मितजगद्धेमश्मश्रुर्हिरण्मयः ॥ ६६
सकृद्विभातस्सर्ववेत्ता सदसत्कोटिवर्जितः ।
स्वात्मस्थस्स्वायुधः स्वामी स्वानन्यस्स्वांशिताखिलः ॥
रातिर्दातिश्चतुष्पादः स्वात्मबन्धहरस्स्वभूः ।
वशी वरेण्यो विततो वज्रभृद्वरुणात्मजः ॥ ६८
चैतन्यश्चिच्छिदद्वैतः चिन्मात्रश्चित्सुभाधिपः ।
भूमा भूतपतिर्भव्यः भूर्भुवो व्याहृतिप्रियः ॥ ६९
वाच्यवाचकनिमुक्तो वागीशो वागगोचरः ।
वेदान्तकृत्तुर्यपादो वैद्युतस्सुकृतोद्भवः ॥ ७०
अशुभक्षयकृज्ज्योतिः अनाकाशो ह्यलेपकः ।
आप्तकामोऽनुमन्तात्मकामोऽभिन्नोनणुर्हरः ॥ ७१
अस्नेहस्सङ्गनिर्मुक्तोऽह्रस्वोऽदीर्घोऽविशेषकः ।
स्वच्छन्दस्स्वच्छसंवित्तिरन्वेष्टव्योऽश्रुतोऽमृतः ॥
अपरोक्षोऽव्रणोऽलिङ्गोऽद्वेष्टा प्रेमसागरः ।
ज्ञानलिङ्गो गतिर्ज्ञानी ज्ञानगम्योऽवभासकः ॥ ७३
शुद्धस्फटिकसङ्काशः श्रुतिप्रस्तुतवैभवः ।

हिरण्यबाहुस्सेनानीः हरिकेशो दिशां पतिः ॥ ७४
सस्पिञ्जरः पशुपतिः त्विषीमानध्वनां पतिः ।
बभ्लुशो भगवान्भव्यो विव्याधी विगतज्वरः ॥
अन्नानां पतिरत्युग्रो हरिकेशोऽद्वयाकृतिः ।
पुष्टानां पतिरव्यग्रो भवहेतुर्जगत्पतिः ॥ ७६
आततायी महारुद्रः क्षेत्राणामधिपाक्षयः ।
सूतस्सदस्पतिस्सूरिरहन्त्यो वनपो वरः ॥ ७७
रोहितस्थपतिर्वृक्षपतिर्मन्त्री च वाणिजः ।
कक्षपश्च भुवन्तिश्च भवाख्यो वारिवस्कृतः ॥ ७८
ओषधीशस्सतामीशः उच्चैर्घोषो विभीषणः ।
पत्तीनामधिपः कृत्स्नवीतो धावत्स सत्वपः ॥ ७९
सहमानस्सत्यधर्मा विव्याधी नियमो यमः ।
अव्याधिपतिरादित्यः ककुभः कालकोविदः ॥ ८०
निषङ्गीषुधिमदिन्द्रः तस्कराणामधीश्वरः ।
निचरुकः परिचरोऽरण्यानां पतिरद्भुतः ॥ ८१
सृकावी मुण्डतां नाथः पञ्चाशद्वर्णरूपभृत् ।

नक्तंचरः प्रकृन्तानां पतिर्गिरिचरो गुरुः ॥ ८२
कुलुञ्चानां पतिः कूप्यो धन्वावी धनदाधिपः ।
आतन्वानश्शतानन्दः गृत्सो गृत्सपतिस्सुरः ॥ ८३
त्रातो त्रातपतिर्विप्रो वरीयान् क्षुल्लकः क्षमी ।
विल्मी वरूथी दुन्दुभ्योऽहनन्यः प्रमृशाभिधः ॥
धृष्णुर्ईतस्तीक्ष्णदंष्ट्रः सुधन्वा सुलभस्सुखी ।
स्तुत्यः पथ्यः स्वतन्त्रस्थः काट्योनीप्यः करोटिभृत् ॥
सूद्यस्सरस्यो वैशन्तो नाद्योऽवद्यश्च वार्षिकः ।
वैद्युत्यो विशदो मेध्यो रोष्मियो वास्तुपो वसुः ॥
अप्रेवधेऽप्रे सम्पूज्यो हन्ता तारो मयो भवः ।
मयस्करो महातीर्थ्यः कूल्यः पार्यः पदात्मकः ॥
शङ्खः प्रतरणोऽवार्यः फेन्यः शष्प्यः प्रवाहजः ।
मुनिरातार्य आलाद्यः सिकत्यश्चाथ किंशिलः ॥ ८८
पुलस्त्यः क्षयणो गृध्यो गोष्ट्यो गोपरिपालकः ।
शुष्क्यो हरित्यो लोप्यश्च सूर्म्यः पर्ण्योऽणिमादिभूः ॥
पर्णशद्यः प्रत्यगात्मा प्रसन्नः परमोन्नतः ।

शीघ्रियश्शीभ्य आनन्दः क्षयद्वीरश्शरोऽक्षरः ॥ ९०
पाशी पातकसंहर्ता तीक्ष्णेषुस्तिमिरापहः ।
वराभयप्रदो ब्रह्मपुच्छो ब्रह्मविदां वरः ॥ ९१
ब्रह्मविद्यागुरुर्गृह्यो गुह्यकैस्समभिष्टुतः ।
कृतान्तकृत्क्रियाधारः कृती कृपणरक्षकः ॥ ९२
नैष्कर्म्यदो नवरसः त्रिस्थस्त्रिपुरभैरवः ।
त्रिमात्रकस्त्रिवृद्रूपः तृतीयस्त्रिगुणातिगः ॥ ९३
त्रिधामा त्रिजगद्धेतुः त्रिकर्ता तिर्यगूर्ध्वगः ।
प्रपञ्चोपशमो नामरूपद्वयविवर्जितः ॥ ९४
प्रकृतीशः प्रतिष्ठाता प्रभवः प्रमथः प्रथी ।
सुनिश्चितार्थो सिद्धान्तः तत्वमर्थस्तपोमयः ॥ ९५
हितः प्रमाता प्राग्वर्ती सर्वोपनिषदाशयः ।
विशृङ्खलो वियद्धेतुः विषमो विद्रुमप्रभः ॥ ९६
अखण्डबोधोऽखण्डात्मा घण्टामण्डलमण्डितः ।
अनन्तशक्तिराचार्यः पुष्कलस्सर्वपूरणः ॥ ९७
पुरजित्पूर्वजः पुष्पहासः पुण्यफलप्रदः ।

ध्यानगम्यो ध्यातृरूपः ध्येयो धर्मविदां वरः ॥ ९८
अवशः स्ववशः स्थाणुरन्तर्यामी शतक्रतुः ।
कूटस्थः कूर्मपीठस्थः कूश्माण्डग्रहमोचकः ॥ ९९
कूलङ्कषकृपासिन्धुः कुशली कुङ्कुमेश्वरः ।
गदाधरो गणस्वामी गरिष्ठस्तोमरायुधः ॥ १००
जवनो जगदाधारो जमदग्निर्जराहरः ।
जटाधरोऽमृताधारोऽमृतांशुरमृतोद्भवः ॥ १०१
विद्वत्तमो विदूरस्थो विश्रमो वेदनामयः ।
चतुर्भुजश्शततनुः शमिताखिलकौतुकः ॥ १०२
वौषट्कारो वषट्कारो हुङ्कारः फट्करः पटुः ।
ब्रह्मिष्ठो ब्रह्मसूत्रार्थो ब्रह्मज्ञो ब्रह्मचेतनः ॥ १०३
गायको गरुडारूढो गजासुरविमर्दनः ।
गर्वितो गगनावासो ग्रन्थित्रयविभेदनः ॥ १०४
भूतमुक्तावलीतन्तुः भूतपूर्वो भुजङ्गभृत् ।
अतर्क्यस्सूकरः सूरः सत्तामात्रस्सदाशिवः ॥ १०५
शक्तिपातकरश्शक्तः शाश्वतश्श्रेयसां निधिः ।

अजीर्णस्सुकुमारोऽन्यः पारदर्शी पुरन्दरः ॥ १०६
अनावरणविज्ञानो निर्विभागो विभावसुः ।
विज्ञानमात्रो विरजाः विरामो विबुधाश्रयः ॥ १०७
विदग्धमुग्धवेषाढ्यो विश्वातीतो विशोकदः ।
मायानाट्यविनोदज्ञो मायानटनशिक्षकः ॥ १०८
मायानाटककृन्मायी मायायन्त्रविमोचकः ।
वृद्धिक्षयविनिर्मुक्तो विद्योतो विश्वबन्धकः ॥ १०९
कालात्मा कालिकानाथः काकेटिकविभूषणः ।
षड्ऊर्मिरहितः स्तव्यः षड्गुणैश्वर्यदायकः ॥ ११०
षडाधारगतः साध्यः षडक्षरसमाश्रयः ।
अभिर्देश्योऽनिलो गम्योऽविक्रियोऽमोघवैभवः ॥
हेयादेयविनिर्मुक्तो हेलाकलिततापडवः ।
अपर्यन्तोऽपरिच्छेद्योऽगोचरो रुग्विमोचकः ॥ ११२
निरंशो निगमानन्दो निरानन्दो निदानभूः ।
आदिभूतो महाभूतः स्वेच्छाकलितविग्रहः ॥ ११३

निस्पन्दः प्रत्यगानन्दो विनिर्मेषो निरन्तरः ।
प्रबुद्धः परमोदारः परमानन्दसागरः ॥ ११४
संवत्सरः कलापूर्णः सुरासुरनमस्कृतः ।
निर्वाणदो निर्वृतिस्थो निर्वैरो निरुपाधिकः ॥ ११५
आभास्वरः परं तत्वमादिमः पशुलः पविः ।
संशान्तसर्वसङ्कल्पः संसदीशस्सदोदितः ॥ ११६
भावाभावविनिर्मुक्तो भारूपो भावितो भरः ।
सर्वातीतस्सारतरः साम्बस्सारस्वतप्रदः ॥ ११७
सर्वकृत्सर्वभृत्सर्वमयस्सत्वावलम्बकः ।
केवलः केशवः केलीकरः केवलनायकः ॥ ११८
इच्छानिच्छाविरहितो विहारी वीर्यवर्धनः ।
विनिघ्नो विगतभीः विपिपासो विभावनः ॥
विश्रान्तिभूर्विवसनो विहनहन्ता विशोषकः ।
वीरप्रियो वीतभयो विन्ध्यदर्पविनाशनः ॥ १२०
वेतालनटनप्रीतो वेतण्डत्वक्कृताम्बरः ।
वेलातिलङ्घिकरुणो विलासी विक्रमोन्नतः ॥ १२१

वैराग्यशेवधिर्विश्वभोक्ता सर्वोर्ध्वसंस्थितः ।
महाकर्ता महाभोक्ता महासंविन्मयो मधुः ॥ १२२
मनोवचोभिरग्राह्यो महाबिलकृतालयः ।
अनहङ्कृतिरच्छेद्यः स्वानन्दैकघनाकृतिः ॥ १२३
संवर्ताग्न्युदरस्सर्वान्तरस्थस्सर्वदुर्ग्रहः ।
सम्पन्नस्सङ्कसस्सन्त्री सन्धाता सकलोर्जितः ॥
सम्प्रवृद्धस्सन्निकृष्टः संविमृष्टस्समग्रहक् ।
संयमस्थस्सन्दुदिश्यः सम्प्रविष्टस्समुत्सुकः ॥ १२५
सम्प्रदुष्टस्सन्निविष्टः संस्पृष्टस्सम्प्रमर्दनः ।
सूत्रभूतस्स्वप्रकाशः समशीलस्सदादयः ॥ १२६
सत्वसंस्थस्सुषुप्तिस्थः सुतल्पस्सत्वरूपगः ।
सङ्कल्पोल्लासनिर्मुक्तः समनीरागचेतनः ॥ १२७
आदित्यवर्णस्संज्योतिः सम्यग्दर्शनतत्परः ।
महातात्पर्यनिलयः प्रत्यग्ब्रह्मैक्यनिश्चयः ॥ १२८
प्रपञ्चोल्लासनिर्मुक्तः प्रत्यक्षः प्रतिभात्मकः ।
प्रवेगः प्रमदार्धाङ्गः प्रनर्तनपरायणः ॥ १२९

योगयोनिर्यथाभूतो यक्षगन्धर्ववन्दितः ।
जटिलश्चटुलापाङ्गो महानटनलम्पटः ॥ १३०
पाटलांशुः पटुतरः पारिजातस्य मूलगः ।
पापाटवीबृहद्भानुः भानुमत्कोटिकोटिभः ॥ १३१
कोटिकन्दर्पसौभाग्यमुन्दरो मधुरस्मितः ।
लास्यामृताब्धिलहरीपूर्णेन्दुः पुण्यगोचरः ॥ १३२
रुद्राक्षस्रङ्न्यायकल्पः कह्लारकिरणद्युतिः ।
अमूल्यमणिसम्भास्वत्फणीन्द्रकरकङ्कणः ॥ १३३
चिच्छक्तिलोचनानन्दकन्दलः कुन्दपाण्डुरः ।
अगम्यमहिमाम्भोधिरनौपम्ययशोनिधिः ॥ १३४
चिदानन्दनटाधीशः चित्केवलवपुर्धरः ।
चिदेकरससम्पूर्णः श्रीशिवः श्रीमहेश्वरः ॥ १३५

॥ इति श्रीनटेशसहस्रनामस्तोत्रं सम्पूर्णम् ॥

वामे भूधरजा पुरश्च वृषराट् पश्चान्मुनिर्जैमिनिः
श्रीमद्व्यासपतञ्जलीत्युभयतः वाण्वादिकोणेषु च ।
श्रीमत्तिल्लवनैकवासिमखिनः ब्रह्मादिबृन्दारकाः मध्ये
स्वर्णसभापतिर्विजयते हृत्पुण्डरीके पुरे ॥

॥ श्रीनटेशार्पणमस्तु ॥
॥ शिवं भूयात् ॥

ॐ

॥ श्री नटेशपञ्चरत्नम् ॥

श्रीमच्चिदम्बरनटात् नटराजराजात्
विद्याधिपात् विविधमङ्गलदानशौण्डात् ।
पूर्णेन्दुसुन्दरमुखात् द्विजराजचूडात्
भर्गात्परं किमपि तत्वमहं न जाने ॥ १

डक्काविभूषितकरात् विषनीलकण्ठात्
फुल्लारविन्दनयनात् फणिराजवन्द्यात् ।
व्याघ्रांघ्रिपूज्यचरणात् शिवकुञ्चिताङ्घ्रेः
शम्भोः परं किमपि तत्वमहं न जान ॥ २

श्री नाथमृग्यचरणात् विधिमृग्यचूडात्
श्री पुण्डरीकनिलयात् श्रितदुःखनाशात् ।
श्रीमद्दुहस्य जनकात् सुखटत्तराजात्
श्रीशात्परंकिमपि तत्वमहं न जाने ॥ ३

श्रीमद्गणेशजनकात् मखिवृन्दपूज्यात्
विल्लाटवीसुनिलयात् त्रिपुराम्बिकेशात् ।
व्याघ्राजिनाम्बरधरात् उरुरोगनाशात्
रुद्रात्परं किमपि तत्वमहं न जाने ॥ ४

श्रीमद्व्याघ्रपुरेश्वरात् फणिराजभूषात्
संसाररोगभिषजः निखिलाण्डपालात् ।
श्रीमद्धेमसभेश्वरात् ललिताम्बिकेशात्
स्थाणोः परं किमपि तत्वमहं न जाने ॥ ५

पञ्चरत्नं नटेशस्य सोमशेखर यज्वभिः ।
संस्तुतं यः पठेन्नित्यं शाश्वतं तस्य मङ्गलम् ॥ ६

॥ श्री मुरुकाष्टकम् ॥



सिद्धिबुद्धिप्रदं देवं सुब्रह्मण्याग्रजं प्रभुम् ।
सोमाप्रतनयं वन्दे विघ्नराजमहर्निशम् ॥ १

मुकारस्तु मुकुन्दस्स्यात् रुकारो रुद्रवाचकः ।
ककारस्तु ब्रह्मवादी मुरुको गुहवाचकः ॥ २

मरुक श्रीमताम्नाथ भोगमोक्षप्रदप्रभो ।
देवदेव महासेन पाहिपाहि सदा विभो ॥ ३

मुरुकं मुक्तिदं देवं मुनीनां मोदकं प्रभुम् ।
मोचकं सर्वदुःखानां मोहनाशं सदानुमः ॥ ४

मुरुकेण मुकुन्देन मुनीनां हार्दवासिना ।
वल्लीशेन महेशेन पालितास्सर्वदा वयम् ॥ ५

मुरुकाय नमः प्रातः मुरुकाय नमो निशि ।
मुरुकाय नमः सायं मुरुकाय नमो नमः ॥ ६

मुरुकात्परात्सत्यात् षण्मुखात् शिखिवाहनात् ।
गुहात्परं न जानेऽहं तत्त्वं किमपि सर्वदा ॥ ७
मुरुकस्य महेशस्य वल्लीसेनापतेः प्रभोः ।
चिदम्बर विलासस्य चरणौ सर्वदा भजे ॥ ८
मुरुके षण्मुखे देवे शिखिवाहे द्विषड्भुजे ।
कृत्तिकातनये शम्भौ सर्वदा रमतां मनः ॥ ९
मुरुकस्याष्टकमिदं सोमशेखरयज्वभिः ।
संस्तुतं यः पठेन्नित्यं शाश्वतं तस्य मङ्गळम् ॥ १०

॥ इति श्री मुरुकाष्टकं समाप्तम् ॥

॥ वेदान्तडिण्डिमः ॥



वेदान्तडिण्डिमास्तत्त्वमेकमुद्घोषयन्ति यत् ।
आस्तां पुरस्तात्तत्तेजो दक्षिणामूर्तिसंज्ञितम् ॥ १
आत्माऽनात्मा पदार्थौ द्वौ भोक्तृभोग्यत्वलक्षणौ ।
ब्रह्मैवाऽऽत्मान देहादिरिति वेदान्तडिण्डिमः । २
ज्ञानाऽज्ञाने पदार्थौ द्वावात्मनो बन्धमुक्तिदौ ।
ज्ञानान्मुक्ति र्निर्बन्धोऽन्यदिति वेदान्तडिण्डिमः ॥ ३
ज्ञातृ ज्ञेयं पदार्थौ द्वौ भास्यभासकलक्षणौ ।
ज्ञाता ब्रह्म जगत् ज्ञेय मिति ... ॥ ४
सुखदुःखे पदार्थौ द्वौ प्रियविप्रियकारकौ ।
सुखं ब्रह्म जगद्दुःख मिति ... ॥ ५
समष्टिव्यष्टिरूपौ द्वौ पदार्थौ सर्वसम्मतौ ।
समष्टिरीश्वरो व्यष्टिः जीवो ... ॥ ६
ज्ञानं कर्म पदार्थौ द्वौ वस्तुकर्त्रात्म तन्त्रकौ ।
ज्ञानान्मोक्षो न कर्मभ्य इति ... ॥ ७

श्रोतव्याऽश्रव्यरूपौ द्वौ पदार्थौ सुखदुःखदौ ।
श्रोतव्यं ब्रह्म नैवाऽन्य दिति ... ॥ ८
चिन्त्याऽचिन्त्ये पदार्थौ द्वौ विश्रान्ति भ्रान्तिदायकौ ।
चिन्त्यं ब्रह्म परं नाऽन्य दिति ... ॥ ९
ध्येयाऽध्येये पदार्थौ द्वौ द्वौ धीसमाध्यसमाधिदौ ।
ध्यातव्यं ब्रह्म नैवाऽन्य दिति ... ॥ १०
योगिनो भोगिनो वाऽपि त्यागिनो रागिणोऽपि च ।
ज्ञानान्मोक्षो न सन्देह इति ... ॥ ११
न वर्णाश्रमसङ्केतैः न कर्मोपासनादिभिः ।
ब्रह्मज्ञानं विना मोक्षः इति .... ॥ १२
असत्यस्सर्वसंसारो रसाभासादिदूषितः ।
उपेक्ष्यो ब्रह्म विज्ञेय मिति ... ॥ १३
वृथा क्रियां वृथाऽलापान् वृथावादान् मनोरथान् ।
त्यक्त्वैकं ब्रह्म विज्ञेय मिति ... ॥ १४
स्थितो ब्रह्मात्मना जीवो ब्रह्म जीवात्मना स्थितम् ।
इति संपश्यतां मुक्ति रिति ... ॥ १५

जीवो ब्रह्मात्मना ज्ञेयो ज्ञेयं जीवात्मना परम् ।
मुक्तिस्तु दैक्यविज्ञान मिति ... ॥ १६
सर्वात्मना परं ब्रह्म श्रोतुरात्मतया स्थितम् ।
नाऽऽयास स्तत्त्व विज्ञानी इति ... ॥ १७
ऐहिकं चाऽऽमुष्मिकं च तापान्तं कर्मसञ्चयम् ।
त्यक्त्वा ब्रह्मैव विज्ञेय मिति ... ॥ १८
अद्वैतद्वैतवादौ द्वौ सूक्ष्मस्थूलदृशां गतौ ।
अद्वैतवादान्मोक्षस्स्या दिति ... ॥ १९
कर्मिणो विनिवर्तन्ते निवर्तन्त उपासकाः ।
ज्ञानिनो न निवर्तन्ते इति ... ॥ २०
परोक्षाऽसत्फलं कर्मज्ञानं प्रत्यक्षसत्फलम् ।
ज्ञानमेवाऽभ्यसेत्तस्मात् इति ... ॥ २१
वृथा श्रमोऽयं विदुषा वृथाऽयं कर्मिणां श्रमः ।
यदि न ब्रह्मविज्ञानं इति ... ॥ २२
अलं यागैरलं योगैरलं भोगै रलं धनैः ।
परस्मिन्ब्रह्मणि ज्ञाते इति ... ॥ २३

अलं वेदैरलं शास्त्रैरलं स्मृतिपुराणकैः ।
परमात्मनि विज्ञाते इति ... ॥ २४
नर्चो न यजुषाऽर्थोऽस्ति न साम्नार्थोऽस्ति कश्चन ।
जाते ब्रह्मात्मविज्ञाने इति ... ॥ २५
कर्माणि चित्तशुद्ध्यर्थं मैकाग्र्यार्थं मुपासनम् ।
मोक्षार्थं ब्रह्मविज्ञान मिति ... ॥ २६
सञ्चितागामिकर्माणि दह्यन्ते ज्ञानकर्मणा ।
प्रारब्धानुभवान्मोक्ष इति ... ॥ २७
न पुण्यकर्मणा वृद्धिः न हानिः पापकर्मणा ।
नित्यासङ्गात्मनिष्ठानामिति ... ॥ २८
दृग्दृश्यौ द्वौ पदार्थौ स्यः परस्परविलक्षणौ ।
दृग्ब्रह्म दृश्यं माया स्या दिति ... ॥ २९
अविद्योपाधिको जीवो मायोपाधिक ईश्वरः ।
मायाऽविद्यागुणातीतः इति ... ॥ ३०
बुद्धिपूर्वाऽबुद्धिपूर्वकृतानां पापकर्मणाम् ।
प्रायश्चित्तमहोज्ञान मिति ... ॥ ३१

साकारं च निराकारं निर्गुणं च गुणात्मकम् ।
तत्त्वं तत्परमं ब्रह्म इति ... ॥ ३२
द्विजत्वं विध्यनुष्ठानात् विप्रत्वं वेदपाठतः ।
ब्राह्मण्यं ब्रह्मविज्ञानात् इति ... ॥ ३३
सर्वात्मना स्थितं ब्रह्म सर्वं ब्रह्मात्मना स्थितम् ।
न कार्यं कारणाद्भिन्न मिति ... ॥ ३४
सत्तास्फुरणसौख्यानि भासन्ते सर्ववस्तुषु ।
तस्माद्ब्रह्ममयं सर्वं मिति ... ॥ ३५
अवस्थात्रितयं यस्य क्रीडाभूमितया स्थितम् ।
तदेव ब्रह्म जानीयात् इति ... ॥ ३६
यन्नाऽऽदौ यच्च नाऽस्त्यन्ते तन्मध्ये भातमप्यसत् ।
अतो मिथ्या जगत्सर्वमिति ... ॥ ३७
यदस्त्यादौ यदस्त्यन्ते यन्मध्ये भाति तत्स्वयम् ।
ब्रह्मैवैकमिदं सत्य मिति ... ॥ ३८
पुरुषार्थत्रयाविष्टाः पुरुषाः पशवो ध्रुवम् ।
मोक्षार्थी पुरुषः श्रेष्ठः इति ... ॥ ३९

घटकुड्यादिकं सर्वं मृत्तिकामात्रमेव च ।
तथा ब्रह्म जगत्सर्वं मिति ... ॥ ४०
षण्णिहत्य त्रयं हित्वा द्वयं भित्त्वाऽखिलागतिम् ।
एकं बुद्ध्वाऽऽश्रुते मोक्ष मिति ... ॥ ४१
भित्त्वा षट् पञ्च भित्त्वाऽथ भित्त्वाऽथ चतुरन्विकम् ।
द्वयं हित्वा श्रयेदेक मिति ... ॥ ४२
देहो नाहं महं देही देहसाक्षीति निश्चयात् ।
जन्ममृत्युप्रहीणोऽसौ इति ... ॥ ४३
प्राणोनाहमहं देवः प्राणस्साक्षीति निश्चयात् ।
क्षुत्पिपासोपशान्ति स्स्यात् इति ... ॥ ४४
मनो नाऽहं महं देवो मनस्साक्षीति निश्चयात् ।
शोकमोहापहानिस्स्यात् ... ॥ ४५
बुद्धिर्नाऽहमहं देवो बुद्धिसाक्षीति निश्चयात् ।
कर्तृभावनिर्वृत्तिस्स्यात् इति ... ॥ ४६
नाज्ञानं स्यामहं देवोऽज्ञानसाक्षीति निश्चयात् ।
सर्वानर्थनिवृत्तिस्स्यात् इति ... ॥ ४७

अहं साक्षीति यो विद्यात् विविच्यैवं पुनः पुनः ।
स एव मुक्तोऽसौ विद्वान् इति .... ॥ ४८
नाऽहं माया न तत्कार्यं न साक्षी परमोऽस्म्यहम् ।
इति निस्संशयज्ञानात् मुक्तिर्वै ... ॥ ४९
नाऽहं सर्वं महं सर्वं मयि सर्वमिति स्फुटम् ।
ज्ञाते तत्त्वे कुतो दुःख मिति ... ॥ ५०
देहादिपञ्चकोशस्था या सत्ता प्रतिभासते ।
सा सत्ताऽऽत्मा न सन्देह इति ... ॥ ५१
देहादिपञ्चकोशस्था या स्फूर्ति रनुभूयते ।
सा स्फूर्तिरात्मा नैवाऽन्य दिति ... ॥ ५२
देहादिपञ्चकोशस्था या प्रीतिरनुभूयते ।
सा प्रीतिरात्मा कूटस्थः इति ... ॥ ५३
व्योमादिपञ्चभूतस्था यासत्ता भासते नृणाम् ।
सा सत्ता परमं ब्रह्म इति ... ॥ ५४
व्योमादिपञ्चभूतस्था या चिदेकाऽनुभूयते ।
सा चिदेव परं ब्रह्म इति ... ॥ ५५

व्योमादिपञ्चभूतस्था या प्रीतिरनुभूयते ।
सा प्रीतिरेव ब्रह्म स्यात् इति ... ॥ ५६
देहादिकोशगा सत्ता या सा व्योमादिभूतगा ।
मानाऽभावान्न तद्भेदः इति ... ॥ ५७
देहादिकोशगा स्फूर्तिर्या सा व्योमादिभूतगा ।
मानाऽभावा न तद्भेद इति ... ॥ ५८
देहादिकोशगा प्रीतिर्या सा व्योमादिभूतगा ।
मानाऽभावा न तद्भेद इति ... ॥ ५९
सच्चिदानन्दरूपत्वात् ब्रह्मैवाऽत्मा न संशयः ।
प्रमाणकोटिसंघानात् इति ... ॥ ६०
न जीवब्रह्मणोर्भेदः सत्तारूपेण विद्यते ।
सत्ताभेदे न मानं स्यात् इति ... ॥ ६१
न जीवब्रह्मणोर्भेदः स्फूर्तिरूपेण विद्यते ।
स्फूर्तिभेदे न मानं स्यात् इति ... ॥ ६२
न जीवब्रह्मणोर्भेदः प्रियरूपेण विद्यते ।
प्रियभेदे न मानं स्यात् इति ... ॥ ६३

न जीवब्रह्मणोर्भेदो नाम्ना रूपेण विद्यते ।
नाम्नो रूपस्य मिथ्यात्वात् इति ... ॥ ६४
न जीवब्रह्मणोर्भेदः पिण्डब्रह्माण्डभेदतः ।
व्यष्टेस्समष्टेरेकत्वात् इति ... ॥ ६५
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नाऽपरः ।
जीवन्मुक्तस्तु तद्विद्वान् इति ... ॥ ६६
न नामरूपे नियते सर्वत्र व्यभिचारतः ।
अनामरूपं सर्वं स्यात् इति ... ॥ ६७
अनामरूपं सकलं सन्मयं चिन्मयं परम् ।
कुतो भेदः कुतो बन्धः इति ... ॥ ६८
न तत्त्वात्कथ्यते लोको नामाद्यैर्व्यभिचारतः ।
वटुर्जरठ इत्यादै रिति ... ॥ ६९
नामरूपात्मकं विश्वमिन्द्रजालं विदुर्बुधाः ।
अनामत्वादयुक्तत्वात् इति ... ॥ ७०
अभेददर्शनं मोक्षः संसारो भेददर्शनम् ।
सर्ववेदान्तसिद्धान्तः इति ... ॥ ७१

न मताभिनिवेशित्वात् न भाषावेशमात्रतः ।
मुक्तिर्विनाऽऽत्मविज्ञानात् इति ... ॥ ७२
न काम्यप्रतिषिद्धाभिः क्रियाभिर्मोक्षवासना ।
ईश्वरानुग्रहात्सा स्यात् इति ... ॥ ७३
अविज्ञाते जन्म नष्टं विज्ञाते जन्म सार्थकम् ।
ज्ञातुरात्मा न दूरे स्यात् इति ... ॥ ७४
दशमस्य परिज्ञानेनाऽऽप्तोऽस्ति यथा तथा ।
स्वस्य ब्रह्मात्मविज्ञाने इति ... ॥ ७५
उपेक्ष्यौपाधिकान् दोषान् गृह्यन्ते विषमा यथा ।
उपेक्ष्य दृश्यं य ब्रह्म इति ... ॥ ७६
सुखमल्पं बहुः क्लेशोविषयग्राहिणां नृणाम् ।
अनन्तं ब्रह्मनिष्ठानाम् इति ... ॥ ७७
धनैर्वा धनदैः पुत्रैः दारागारसहोदरैः ।
ध्रुवं प्राणहरैर्दुःखम् इति ... ॥ ७८
सुप्ते रुत्थाय सुप्त्यन्त्यं ब्रह्मैकं प्रविचिन्त्यताम् ।
नाऽतिदूरे नृणां मृत्युः इति ... ॥ ७९

पञ्चानामपिकोशानां मायाऽनर्थान्ययोचिता ।
तत्साक्षि ब्रह्म विज्ञान मिति ... ॥ ८०
दशमत्वपरिज्ञाने ननङ्गस्य यथा सुखम् ।
तथा जीवस्य सत्प्राप्तौ इति ... ॥ ८१
नवभ्योऽस्ति परं प्रत्यक्नस वेद परं परम् ।
तद्विज्ञानाद्भवेत्तुर्या मुक्ति र्वेदान्तडिण्डिमः ॥ ८२
नवाऽऽभासानवङ्गत्वात् नवोपाधीन्नवात्मना ।
मिथ्या ज्ञात्वाऽवशिष्टे तु मौनं वेदान्तडिण्डिमः ॥
परमे ब्रह्मणि स्वस्मिन् प्रविलाप्याऽखिलं जगत् ।
गायन्नद्वैतमानन्दं आस्ते वेदान्तडिण्डिमः ॥ ८४
प्रतिलोमानुलोमाभ्यां विश्वारोपापवादयोः ।
चिन्तने शिष्यते तत्त्वं इति ... ॥ ८५
नामरूपाभिमानस्त्यात् संसारस्सर्वदेहिनाम् ।
सच्चिदानन्ददृष्टिस्त्यात् मुक्तिर्वेदान्तडिण्डिमः ॥ ८६
सच्चिदानन्दसत्यत्वे मिथ्यात्वे नामरूपयोः ।
विज्ञाते किमिदं ज्ञेयं इति ... ॥ ८७

सालम्बनं निरालम्बं सर्वालम्बावलम्बितम् ।
आलम्बेनाऽखिलालम्ब मिति ... ॥ ८८
न कुर्या न्न विजानीयात् सर्वं ब्रह्मेत्यनुस्मरन् ।
यथा सुखं तथा तिष्ठेत् इति ... ॥ ८९
स्वकर्मपाशवशगः प्राज्ञोऽन्यो वा जनो ध्रुवम् ।
प्राज्ञस्सुखं नयेत्काल मिति ... ॥ ९०
न विद्वान् सन्तपे वित्तं करणाकरणे ध्रुवम् ।
सर्वमात्मेति विज्ञानात् इति ... ॥ ९१
नैवाऽऽभासं स्पृशेत्कर्मभिथ्योपाधिमपि स्वयम् ।
कुतोऽधिष्ठानमत्यच्छमिति ... ॥ ९२
अहोऽस्माक मलं मोहैरात्मा ब्रह्मेति निर्भयम् ।
श्रुतिभेरीरवोऽद्यापि श्रूयते श्रुतिरञ्जनः ॥ ९३
वेदान्तभेरीझङ्कारः प्रतिवादिभयङ्करः ।
श्रूयतां ब्राह्मणैः श्रीमद्दक्षिणामूर्त्यनुग्रहात् ॥ ९४

इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीमच्छङ्कर-
भगवत्पूज्यपादकृतिषु वेदान्तडिण्डिमः ॥

॥ परमाद्वैतम् ॥



निर्विकारं निराकारं निरञ्जनमनामयम् ।
आद्यन्तरहितं पूर्णं ब्रह्मैवाहं न संशयः ॥ १

निष्कलंकं निराभासं त्रिपरिच्छेदवर्जितम् ।
आनन्दमजमव्यक्तं ब्रह्मैवाहं न संशयः ॥ २

निर्विशेषं निराकारं नित्यमुक्तमविक्रियम् ।
प्रज्ञानैकरसं सत्यं ब्रह्मैवाहं न संशयः ॥ ३

शुद्धं बुद्धं स्वतस्सिद्धं परं प्रत्यगखण्डितम् ।
स्वप्रकाशं पराकाशं ब्रह्मैवाहं न संशयः ॥ ४

सुसूक्ष्ममस्तितामात्रं निर्विकल्पं महत्तमम् ।
केवलं परमाद्वैतं ब्रह्मैवाहं न संशयः ॥ ५

॥ इति परमाद्वैतम् ॥



॥ वाक्यवृत्तिः ॥

सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिं विश्वेश्वरं विदित-
विश्वमनन्तमूर्तिम् । निर्मुक्तबन्धनमपारसुखाम्बुराशिं
श्रीवल्लभं विमलबोधघनं नमामि ॥ १

यस्य प्रसादादहमेव विष्णुः मय्येव सर्वं परि-
कल्पितं च । इत्थं विजानामि सदात्मरूपं तस्याङ्घ्रि-
पद्मं प्रणतोऽस्मि नित्यम् ॥ २

तापत्रयार्कसन्तप्तः कश्चिदुद्विग्नमानसः ।
शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति ॥ ३

अनायासेन येनास्मान्मुच्येयं भवबन्धनात् ।
तन्मे संक्षिप्य भगवन् कैवल्यं कृपया वद ॥ ४

साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते ।
इदं तदिति विस्पष्टं सावधानमनाः शृणु ॥ ५

तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः ।
तादात्म्यं विषयज्ञानं तदिदं मुक्तिसाधनम् ॥ ६

को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः ।
तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत् ॥ ७
अत्र ब्रूमः समाधानं कोन्यो जीवस्त्वमेव हि ।
यस्त्वं पृच्छसि मां कोहं ब्रह्मैवासि न संशयः ॥ ८
पदार्थमेव जानामि नाद्यापि भगवन् स्फुटम् ।
अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद । ९
सत्यमाह भवानत्र विज्ञानं नैव विद्यते ।
हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिव ॥ १०
अन्तःकरणतद्वृत्ति साक्षी चैतन्यविग्रहः ।
आनन्दरूपः सत्यस्सन् किं नात्मानं प्रपद्यते ॥ ११
सत्यानन्दस्वरूपं धीसाक्षिणं बोधविग्रहम् ।
चिन्मयात्मतया नित्यं त्यक्त्वा देहादिगां धियम् ॥
रूपादिमान्यतः पिण्डस्ततो नात्मा घटादिवत् ।
वियदादिमहाभूतविकारत्वाच्च कुम्भवत् ॥ १३
अनात्मा यदि पिण्डोयमुक्तहेतुबलान्मतः ।
करामलकवत्साक्षादात्मानं प्रतिपादय ॥ १४

घटद्रष्टा घटाद्भिन्नः सर्वदा न घटो यथा ।
देहे दृष्टा तथा देहो नाहमित्यवधारयेत् ॥ १५
एवमिन्द्रियदृङ्नाहमिन्द्रियाणीति निश्चिनु ।
मनोबुद्धिस्तथा प्राणो नाहमित्यवधारय ॥ १६
सङ्घातोऽपि तथा नाहमिति दृश्यविलक्षणम् ।
द्रष्टारमनुमानेन निपुणं सम्प्रधारय ॥ १७
देहेन्द्रियादयो भावा हानादिव्यापृतिक्षमाः ।
यस्य सन्निधिमात्रेण सोहमित्यवधारय ॥ १८
अनापन्नविकारः सन्नयस्कान्तवदेव यः ।
बुद्ध्यादीश्चालयेत्प्रत्यक्सोहमित्यवधारय ॥ १९
अजडात्मवदाभान्ति यत्सान्निध्याज्जडा अपि ।
देहेन्द्रियमनःप्राणाः सोहमित्यवधारय ॥ २०
आगमन्मे मनोन्यत्र साम्प्रतं च स्थिरीकृतम् ।
एवं यो वेत्ति धीवृत्तिं सोहमित्यवधारय ॥ २१
स्वप्नजागरिते सुप्तिं भावाभावौ धियां तथा ।
यो वेत्त्यविक्रियस्साक्षात्सोहमित्यवधारय ॥ २२

घटावभासको दीपो घटादन्यो यथेष्यते ।
देहावभासको देही तथाहं बोधविग्रहः ॥ २३
पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः ।
द्रष्टा सर्वप्रियतमः सोहमित्यवधारय ॥ २४
परप्रेमास्पदतया मानभूवमहं सदा ।
भूयासमिति यो द्रष्टा सोहमित्यवधारय ॥ २५
यस्साक्षिलक्षणो बोधः त्वंपदार्थस्स उच्यते ।
साक्षित्वमपि बोद्धृत्वमविकारितयात्मनः ॥ २६
देहेन्द्रियमनःप्राणाहङ्कृतिभ्यो विलक्षणः ।
प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभिधः ॥ २७
त्वमर्थमेवं निश्चित्य तदर्थं चिन्तयेत्पुनः ।
अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च ॥ २८
निरस्ताशेषसंसारदोषोऽस्थूलादिलक्षणः ।
अदृश्यत्वादिगुणकः पराकृततमोमलः ॥ २९
निरस्तातिशयानन्दस्सत्यप्रज्ञानविग्रहः ।
सत्तास्वलक्षणः पूर्णः परमात्मेति गीयते ॥ ३०

सर्वज्ञत्वं परेशत्वं तथा सम्पूर्णशक्तिता ।
वेदैस्समर्थ्यते यस्य तद्ब्रह्मेत्यवधारय ॥ ३१
यज्ज्ञानात्सर्वविज्ञानं श्रुतिषु प्रतिपादितम् ।
मृदाद्यनेकदृष्टान्तैस्तद्ब्रह्मेत्यवधारय ॥ ३२
यदानन्त्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ ।
तत्कार्यत्वं प्रपञ्चस्य तद्ब्रह्मेत्यवधारय ॥ ३३
विजिज्ञास्यतया यच्च वेदान्तेषु मुमुक्षुभिः ।
समर्थ्यतेऽतियत्नेन तद्ब्रह्मेत्यवधारय ॥ ३४
जीवात्मना प्रवेशश्च नयन्तृत्वं च तान्प्रति ।
श्रूयते यस्य वेदेषु तद्ब्रह्मेत्यवधारय ॥ ३५
कर्मणां फलदातृत्वं यस्यैव श्रूयते श्रुतौ ।
जीवनाहेतुकर्तृत्वं तद्ब्रह्मेत्यवधारय ॥ ३६
तत्त्वंपदार्थौ निर्णीतौ वाक्यार्थश्चिन्त्यतेऽधुना ।
तादात्म्यमत्र वाक्यार्थः तयोरेव पदार्थयोः ॥ ३७
संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥ ३८

प्रत्यग्बोधो य आभाति सोद्वयानन्दलक्षणः ।
अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः ॥ ३९
इत्थमन्योन्यतादात्म्य प्रतिपत्तिर्यदा भवेत् ।
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ ४०
तदर्थस्य च पारोक्ष्यं यद्येतं किं ततः शृणु ।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ४१
तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने ।
लक्ष्यौ तत्त्वं पदार्थौ द्वावुपादाय प्रवर्तते ॥ ४२
हित्वाऽऽद्यौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने ।
यथा प्रवर्ततेऽस्माभिस्तथा व्याख्यातमादरात् ॥ ४३
आलम्बनतयाऽऽभाति योऽस्मत्प्रत्ययशब्दयोः ।
अन्तःकरणसम्भिन्नबोधस्तत्वं पदाभिदः ॥ ४४
मायोपाधिर्जगद्योनिस्सर्वज्ञत्वादिलक्षणः ।
पारोक्ष्यशबलस्सत्याद्यात्मक स्त्वंपदाभिधः ॥ ४५
प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता ।
विरुध्यते यतस्तस्मालक्षणा सम्प्रवर्तते ॥ ४६

मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे ।
मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते ॥ ४७
तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा ।
सोऽहमित्यादिवाक्यस्थपदयोरिव नापरा ॥ ४८
अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढी भवेत् ।
शमादिसहितास्तावदभ्यसेच्छ्रवणादिकम् ॥ ४९
श्रुत्याचार्यप्रसादेन दृढो बोधो यदा भवेत् ।
निरस्ताशेषसंसारनिदानः पुरुषस्तदा ॥ ५०
विशीर्णकार्यकरणो भूतसूक्ष्मैरनावृतः ।
विमुक्तकर्मनिगडः सद्य एव विमुच्यते ॥ ५१
प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत् ।
किञ्चित्कालमनारब्धकर्मबन्धस्य संक्षये ॥ ५२
निरस्तातिशयानादं वैष्णवं परमं पदम् ।
पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते ॥ ५३

इति श्रीमत्परमहंस परिव्राजकाचार्यवर्य श्रीमच्छङ्कराचार्य-विरचिता वाक्यवृत्तिः ॥

Printed at the 'Vavilla' Press, Madras-21—1953.

॥ क्रय्यसंस्कृतपुस्तकानि ॥

✣ वेदान्तग्रन्थाः ✣

	रू.	अ.
श्रीमद्भगवद्गीता—(मूलमात्रम्)	०	८
श्रीमद्भगवद्गीता With English Translation by A. M. Sastri.	८	०
श्रीमद्भगवद्गीता—संस्कृतद्रविडश्लोकैः द्रमिड-तात्पर्येण च सहिता	२	८
ब्रह्मसूत्राणि—(मूलम्)	०	४
उपनिषत्सु (Minor Upanishads Vol. I.) ...	२	०
दक्षिणामूर्तिस्तोत्रम्—((Minor Upanishads Vol. II)	४	०
विवेकचूडामणिः	०	८

✣ वैदिकग्रन्थाः ✣

	रू.	अ.
पञ्चसूक्तानि	०	३
रुद्रनमकचमकम्—सस्वरम्	०	३
सन्ध्यावन्दनम् (याजुषम्)	०	३
दर्शतर्पणम्	०	३
पञ्चायतनपूजा	०	३
तैत्तिरीयोपनिषत्—ब्रह्ममेधसहिता सस्वरा ...	१	०

	रू.	अं.
त्रिकाण्डसारार्थबोधिनी- (श्रीविद्यामन्त्रभाष्यात्मिका)	१	८
महात्रिपुरसुन्दरी पूजाकल्पः	१	०
वैष्णवाह्निकम्—(याजुषम्)	०	८
स्मार्ताह्निकम् ,, ...	०	१०
Vedic Law of Marriage	१	४
व्रतरत्नाकरः	२	०

✤ तर्क, व्याकरणग्रन्थाः ✤

तर्कसङ्ग्रहः, न्यायबोधिनी—निरुक्ति-पदकृत्यसहितः	२	०
शब्दमञ्जरी—(दृढपत्रात्मिका)	०	१२
तिङन्तमञ्जरी—धातुपाठसहिता	०	४
लघुसिद्धान्तकौमुदी	१	०

✤ चम्पू, गद्यग्रन्थाः ✤

चम्पूरामायणम्—सव्याख्यानम्	३	८
भोजचरित्रम्	१	०
दशकुमारचरितम्—दण्डिविरचितं सव्याख्यानम्	२	८
दशकुमारचरितम्—पूर्वभागः With Notes & English Translation	२	८
हर्षचरितम्—तृतीयोच्छ्वासमात्रम् with English Notes	१	८
भाषामञ्जरी (प्रश्नोत्तरे)	०	८
हितोपदेशः	१	८
मन्दारवती (कपिस्थलं कृष्णमाचार्यविरचिता बृहत्कथामञ्जर्युद्भूताभिनवकथा) ...	०	१२

	रू.	आ.
पेकस्पियर् नाटककथावली	२	८
वासवदत्ता कथासङ्ग्रहः	०	१२
संस्कृतबालशिक्षा—द्राविडप्रतिपदार्थसहिता ...	०	५
,, आङ्ध्रप्रतिपदार्थसहिता ...	०	५
,, आन्ध्रप्रतिपदार्थसहिता ...	०	५

✣ अलङ्कारग्रन्थाः ✣

काव्यादर्शः—दण्डिविरचितः सव्याख्यः साङ्गलानुवादः	५	०
चन्द्रालोकः—सव्याख्यः	१	०

✣ नाटकग्रन्थाः ✣

डमरुकम्	०	८
अभिज्ञानशाकुन्तलनाटकम्—शतावधानम् श्रीनिवासाचार्यविरचितया सभूमिकया व्याख्यया सहितम्	(मुद्रणे)	
अभिज्ञानशाकुन्तलम्—आङ्गलानुवादसहितया संस्कृतपदानुवादपूर्वाङ्गलटिप्पण्या च समेतम् ...	६	८
वेणीसंहारः व्याख्याद्वयोपेतः	२	८
महाकविबोधायनकृत भगवदज्जुकनाटकम्—पीठिकासहितम्	०	६
उत्तररामचरितम्—वीरराघवीयव्याख्यासहितं सटिप्पणं च	२	८
मालविकाग्निमित्रम्—चेन्नपुरीय लायलाकलाशालोपन्यासकैः ए. एस्. कृष्णराव् महोदयैः विरचिताभिः आङ्गलानुवाद टीका भूमिकाभिः सहितम्	५	०

	रू.	आ.
नागानन्दः	१	०
नागानन्दः वि. एस्. नारायणशास्त्रि (बि. ए., बि. एल्.) विरचिताभ्यां आङ्गलानुवादाङ्गल-प्रतिपदार्थाभ्यां सहितः (प्राक्तनः) ...	१	८
नागानन्दः-पि. वि. रामानुजस्वामिविरचिताभ्या-माङ्गलानुवादाङ्गल प्रतिपदार्थाभ्यां सहितः...	३	८
प्रियदर्शिका—नारायणशास्त्रि विरचिताङ्गलानु-वादसहिता	१	०
प्रियदर्शिका—विजयनगर महाराज संस्कृत-कलाशाला प्रधानाध्यापकैः पि. वि. रामानुज-स्वामि विरचिताभ्यामाङ्गलानुवादाङ्गलप्रति-पदार्थाभ्यां सहिता ...	३	८
रत्नावली नाटिका—श्वेतारण्यं नारायणशास्त्रि-विरचितया व्याख्यया सहिता पि. वि. रामानुजस्वामि विरचिताभ्यामाङ्गलानु-वादाङ्गल प्रतिपदार्थाभ्यां सहिता च...	३	४
पार्वतीपरिणयम्	१	१२

काव्यग्रन्थाः

शिशुपालवधः—८ सर्गपर्यन्तः सव्याख्यः ...	१	८
किरातार्जुनीयम्—सव्याख्यानम्	२	८
सुभाषितनीवी-व्याख्यानसहिता	(मुद्रणे)	
कुमारसम्भवः सव्याख्यः (१-८ सर्गाः) ...	२	८
कुमारसम्भवः-आङ्गलार्थानुवादसहितः १, २, ३, ४, ५, ६ सर्गपर्यन्तः... ...	४	०

	रू.	आ.
भर्तृहरिविरचितनीतिशतकम्—आङ्ग्लानुवादसहितम्	२	८
भर्तृहरिशतकत्रयम्—(मूलम्)	०	८
सुभाषितत्रिशती-भर्तृहरि प्रणीता रामचन्द्र विरचितव्याख्यानसहिता	२	८
यादवाभ्युदयः-अप्पय्यदीक्षितीयव्याख्यान सहितः ४ सर्ग-पर्यन्तः आङ्ग्लानुवाद तत्प्रतिपदार्थसहितः	२	८
श्रीकृष्णकर्णामृतम्—मूलम्	०	१२
,, आङ्ग्लानुवादसहितम्	२	८
हंससन्देशः-सव्याख्यः	०	६
हंससन्देशः—सव्याख्यः प्रतिपदाङ्ग्लार्थानुवादाभ्यां सहितः	२	८
हंससन्देशः-सव्याख्यः प्रतिपदाङ्ग्लार्थानुवादाभ्यां सहितः (एतद्व्याख्या चेन्नपुरीयपञ्चयप्प कलाशालायां संस्कृतपण्डितेन श्वेतारण्यं नारायणशास्त्रिणा विरचिता) ...	१	८
रामकर्णामृतम्	१	०
मार्तण्डोदयम्—शेषशास्त्रि विरचितम् ...	०	१२
मेघसंदेशः— मल्लिनाथ व्याख्यासहितः ...	१	०
मेघसन्देशः— मल्लिनाथीयव्याख्यासमेतः, सम्पूर्णपीठिकाङ्ग्लार्थविन्यासैः सहितः ...	३	०
रघुवंशः—मल्लिनाथीयव्याख्यासमेतः ...	४	८
रघुवंशः-(11-12) सर्गौ आङ्ग्लप्रतिपदार्थाङ्ग्लानुवादात्मकौ मुद्रणे स्तः Already in print V. P.		

॥ संस्कृतग्रन्थानां सूची ॥

❧ नामावलीसहित स्तोत्रादीनि ❧	रू.	अ.
श्रीविष्णुसहस्रनामस्तोत्रम्	०	६
आञ्जनेयसहस्रनामस्तोत्रम्	०	६
भवानीसहस्रनामस्तोत्रम्	०	६
अन्नपूर्णासहस्रनामस्तोत्रम्	०	६
[illegible]नामस्तोत्रम्	०	६
श्रीगोपालसहस्रनामस्तोत्रम्	०	६
श्रीकालिकासहस्रनामस्तोत्रम्	०	६
कृष्णसहस्रनामस्तोत्रम्	०	६
श्रीलक्ष्मीनृसिंहसहस्रनामस्तोत्रम्	०	६
लक्ष्मीसहस्रनामस्तोत्रम्	०	६
कनकधारास्तवः	०	२
आपदुद्धारकस्तोत्रम्	०	२
रामब्रह्ममानसिकपूजा	०	२
नारायणकवचम्	०	२
आदित्यहृदयम्	०	२
दक्षिणामूर्तिस्तोत्रम्	०	२
देवीस्तोत्रकदम्बः	०	१२

	रू.	अ.
श्रीलक्ष्मीनारायणहृदयम्	०	४
लक्ष्मीनृसिंहस्तोत्रम्	०	३
सौन्दर्यलहरी	०	२
श्रीमृत्युञ्जयमानसिकपूजास्तोत्रम्	०	२
बीजाक्षरवर्णमालिकास्तोत्रम्	०	३
सूर्यनमस्कारः	०	३
श्यामलादण्डकम्	०	२
मुकुन्दमाला	०	२
देवीखड्गमाला	०	३
देवीमानसिकपूजा	०	२
परमेश्वरस्तोत्रकदम्बः	०	१०
शिवानन्दलहरी	०	३
शिवकवचम्	०	२
आलवन्दार् स्तोत्रम्	०	२
श्रीगोविन्दद्वादश (चतुर्दश) मञ्जरिकास्तोत्रम् ...	०	२
हरिमीडेस्तोलम्	०	२
गद्यत्रयम्	०	३
गोपिकागीता, वेणुगीतेत्यादयः	०	३
दक्षिणामूर्तिस्तोत्रादीनि	०	४
नवग्रहस्तोत्रम्	०	१०
श्रीनट्टेशसहस्रनामस्तोत्रम्	०	६
रामसहस्रनामस्तोत्रम्	०	६
शिवसहस्रनामस्तोत्रम्	०	६

			रू.	अ.
बालासहस्रनामस्तोत्रम्	...	...	०	६
ललितासहस्रनामस्तोत्रम्	...	...	०	१०
वेङ्कटेशसहस्रनामस्तोत्रम्	...	...	०	६
सुब्रह्मण्यसहस्रनामस्तोत्रम्	...	...	०	६
श्रीसीतासहस्रनामस्तोत्रम्	...	...	०	६
बृहस्तोत्ररत्नाकरः द्वितीयसप्तपुटात्मकः		...	(मुद्रणे)	
श्रीवटुकभैरवसहस्रनामस्तोत्रम्	...	...	०	६
गायत्रीसहस्रनामस्तोत्रम्	...	...	०	६
श्रीशङ्कराचार्यादिस्तोत्राणि	...	...	०	३

❀ निघण्टुग्रन्थाः ❀

अमरकोशः—(मूलमात्रम्)	...	...	१	०
संस्कृतान्ध्रनिघण्टुः	...	...	५	०

॥ संस्कृतधातुमाला ॥

महद्वीटिकाचतुष्टयमुद्रिता

संस्कृतभाषाव्यवहारार्थं नित्योपयुक्तानाम् पञ्चाशत् धातूनाम् कृत्प्रत्ययादिविविधपरिनिष्ठितरूपाणि पट्टिकाक्रमेण सूचितानि. संस्कृताभ्यासिनाम् बहूपयुक्तानि भवन्ति। कतिचिदेव मुद्रितानि. रू. १—०—०

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्,
पोस्ट् बाक्स् १३७२, चेन्नपुरी. १.

ராமாயண நூல்கள்.

		ரூ.	அ.
வால்மீகி ராமாயண வசனம்—			
பாலகாண்டம் முதல் சப்தகாண்டம்		20	0
பாலகாண்டம்	...	2	8
அயோத்தியாகாண்டம்	...	4	0
ஆரண்யகாண்டம்	...	2	8
கிஷ்கிந்தாகாண்டம்	...	2	8
சுந்தரகாண்டம்	...	2	8
யுத்தகாண்டம்	...	4	8
உத்தரகாண்டம்	...	3	8
ஸ்லோபாக்யானம்	...	1	0
காகாக்ஷம்	...	0	4
ஸ்ரீராமசந்திரன்-நல்ல பிள்ளை	....	0	3
ஸீதாதேவி-நல்ல மனைவி	...	0	4
மாருதி-நல்ல அடிமை	...	0	3
விபீஷணன்-சிறந்தபக்தன்	...	0	3
பரதன்-நல்ல தம்பி	...	0	3
குகன்-சிறந்த நண்பன்	...	0	3
இராமாயண இரகசியம், மேல்படி ஆறு கதைகள் அடங்கியது காலிகோபைண்டு	...	1	0
ஹநுமத்ப்ரபாவம்	...	0	3

வாவில்ள ராமஸ்வாமி சாஸ்த்ருலு அண்ட் சன்ஸ், போஸ்ட் பாக்ஸ் 1372.

மதராஸ் 1.